CC-0. In Public Domain. Digitization by eGangotri

महेन्द्र संस्कृत विश्वविद्यालय, उत्तरमध्यमा तह, प्रथम वर्ष अनिवार्य संस्कृतरचना
विषयको सम्पूर्ण पाठ्यांशमा आधारित

संस्कृतरचनाप्रदीपः



ण कार्यक्रम
गो पुस्तक नि
ग्यन गर्ने
निकै

रचयिता
प्रा. नीलमणि ढुङ्गा
सहप्रा. ध्रुवप्रसाद ज

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा-२४९८

महेन्द्र संस्कृत विश्वविद्यालय, उत्तरमध्यमा तह, प्रथम वर्ष अनिवार्य संस्कृतरचना विषयको सम्पूर्ण पाठ्यांशमा आधारित

संस्कृतरचनाप्रदीपः

द-नं-२४८६५

रचयिता

प्रा. नीलमणि ढुङ्गाना

सहप्रा. ध्रुवप्रसाद ज्ञवाली

प्रकाशिका

श्रीमती महालक्ष्मी चालिसे

प्रदर्शनीमार्ग

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशक
महालक्ष्मी चालिसे, प्रदर्शनीमार्ग

प्रकाशन
प्रथम संस्करण - २०५९

सर्वाधिकार लेखकमा सुरक्षित

प्रकाशित पुस्तक संख्या - ५०० प्रति

मूल्य - रू. १५०

कम्प्युटर
क्वालिटी लेजर प्रिन्ट, बागबजार
फोन नं. - २४२६५६

मुद्रक
ए.बी.सेक्रेटरीयल एण्ड प्रिन्टर्स प्रा.लि.
फोन नं २५३१०१, २४३८३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सा· 28९८

यस पुस्तकका विशेषता

773369

१. महेन्द्र संस्कृत विश्वविद्यालयको उत्तरमध्यमा अनिवार्य संस्कृत रचनासँग [illegible] सिकाउने दृष्टिले यो पुस्तक तयार गरिएको छ ।

२. शिक्षक तथा विद्यार्थीहरूलाई कतिपय सैद्धान्तिक विषय बुझ्न सजिलो होस् भनेर कोष्ठभित्र नेपाली भाषामा अर्थ दिइएको छ ।

३. पाठ्यविषयलाई बुझ्न सजिलो होस् भनेर आवश्यकताभन्दा बढी विस्तारलाई संक्षेप गरिएको छ।

४. कण्ठस्थ गर्नुपर्ने रूपावलीजस्ता विषयलाई पनि प्रयोगप्रधान बनाई अभ्यासगम्य तुल्याइएको छ ।

५. पाठ्यक्रम, नमूना प्रश्नपत्र र शिक्षणसँग सम्बद्ध केही सुझाव अन्त्यमा दिइएको छ । यसबाट विद्यार्थीलाई परीक्षाको लागि पाठ्यांश तयार गर्न निकै सहयोग उपलब्ध हुनेछ ।

६. संस्कृत विषय नलिइकन एस.एल.सी. उत्तीर्ण भएर संस्कृत विद्यापीठ प्रवेश लिन चाहने विद्यार्थीहरूका निमित्त म.स.वि. बाट व्यव[illegible] गरिएको पूर्वावश्यक पाठ्यांश संस्कृतभाषा प्रशिक्षण कार्यक्रम[illegible] विद्यार्थीहरूलाई पनि संस्कृतभाषा सिक्नका लागि यो पुस्तक नि[illegible] सहयोगी बन्ने देखिन्छ ।

७. संस्कृत माध्यमिक विद्यालयमा माध्यमिक तहमा अध्ययन गर्ने छात्रहरूलाई रचना विषयको अध्ययनका लागि यो पुस्तक निकै सहयोगी हुनेछ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्तव्य

महेन्द्र संस्कृत विश्वविद्यालयको उत्तरमध्यमा तहमा निर्धारित अनिवार्य संस्कृतरचना विषयसँग सम्बद्ध सबै पाठ्यांशहरूलाई समेटेर सजिलो ढङ्गबाट सिकाउन यो पुस्तक तयार पारिएको हो । पाठ्यक्रममा निर्धारित सम्पूर्ण विषयलाई ... निर्धारित पाठ्यपुस्तकभित्रका क्षेत्रको आवश्यकताअनुसार पल्लवन तथा अति विस्तार भएका स्थलहरूको संक्षेपीकरणसमेत गरी रचिएको यस पुस्तकमा परीक्षाको लागि रचना विषयको पाठ्यांशको स्वयं अध्ययन गर्न विद्यार्थीलाई सजिलो होस् भन्ने दृष्टिकोण राखिएको छ ।

सम्बद्ध विषयका शिक्षक तथा विद्यार्थीहरूलाई वाक्यरचनाका सैद्धान्तिक पक्ष बुझ्न सजिलो होस् भन्ने दृष्टिकोणले संस्कृत भाषामा भनिएको कुरालाई आवश्यकस्थलमा कोष्ठ दिएर नेपाली भाषामा समेत अर्थ्याइएको छ । कण्ठस्थ गर्नुपर्ने रूपावलीजस्ता विषयलाई पनि प्रयोगप्रधान तुल्याई अभ्यासगम्य पारिएको छ । परिशिष्टमा अनिवार्य संस्कृतरचनाको पाठ्यक्रम, नमूनाप्रश्नपत्र, शिक्षणसँग सम्बद्ध केही सुझावहरूलाई समेत राखिएको हुँदा यो विषय पढाउने शिक्षक तथा विद्यार्थीहरूका निमित्त पाठ्यांशको ...ारीका लागि सहयोग पुग्नेछ भन्ने आशा लिएका छौं । संस्कृतभाषा सिक्न चाहने र ...कृतमा व्युत्पत्ति बढाउन इच्छुक तथा संस्कृतभाषा प्रशिक्षणका विद्यार्थीहरूलाई ...त यो पुस्तक उपयोगी हुनेछ भन्ने हामीलाई लागेको छ ।

अन्त्यमा, यो पुस्तक प्रकाशनका निमित्त सहयोग गर्ने श्री शम्भु बरालजी र श्रीमती महालक्ष्मी चालिसेजी, प्रदर्शनीमार्गलाई धन्यवाद दिन्छौं ।

मकरसङ्क्रान्ति, २०५९

लेखक

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विषयसूची

पाठाः	विषयाः	पृष्ठसङ्ख्याः
प्रथमः पाठः	व्याकरणपरिचयः	१
द्वितीयः पाठः	स्त्रीलिङ्गानुशासनम्	८
तृतीयः पाठः	पुँल्लिङ्गानुशासनम्	११
चतुर्थः पाठः	नपुंसकलिङ्गानुशासनम्	२०
पञ्चमः पाठः	अवशिष्टलिङ्गम्	२३
षष्ठः पाठः	वाक्यविचारः	२६
सप्तमः पाठः	वाक्यप्रयोगः	३१
अष्टमः पाठः	कारकाणि विभक्तयश्च	३४
नवमः पाठः	अस्तित्ववाचिक्रियापदप्रयोगः – १	३७
दशमः पाठः	अस्तित्ववाचिक्रियापदप्रयोगः – २	४०
एकादशः पाठः	विशेषणपदप्रयोगः	४३
द्वादशः पाठः	वर्तमानकालिकवाक्यप्रयोगः	४७
त्रयोदशः पाठः	आत्मनेपदप्रयोगः	५२
चतुर्दशः पाठः	भूतकालिकवाक्यप्रयोगः – १	५५
पञ्चदशः पाठः	भूतकालिकवाक्यप्रयोगः – २	५८
षोडशः पाठः	भविष्यत्कालिकवाक्यप्रयोगः	६०
सप्तदशः पाठः	आज्ञार्थकवाक्यप्रयोगः	६३
अष्टादशः पाठः	सम्भावनार्थकवाक्यप्रयोगः	६५
ऊनविंशः पाठः	अनुक्ते कर्मणि द्वितीया	६७
विंशः पाठः	करणे तृतीया	७८
एकविंशः पाठः	अनुक्ते कर्तरि तृतीया	८२
द्वाविंशः पाठः	संप्रदाने चतुर्थी	८९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयोविंशः पाठः अपादाने पञ्चमी ९२
चतुर्विंशः पाठः षष्ठी शेषे ९६
पञ्चविंशः पाठः सप्तम्यधिकरेण च ९९
षड्विंशः पाठः प्रेरणार्थकक्रियापदप्रयोगः १०१
सप्तविंशः पाठः वाक्यसंश्लेषणम् १०३
अष्टविंशः पाठः पञ्चतन्त्रपरिचयः १०७
ऊनत्रिंशः पाठः कुपुत्रचिन्ता १०९
त्रिंशः पाठः असत्पुत्रनिन्दा १११
एकत्रिंशः पाठः पुत्राणां प्रबोधोपायः ११३
द्वात्रिंशः पाठः पञ्चतन्त्रप्रयोजनम् ११५
त्रयस्त्रिंशः पाठः अर्थस्य महत्त्वम् ११७
चतुस्त्रिंशः पाठः वाणिज्यमहत्त्वम् ११९
पञ्चत्रिंशः पाठः रक्ष्यते दैवरक्षितः १२१
षड्त्रिंशः पाठः चतुर्मण्डलावस्थानम् १२३
सप्तत्रिंशः पाठः अव्यापारेषु व्यापारः १२५
अष्टत्रिंशः पाठः नीतिपद्यानि १२७
ऊनचत्वारिंशः पाठः अनुक्तमप्यूहति पण्डितो जनः १२९
चत्वारिंशः पाठः नीतिपद्यानि १३१
एकचत्वारिंशः पाठः तृणेन कार्यं भवतीश्वराणाम् १३३
द्वाचत्वारिंशः पाठः उत्साहः परिहीयते १३५
त्रयश्चत्वारिंशः पाठः षट्कर्णं वर्जयेत्सुधीः १३७
चतुश्चत्वारिंशः पाठः भिद्यते वाग्भिरातुरः १३९
पञ्चचत्वारिंशः पाठः शब्दमात्रान्न भेतव्यम् १४१
षट्चत्वारिंशः पाठः विश्वासादेव वध्यन्ते बलवन्तोऽपि दुर्बलैः १४३
सप्तचत्वारिंशः पाठः सदैवापद्गतो राजा भोग्यो भवति मन्त्रिणाम् १४५
अष्टचत्वारिंशः पाठः कार्यं संसिद्धिमभ्येति यथा बुद्ध्या प्रसाधितम् १४७
ऊनपञ्चाशः पाठः कर्मणि व्यज्यते प्रज्ञा १४९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चाशः पाठः दुर्लभः कार्यकर्ता १५२
एकपञ्चाशः पाठः राजा मित्रं केन दृष्टं श्रुतं वा १५४
द्विपञ्चाशः पाठः अहो ! सुसदृशी चेष्टास्तुलाकोटेः खलस्य च १५६
त्रिपञ्चाशः पाठः सत्सङ्गतिफलम् १५९
चतुपञ्चाशः पाठः निबन्धपरिचयः १६१
पञ्चपञ्चाशः पाठः निबन्धलेखनदिग्दर्शनम् १६४
षट्पञ्चाशः पाठः पद्यपरिचयः १६८
सप्तपञ्चाशः पाठः अलङ्कारपरिचयः १८०

परिशिष्टे

क) पाठ्यक्रमः, आदर्श (नमूना) प्रश्नपत्रञ्च १९३
ख) शिक्षणनिर्देशिका २०३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१.२ वर्णविचारः

१.२.१ **वर्णमाला-** *भाषाया लघुतमं रूपं* **वर्णः** *इति निगद्यते । संस्कृतभाषाया वर्णा द्विधा विभज्यन्ते-* ***स्वरवर्णाः, व्यञ्जनवर्णाश्च*** । [भाषाको सबैभन्दा सानो एकाइलाई **वर्ण** भनिन्छ। संस्कृतभाषामा वर्ण दुई थरीका हुन्छन्- **स्वरवर्ण** र **व्यञ्जनवर्ण** ।]

(क) **स्वरपरिचयः** - *स्वयं राजन्ते इति स्वराः। ये वर्णाः परवर्णसाहाय्यं विनैव समुच्चार्यन्ते ते स्वराः इति कथ्यन्ते । संस्कृतभाषायामधोनिर्दिष्टाः स्वराः सन्ति ।* [जुन वर्ण कसैको सहयोग नलिई आफैं उच्चरित हुन्छन्, तिनीहरूलाई **स्वरवर्ण** भनिन्छ । संस्कृत भाषामा स्वरवर्ण निम्नलिखित छन् ।] –

अ, आ, इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ ।

स्वरभेदाः - *मुख्यतया स्वरा स्त्रिधा विभज्यन्ते–ह्रस्वस्वराः, दीर्घस्वराः, प्लुतस्वराश्च। अइउऋऌवर्णा* ***ह्रस्वस्वराः***, *आ ई ऊ ॠ ल्ृ ए ऐ ओ औ वर्णाश्च* ***दीर्घस्वराः*** *कथ्यन्ते । दीर्घलृकारस्य प्रयोगस्तन्त्रशास्त्रे वेदेषु चोपलभ्यते, एत एव स्वरा दूराद्धूते प्लुतस्वराः भवन्ति ।* [मुख्यतया स्वर तीन किसिमका हुन्छन्– ह्रस्व, दीर्घ र प्लुत। अ इ उ ऋ ऌ **ह्रस्व स्वर** हुन् भने आ ई ऊ ॠ ॡ ए ऐ ओ औ **दीर्घ स्वर** हुन् । दीर्घ लृको प्रयोग तन्त्रशास्त्र र वेदमा भेटिन्छ । लामो स्वर गरी टाढाबाट बोलाउँदा यी स्वर प्लुत हुन्छन् ।]

(ख) **व्यञ्जनवर्णपरिचयः** - *स्वरस्य साहाय्यं विना ये वर्णा नैव समुच्चार्यन्ते ते व्यञ्जनवर्णा अभिधीयन्ते ।* [स्वरको सहायता नलिई जुन वर्ण उच्चारण हुन सक्दैनन्, तिनीहरूलाई **व्यञ्जनवर्ण** भनिन्छ । संस्कृत भाषामा निम्नलिखत व्यजन वर्ण छन् ।] –

क् ख् ग् घ् ङ् च् छ् ज् झ् ञ् ट् ठ् ड् ढ् ण् त् थ् द् ध् न् प् फ् ब् भ् म् य् र् ल् व् श् ष् स् ह् (अनुस्वारः) : (विसर्गः) ।

कषयोः संयोगेन क्षवर्णः, जञोः संयोगेन ज्ञवर्णः, तरयोः संयोगेन त्रवर्णश्च संयुक्तव्यञ्जनवर्णा निगद्यन्ते । [क्ष वर्णमा क् + ष, ज्ञ वर्णमा ज + ञ्, त्र वर्णमा त्+ र् मिलेको हुँदा यिनलाई **संयुक्त व्यञ्जन** मानिन्छ ।]

१.२.२ *कादयो मावसानाः स्पर्शाः ।* [कदेखि मसम्मका वर्णहरूको उच्चारणकालमा उच्चारण अवयवहरूको आपसमा स्पर्श हुने हुँदा यिनलाई **स्पर्शवर्ण** भनिन्छ ।] *यणोऽन्तस्थाः* [य व र ल लाई अन्तस्थ] *शल ऊष्माणः* [र श ष स ह लाई ऊष्म भनिएको छ ।]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१.२.३ **स्पर्शवर्णभेदाः** – *उच्चारणस्थानानुसारेण स्पर्शवर्णाः पञ्चधा विभज्यन्ते* [स्पर्श वर्णलाई उच्चारण स्थानको आधारमा ५ भागमा बाँडिएको छ ।] –

कवर्गः – क् ख् ग् घ् ङ्

चवर्गः – च् छ् ज् झ् ञ्

टवर्गः – ट् ठ् ड् ढ् ण्

तवर्गः – त् थ् द् ध् न्

पवर्गः – प् फ् ब् भ् म्

१.३ वर्णोच्चारणस्थानानि

१.३.१ **कण्ठ्यवर्णः** – *अकुहविसर्जनीयानां कण्ठः ।* [अ, आ, कवर्ग, ह तथा विसर्गको उच्चारण घाँटीबाट हुने हुँदा यिनलाई **कण्ठ्यवर्ण** भनिन्छ ।]

१.३.२ **तालव्यवर्णः** – *इचुयशानां तालु ।* [इ, ई, चवर्ग, य, शवर्णको उच्चारण तालुबाट हुने हुँदा यिनलाई **तालव्यवर्ण** भनिन्छ ।]

१.३.३ **मूर्धन्यवर्णः** – *ऋटुरषाणां मूर्धा ।* [ऋ, ॠ, टवर्ग, र, ष मूर्धाबाट उच्चरित हुने हुँदा यिनलाई **मूर्धन्यवर्ण** भनिन्छ ।]

१.३.४ **दन्त्यवर्णः** – *ऌतुलसानां दन्ताः ।* [ऌ, तवर्ग, ल, स वर्णको उच्चारण दाँतबाट हुने हुँदा यिनलाई **दन्त्यवर्ण** भनिन्छ ।]

१.३.५ **ओष्ठ्यवर्णः** – *उपूपध्मानीयानामोष्ठौ ।* [उ, ऊ, पवर्ग तथा उपपध्मानीय विसर्ग ओठबाट उच्चरित हुने हुँदा यिनलाई **ओष्ठ्यवर्ण** भनिन्छ ।]

१.३.६ **कण्ठ्यतालु** – *एदैतोः कण्ठतालु, ओदौतोः कण्ठौष्ठ्यम् । वकारस्य दन्तौष्ठ्यम् । ञमङणनानां नासिका च ।* [घाँटी र तालुको सहयोगबाट उच्चारण हुने हुँदा ए, ऐ लाई **कण्ठतालु**, घाँटी र ओठको सहयोगबाट उच्चारण हुने हुँदा ओ, औलाई **कण्ठौष्ठ्य** तथा दाँत र ओठको सहयोगबाट उच्चारण हुने हुँदा वलाई **दन्तौष्ठ्य** भन्दछन्। नाकबाट उच्चारण हुने हुँदा ङ, ञ, ण, न, म लाई **नासिक्यवर्ण** भनिन्छ।]

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१.४ पदविचारः

१.४.१ *पदपरिचयः*

संस्कृतभाषायां पदानां वर्गीकरणं बहुधा कृतं विद्यते। तेषु वर्गीकरणेषु यास्कसम्मतं वर्गीकरणं प्रायेण प्रचलितमस्ति। तन्मते पदानि चतुर्विधानि सन्ति – नाम, आख्यातम्, उपसर्गाः, निपाताश्चेति। आधुनिकवैयाकरणैः कार्यानुसारेण पदानि, अधोनिर्दिष्टदिशा विभज्यन्ते – नाम, सर्वनाम, विशेषणम्, क्रियाविशेषणम्, क्रियान्वयि, आख्यातपदम्, विस्मयादिबोधकपदञ्च। रचनानुसारेण पदानि द्विविधानि सन्ति – अव्युत्पन्नानि, व्युत्पन्नानि च। व्युत्पत्तिरहितानि पदानि अव्युत्पन्नानि कथ्यन्ते। यथा – हरिणः, सिंहः, अद्य, सर्वः, उभौ इत्यादीनि। येषाञ्च पदानां व्युत्पत्तिर्भवति, प्रकृतिप्रत्ययविश्लेषणविग्रहादिकार्यं कर्तुं शक्यते, तानि पदानि व्युत्पन्नानि निगद्यन्ते। यथा – रामः (रमन्ते योगिनोऽस्मिन् सः), दैत्यः (दितेरपत्यं पुमानिति) इत्यादीनि। [संस्कृतभाषामा पदलाई विभिन्न ढङ्गबाट वर्गीकरण गरिएको छ। यास्कले नाम, आख्यात, उपसर्ग र निपात गरी चार भागमा विभाजन गरेका छन्। आधुनिक वैयाकरणहरूले कार्यको आधारमा पदलाई नाम, सर्वनाम, विशेषण, क्रियाविशेषण, क्रियान्वयी, आख्यात र विस्मयादिबोधक गरी सात भागमा विभाजन गरेका छन्। रचनाको आधारमा पद दुई किसिमका हुन्छन् – अव्युत्पन्न र व्युत्पन्न। जसको व्युत्पत्ति गर्न सकिदैन अर्थात् प्रकृतिप्रत्ययको विश्लेषण, विग्रह आदि हुँदैन, त्यस्ता शब्दलाई अव्युत्पन्न पद भन्दछन्। जस्तै – मृगः, अद्य आदि। जसको प्रकृतिप्रत्यय छुट्याउन सकिन्छ, विग्रह गर्न सकिन्छ भने त्यस्ता पदलाई व्युत्पन्न शब्द भन्दछन्। जस्तै – रामः, दैत्यः आदि।]

व्युत्पन्नपदानि च त्रिविधानि भवन्ति – कृदन्तानि, तद्धितान्तानि, समस्तानि च। यानि पदानि कृत्प्रत्ययनिष्पन्नानि भवन्ति, तानि कृदन्तपदानि कथ्यन्ते। यथा- कारकः, कर्ता, कृति, पाचकः, कृत्वा इत्यादीनि। यानि पदानि तद्धितप्रत्ययनिष्पन्नानि सन्ति, तनि तद्धितान्तपदानि कथ्यन्ते। यथा – मानवः (मनु + अण्), ऐतिहासिकः (इतिहास+ ठक्) इत्यादीनि। यानि च पदानि समासप्रक्रियया निष्पन्नानि भवन्ति, तानि समस्तानि कथ्यन्ते। यथा – अधिहरि (हरौ इति), राजपुरुषः (राज्ञः पुरुषः), लम्बोदरम् (लम्बम् च तत् उदरम्), पञ्चमार्गम् (पञ्चानां मार्गाणां समाहारः), पीताम्वरः (पीतमम्बरं यस्य सः), हरिहरौ (हरिश्च हरश्च) इत्यादीनि। प्रकारान्तरेण पदानि द्विधा विभज्यन्ते- सुबन्तपदानि, तिङन्तपदानि च। यस्मात् सुब्विभक्तिर्जायते तानि पदानि सुबन्तपदानि कथ्यन्ते। यथा – रामः रामौ रामाः आदि। यस्मात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तिङ्-विभक्तिर्जायते तानि पदानि तिङन्तपदानि निगद्यन्ते। यथा – भवति, भवतः भवन्ति आदि । / व्युत्पन्न पद तीन किसिमका हुन्छन् – कृदन्त, तद्धितान्त र समस्त। धातुबाट लाग्ने प्रत्ययलाई कृत्प्रत्यय भनिन्छ । कृत्प्रत्यय लागी बनेका पद कृदन्त पद हुन् । जस्तै– कारकः, कर्ता, कृतिः आदि । धातुबाहेक नाम, सर्वनाम, विशेषण आदिबाट लाग्ने प्रत्ययहरू तद्धितप्रत्यय हुन् । यी प्रत्यय लागी बनेका पदलाई तद्धितान्त पद भनिन्छ । जस्तै – मानवः, दानवः, ऐतिहासिकः आदि। दुई वा दुईभन्दा बढी पदहरू मिली एक पद बन्ने प्रक्रियालाई समास भनिन्छ र समास भई बनेका पद समस्त पद हुन् । जस्तै – अधिहरि, राजपुरुषः, पञ्चमार्गम्, लम्बोदरः, पिताम्बरः, हरिहरौ आदि । प्रकारान्तरले पदलाई दुई भागमा बाँडिएको छ – सुबन्त र तिङन्त । सुप् विभक्ति लाग्नेलाई सुबन्त र तिङ् विभक्ति लाग्नेलाई तिङन्त भनिन्छ । जस्तै – सुबन्त – रामः रामौ रामाः आदि । तिङन्त – भवति, भवतः भवन्ति आदि ।/

१.५ सुबन्ततिङन्तपदपरिचयः

१.५.१ *सुबन्तपदानि*

यस्मात् शब्दात् सुबाद्यो विभक्तयो जायन्ते, तानि पदानि सुबन्तपदानि कथ्यन्ते। तानि च पुंल्लिङ्गानि, स्त्रीलिङ्गानि, नपुंसकलिङ्गानि चेति त्रिविधानि सन्ति । [जसबाट सु आदि गरिएका विभक्तिहरू लाग्दछन् तिनलाई सुबन्तपद भन्दछन्। सुबन्तपद तीन किसिमका हुन्छन्– पुंलिङ्ग, स्त्रीलिङ्ग र नपुंसकलिङ्ग। अव्ययको लिङ्ग हुँदैन । यिनीहरूमा निम्नलिखित विभक्तिहरू लागेका हुन्छन् ।]

१.५.२ *सुब्विभक्तयः*

विभक्तिनाम	एकवचने	द्विवचने	बहुवचने
प्रथमा	सु	औ	जस्
द्वितीया	अम्	औट्	शस्
तृतीया	टा	भ्याम्	भिस्
चतुर्थी	ङे	भ्याम्	भ्यस्
पञ्चमी	ङसि	भ्याम्	भ्यस्
षष्ठी	ङस्	ओस्	आम्
सप्तमी	ङि	ओस्	सुप्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा – रामः (सु), रामौ (औ), रामाः (जस्), रामम् (अम्), रामौ (औट्), रामान् (शस्), रामेण (टा), रामाभ्याम् (भ्याम्), रामैः (भिस्), रामाय (ङे), रामाभ्याम् (भ्याम्), रामेभ्यः (भ्यस्), रामात् (ङसि), रामाभ्याम् (भ्याम्), रामेभ्यः (भ्यस्), रामस्य (ङस्), समयोः (ओस्), रामाणाम् (आम्), रामे (ङि), रामयोः (ओस्), रामेषु (सुप्) ।

स्त्रीत्वविवक्षयां शब्दात् टापि, ङीषि, ङीपि च कृते प्रायेण स्त्रीलिङ्गपदानि जायन्ते । ते च प्रत्ययाः स्त्रीप्रत्यया इति कथ्यन्ते । *[स्त्री जातिलाई बुझाउँदा शब्दबाट टाप्, ङीप्, ङीष् आदि प्रत्यय लगाएर स्त्रीलिङ्गी पद बनाइन्छ ।]*

१. अदन्तात् शब्दात् स्त्रीत्वविवक्षायां टाप् प्रत्ययो भवति । टकारपकारयोर्लोपेन आ इत्यवशिष्यते । *[अकार अन्त्यमा हुने शब्ददेखि स्त्रीजातिलाई बुझाउँदा टाप् प्रत्यय गर्नुपर्छ । टाप् प्रत्ययको टकार र पकारको लोप भई आ मात्र बाँकी रहन्छ ।]* यथा–

कृश–कृशा, पूर्व–पूर्वा, अज – अजा, प्रिय–प्रिया, सर्व–सर्वा, नायक–नायिका, पाचक–पाचिका, नाटक – नाटिका, इत्यादि ।

२. जाति बोधकात्, अदन्तात् शब्दात् परतः स्त्रीयाम् ङीष् भवति । *[अकार अन्त्यमा हुने जातिवाचक शब्ददेखि टाप् नभएर ङीष् हुन्छ ।]* यथा–

सिंह–सिंही, मृग–मृगी, हंस–हंसी, हरिण–हरिणी, मत्स्य–मत्सी, तर निम्नलिखित शब्ददेखि भने ङीष् नभएर टाप् नै हुन्छ – कोकिल–कोकिला, अश्व–अश्वा, शूद्र–शूद्रा, वैश्य–वैश्या, क्षत्रीय–क्षत्रीया ।

३. बहुव्रीहिसमासे शरीरावयववाचकशब्दात् ङीष् प्रत्ययः, टाप्प्रत्ययो वा भवति। *[बहुव्रीहि समास भएको शरीरको अवयववाची शब्दहरूको पछाडि ङीष् वा टाप् दुवै हुन्छ।]* यथा– चन्द्रमुख–चन्द्रमुखा वा चन्द्रमुखी ।

४. नासिकोदरशब्दौ विहाय द्व्यधिकाक्षरशब्देभ्यः स्त्रियां टाब् भवति । *[नासिका र उदर शब्द बाहेक अरू दुईभन्दा बढी अक्षर भएको शब्दसित बहुव्रीहि समासमा टाप् हुन्छ ।]* यथा– सुजघन–सुजघना, चारुदशन–चारुदशना ।

५. ऋकारान्तात् शब्दात् स्त्रीयां ङीष् भवति । *[ऋकारान्त शब्ददेखि पछाडि स्त्रीलिङ्गमा ङीष् हुन्छ ।]* यथा– धातृ–धात्री ।

६. क्तिन्प्रत्ययान्तं विहाय अन्यत्र इकारान्तशब्दात् स्त्रियां ङीष् भवति । *[क्तिन् प्रत्ययलाई छोडेर अरू शब्ददेखि स्त्रीलिङ्गमा ङीष् हुन्छ ।]* यथा– रात्रिः – रात्री । श्रेणिः–श्रेणी ।

७. इन्द्र–वरुण–भव–सर्व–रुद्र–मृड–हिम–अरण्य–यव–यवन–मातुल–आचार्यशब्दात्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परतः ङीप्, आनुक् च भवति । *[इन्द्र वरुण आदि शब्दको पछाडि ङीप् र आनुक् हुन्छ ।]* यथा– इन्द्राणी, वरुणानी, भवानी, सर्वाणि आदि ।

८. रज्जु–धेनु–हनुशब्दान् विहाय उकारान्तात् शब्दात् स्त्रीयां ऊङ् भवति । *[रज्जु–धेनु र हनु शब्दलाई छोडेर अरू उकारान्तशब्ददेखि स्त्रीलिङ्गमा ऊङ् हुन्छ।]* यथा– तनुः–तनू, चञ्चुः–चञ्चू, आदि ।

१.५.३ *तिङन्तपरिचयः*

धातोर्विविधेषु अर्थेषु लकारा जायन्ते । ते च लट्, लिट्, लुंट्, लृट्, लोट्, लेट्, लङ्, लिङ्, लुङ्, लृङ् चेति दश सन्ति । तेषु लेट्लकारस्य प्रयोगो वेदेषु एव भवति । लकारस्थाने तिङ्विभक्तयो भवन्ति । तेषां परिचयोऽधः प्रस्तूयते । *[धातुदेखि विभिन्न अर्थमा विभिन्न लकारहरूको प्रयोग हुन्छ । ती लकारहरू लट्, लिट्, लुट्, लृट्, लोट्, लेट्, लङ्, लिङ्, लुङ् र लृङ् गरी दशवटा छन् । तिनीहरू मध्ये लेट्लकारको प्रयोग वेदमा मात्र हुन्छ । लकारको स्थानमा तिङ्विभक्तिहरू हुन्छन्। तिनीहरूको परिचय तल प्रस्तुत गरिएको छ ।]* -

परस्मैपदे

	एकवचने	द्विवचने	बहुवचने
प्रथमपुरुषे	तिप्	तस्	झि
मध्यमपुरुषे	सिप्	थस्	थ
उत्तमपुरुषे	मिप्	वस्	मस्

आत्मनेपदे

प्रथमपुरुषे	त	आताम्	झ
मध्यमपुरुषे	थास्	आथाम्	ध्वम्
उत्तमपुरुषे	इट्	वहिं	महिङ्

यथा – भवति (तिप्), भवतः (तस्); भवन्ति (झि), भवसि (सिप्), भवथः (थस्), भवथ (थ), भवामि (मिप्), भवावः (वस्), भवामः (मस्), लभते (त), लभेते (आताम्), लभन्ते (झ), लभसे (थास्), लभेथे (आथाम्), लभध्वे (ध्वम्), लभे (इट्), लभावहे (वहि), लभामहे (महिङ्) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वितीयः पाठः

स्त्रीलिङ्गानुशासनम्

२.१ ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः

ऋकारान्तेषु मातृ-दुहितृ-स्वसृ-यातृ-ननान्दृशब्दाः स्त्रियां प्रयुज्यन्ते ।

इयं माता । एषा दुहिता । सा स्वसा । सा याता । इयं ननान्दा ।

२.२ अन्यूप्रत्ययान्तो धातुः

धातोः अनिप्रत्ययान्ता ऊप्रत्ययान्ताश्च शब्दाः स्त्रियां भवन्ति ।

एषा अवनिः । सा सरणिः । इयं तरणिः । एषा धमनिः । सा चमूः ।

२.३ मिन्यन्तः

धातोर्मिप्रत्ययान्ता निप्रत्ययान्ताश्च शब्दाः स्त्रियां प्रयुज्यन्ते ।

इयं भूमिः । सा हानिः ।

२.४ क्तिन्नन्तः

धातोः क्तिन्प्रत्ययान्ताः शब्दाः स्त्रियां भवन्ति ।

इयं कृतिः । एषा मतिः । सा बुद्धिः । असौ गतिः ।

२.५ ईकारान्तश्च

ईकारान्ताः शब्दाः स्त्रियां भवन्ति ।

सा लक्ष्मीः । एषा अवीः । सा तरीः । इयं तन्त्रीः ।

२.६ ऊङाबन्तश्च

ऊङ्प्रत्ययान्ता आप्प्रत्ययान्ताश्च शब्दाः स्त्रियां प्रयुज्यन्ते ।

सा कुरूः । इयं रमा । एषा विद्या ।

२.७ य्वन्तमेकाक्षरम्

ईकारान्ता ऊकारान्ताश्च एकाक्षरयुताः शब्दाः स्त्रियां प्रयुज्यन्ते ।

एषा श्रीः । सा भूः । इयं स्त्री ।

२.८ विंशत्यादिरानवतेः

विंशतितो नवतिपर्यन्ताः शब्दाः स्त्रियां प्रयुज्यन्ते ।

इयं विंशतिः । एषा त्रिंशत् । सा पञ्चाशत् । इयं षष्टिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२.९ *तलन्तः*

तल्प्रत्ययान्ताः शब्दाः स्त्रियां प्रयुज्यन्ते ।

इयं शुक्लता । एषा मानवता । ता देवता । सा ग्रामता ।

२.१० *भाः स्रुक्-स्रग्दिगुष्णिगुपानहः*

भास् – स्रुच् – स्रज् – दिश् – उष्णिष् – उपानह्शब्दाः स्त्रियां भवन्ति ।

इयं भाः। एषा स्रुक् । सा स्रक्। सा दिक् । इयम् उष्णिक् । ते उपानहौ ।

२.११ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. सोदाहरणं निम्नसूत्राणामर्थं लिखत ।

   क) अन्यूप्रत्ययान्तो धातुः ।

   ख) मिन्यन्तः ।

   ग) क्तिन्नन्तः ।

२. विंशत्यादिशब्दानां, तलन्तशब्दानाञ्च ससूत्रं लिङ्गनिर्देशं कुरुत।

३. निम्नपदानां सविशेषणं वाक्येषु प्रयोगं विदधत ।

   श्रीः, मानवता, नदी, चत्वारिंशत्, विद्या ।

४. आबन्त–क्तिन्नन्त– तलन्तेषु प्रत्येकं पञ्चपदानि विलिख्य वाक्येषु प्रयोगं प्रदर्शयत।

५. निम्नशब्दानां प्रथमाविभक्तौ रूपाणि प्रदर्शयत ।

   दुहितृ, चमू, भूमि, लक्ष्मी, स्रज् ।

२.१२ *सिद्धरूपाणि लिखत ।*

रमा+सु । रमा + औ । रमा +जस् । रमा + अम् । रमा + औट् । रमा + शस् । रमा + टा । रमा + भ्याम् । रमा + भिस् । रमा + ङे । रमा + भ्यस् । रमा+ ङसि । रमा + ङस् । रमा + ओस् । रमा + आम् । रमा + ङि । रमा + सुप् ।

नदी +सु । नदी + औ । नदी +जस् । नदी + अम् । नदी + औट् । नदी + शस् । नदी + टा । नदी + भ्याम् । नदी + भिस् । नदी + ङे । नदी + भ्यस् । नदी+ ङसि । नदी + ङस् । नदी + ओस् । नदी + आम् । नदी + ङि । नदी + सुप् ।

स्त्री +सु । स्त्री+औ । स्त्री + जस् । स्त्री + अम् । स्त्री + औट् । स्त्री + शस्। स्त्री + टा । स्त्री + भ्याम् । स्त्री + भिस् । स्त्री + ङे । स्त्री + भ्यस् । स्त्री + ङसि। स्त्री + ङस् । स्त्री + ओस् । स्त्री + आम् । स्त्री + ङि । स्त्री + सुप् ।

भू +सु । भू + औ । भू + जस् । भू + अम् । भू + औट् । भू + शस् । भू+ टा । भू + भ्याम् । भू + भिस् । भू + ङे । भू + भ्यस् । भू + ङसि । भू + ङस्। भू + ओस् । भू + आम् । भू + ङि । भू + सुप् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मातृ + सु । मातृ + औ । मातृ + जस् । मातृ + अम् । मातृ + औट् । मातृ+ शस् । मातृ+टा । मातृ + भ्याम् । मातृ + भिस् । मातृ + ङे । मातृ + भ्यस् । मातृ+ ङसि । मातृ + ङस् । मातृ + ओस् । मातृ + आम् । मातृ + ङि । मातृ + सुप् ।

गो + सु । गो + औ । गो + जस् । गो + अम् । गो + औट् । गो + शस् । गो + टा । गो + भ्याम् । गो + भिस् । गो + ङे । गो + भ्यस् । गो + ङसि । गो+ ङस् । गो + ओस् । गो + आम् । गो + ङि । गो + सुप् ।

नौ + सु । नौ + औ । नौ + जस् । नौ + अम् । नौ + औट् । नौ + शस् । नौ + टा । नौ + भ्याम् । नौ + भिस् । नौ + ङे । नौ + भ्यस् । नौ + ङसि । नौ+ ङस् । नौ + ओस् । नौ + आम् । नौ + ङि । नौ + सुप् ।

गिर् + सु । गिर् + औ । गिर् + जस् । गिर् + अम् । गिर् + औट् । गिर् + शस् । गिर् + टा । गिर् + भ्याम् । गिर् + भिस् । गिर् + ङे । गिर् + भ्यस् । गिर् + ङसि । गिर् + ङस् । गिर् + ओस् । गिर् + आम् । गिर् + ङि । गिर् + सुप् ।

दिश्+सु । दिश् + औ । दिश् + जस् । दिश् + अम् । दिश् + औट् । दिश्+ शस् । दिश्+टा । दिश्+भ्याम् । दिश् + भिस् । दिश् + ङे । दिश् + भ्यस् । दिश्+ ङसि । दिश् + ङस् । दिश् + ओस् । दिश् + आम् । दिश् + ङि । दिश् + सुप् ।

दिव् + सु । दिव् + औ । दिव् + जस् । दिव् + अम् । दिव् + औट् । दिव्+ शस् । दिव् + टा । दिव् + भ्याम् । दिव् + भिस् । दिव् + ङे । दिव् + भ्यस् । दिव्+ङसि । दिव्+ङस् । दिव् + ओस् । दिव् + आम् । दिव् + ङि । दिव् + सुप्।

सीमन् + सु । सीमन् + औ । सीमन् + जस् । सीमन् + अम् । सीमन् + औट् । सीमन् + शस् । सीमन् + टा । सीमन् + भ्याम् । सीमन् + भिस् । सीमन् + ङे । सीमन् + भ्यस् । सीमन् + ङसि । सीमन् + ङस् । सीमन् + ओस् । सीमन्+ आम् । सीमन् + ङि । सीमन् + सुप् ।

अप् + जस् । अप् + शस् । अप् + भिस् । अप् + भ्यस् । अप् + आम् । अप् + सुप् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तृतीयः पाठः

पुँल्लिङ्गानुशासनम्

३.१ **घञबन्तः**

धातोर्घञ्प्रत्ययान्ता अप्प्रत्ययान्ताश्च शब्दाः पुँल्लिङ्गे प्रयुज्यन्ते ।

स विभागः । अयं पाकः । स त्यागः । अयं करः । एष गरः ।

३.२ **घाजन्तश्च**

धातोर्घप्रत्ययान्ता अच्- प्रत्ययान्ताश्च शब्दाः पुँल्लिङ्गे प्रयुज्यन्ते ।

अयं विस्तरः । एष गोचरः । अयं चयः । स जयः ।

३.३ **भयलिङ्गभगपदानि नपुंसके**

घप्रत्ययान्तेषु अच्प्रत्ययान्तेषु च मध्ये भय-लिङ्ग-भग-पदशब्दा नपुंसके प्रयुज्यन्ते ।

तद् भयम् । एतद् लिङ्गम् । इदं भगम् । इदं पदम् ।

३.४ **नङन्तः**

धातोर्नङ्प्रत्ययान्ताः शब्दाः पुँल्लिङ्गे प्रयुज्यन्ते ।

अयं यज्ञः । एष यत्नः । स प्रश्नः ।

३.५ **क्यन्तो घुः**

घुसंज्ञकेभ्यो धातुभ्यः (दा-धारूपधातुभ्यः) किप्रत्ययविधानेन निष्पन्नाः शब्दाः पुँल्लिङ्गे प्रयुज्यन्ते ।

अयं निधिः । एष उदधिः । स आधिः । अयं जलधिः ।

३.६ **देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि**

देव-असुर-आत्मा-स्वर्ग-गिरि-समुद्र-नख-केश-दन्त-स्तन-भुज-कण्ठ-खड्ग-शर-पङ्कानां वाचकाः शब्दाः पुँल्लिङ्गे प्रयुज्यन्ते ।

इमे देवाः । एते असुराः । अयम् आत्मा । स स्वर्गः । अयं पर्वतः । एष समुद्रः । स नखः । एते केशाः । इमे दन्ताः । तौ कुचौ । तौ भुजौ । अयं कण्ठः । एष खड्गः । स शरः । अयं पङ्कः ।

एवमेव तेषामर्थानां वाचका अन्येऽपि शब्दा पुँल्लिङ्गे प्रयुज्यन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इमे अमराः । एते दैत्याः । एष नाकः । अयं हिमालयः । एष जलधिः । तौ स्तनौ, इत्यादयः ।

३.७ त्रिविष्टपत्रिभुवने नपुंसके

स्वर्गस्य वाचकौ त्रिविष्टप-त्रिभुवनशब्दौ नपुंसके प्रयुज्येते

इदं त्रिविष्टपम् । तत् त्रिभुवनम् ।

३.८ द्यौः स्त्रियाम्

स्वर्गस्य वाचकावेव द्यो-दिव्शब्दौ स्त्रियां प्रयुज्येते।

इयं द्यौः । सा द्यौः ।

(उभयोः शब्दयोः सुविभक्तौ समानं रूपं भवतीति ज्ञेयम्)

३.९ क्रतुपुरुषकपोलगुल्फमेघाभिधानानि

क्रतु (यज्ञः)-पुरुष-कपोल-गुल्फ-मेघार्थानां वाचकाः शब्दाः पुँल्लिङ्गे प्रयुज्यन्ते।

अयं क्रतुः । एष पुरुषः । अयं कपोलः । स गुल्फः । असौ मेघः ।

एवमेव एतेषां पर्यायशब्दा अपि पुँल्लिङ्गे प्रयुज्यन्ते ।

अयम् अध्वरः । असौ नरः । एष गण्डः । स प्रपदः । स नीरदः ।

३.१० अभ्रं नपुंसकम्

मेघस्य वाचकोऽभ्रशब्दो नपुंसके प्रयुज्यते । *एतद् अभ्रम् ।*

३.११ उकारान्तः

उकारान्ताः शब्दाः पुँल्लिङ्गे प्रयुज्यन्ते ।

अयं प्रभुः । एष इक्षुः । स भानुः । अयं रिपुः ।

३.१२ धेनुरज्जुकुहुसरयुतनुरेणुप्रियङ्गवः स्त्रियाम्

उकारान्तेषु धेनु-रज्जु-कुहुः-सरयु-तनु-रेणु-प्रियङ्गुशब्दाः स्त्रियां प्रयुज्यन्ते।

इयं धेनुः। एषा रज्जुः। सा कुहुः । इयं सरयुः । एषा तनुः । सा रेणुः । सा प्रियङ्गुः ।

३.१३ श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके ।

उकारान्तेषु श्मश्रु-जानु-वसु-स्वादु-अश्रु-जतु-त्रपु-तालुशब्दा नपुंसके प्रयुज्यन्ते।

इदं श्मश्रु । इमे जानुनी । तद् वसु । एतत् स्वादु । इमानि अश्रूणि । इदं जतु। एतत् त्रपु । इदं तालु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३.१४ **रुत्वन्तः**

रुकारान्तास्तुकारान्ताश्च शब्दाः पुँल्लिङ्गे प्रयुज्यन्ते ।

अयं मेरुः । स सेतुः ।

३.१५ **दारुकशेरुजतुवस्तुमस्तूनि नपुंसके ।**

रुत्वन्ता दारु-कशेरु-जतु-वस्तु-मस्तुशब्दा नपुंसके प्रयुज्यन्ते ।

इदं दारु । एतत् कशेरु । तद् जतु । इदं वस्तु ।

३.१६ **कोपधः**

अकारान्तेषु कोपधशब्दाः पुँल्लिङ्गे प्रयुज्यन्ते ।

एष स्तवकः । अयं कल्कः । असौ घोटकः ।

३.१७ **चिबुकादीनि नपुंसके**

अकारान्तकोपधेषु चिबुक-शालूक-प्रातिपदिक-अंशुक-उल्मुकशब्दा नपुंसके प्रयुज्यन्ते ।

एतत् चिबुकम् । इदं शालूकम् । इदं प्रातिपदिकम् । इदम् अंशुकम्। एतानि उल्मुकानि ।

३.१८ **टोपधः**

अकारान्तेषु टोपधशब्दाः पुँल्लिङ्गे प्रयुज्यन्ते ।

अयं घटः । एष पटः । असौ नटः ।

३.१९ **किरीटादीनि नपुंसके**

अकारान्तटोपधेषु किरीट-मुकुट-ललाट-वट-वीट-शृङ्गाट-कराट-लोष्टशब्दा नपुंसके प्रयुज्यन्ते ।

इदं किरीटम् । एतन् मुकुटम् । इदं ललाटम् । तत् लोष्टम् ।

३.२० **णोपधः**

अकारान्तेषु णोपधशब्दाः पुँल्लिङ्गे भवन्ति ।

स गुणः । असौ पाषाणः । एष गणः ।

३.२१ **ऋणलवणपर्णतोरणरणोष्णानि नपुंसके**

अकारान्तणोपधेषु ऋण-लवण-पर्ण-तोरण-रण-उष्णशब्दा नपुंसके भवन्ति।

तद् ऋणम् । इदं लवणम् । एतत् पर्णम् । तत् तोरणम् । इदं रणम्। एतद् उष्णम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३.२२ थोपधः

अकारान्तेषु थोपधशब्दाः पुँल्लिङ्गे प्रयुज्यन्ते ।

अयं रथः । एष यूथः ।

३.२३ नोपधः

अकारान्तेषु नोपधशब्दाः पुँल्लिङ्गे भवन्ति ।

अयम् इनः । एष फेनः ।

३.२४ जघनादीनि नपुंसके

अकारान्तनोपधेषु जघन–अजिन–तुहिन–कानन–वन–वृजिन–विपिन–वेतन–शासन–सोपान–मिथुन–श्मशान–रत्न–निम्न–चिह्नशब्दा नपुंसके भवन्ति।

एतद् जघनम् । तद् अजिनम् । तत् तुहिनम् । इदं काननम् । एवमेव– वनम्। विपिनम् । वृजिनम् । वेतनम् । शासनम् । सोपानम् । मिथुनम् । श्मशानम् । रत्नम्। निम्नम् । चिह्नम् ।

३.२५ पोपधः

अकारान्तेषु पोपधशब्दाः पुंल्लिङ्गे प्रयुज्यन्ते ।

अयं यूपः । एष दीपः । असौ सर्पः । स पर्पः ।

३.२६ पापादीनि नपुंसके

अकारान्तपोपधेषु पाप–रूप–उडुप–तल्प–शिल्प–पुष्प–समीप–अन्तरीपशब्दा नपुंसके भवन्ति ।

एतत् पापम् । तद् रूपम् । इदम् उडुपम् । एवमेव – तल्पम्, शिल्पम्, पुष्पम्, समीपम्, अन्तरीपम् ।

३.२७ मोपधः

अकारान्तेषु मोपधशब्दाः पुँल्लिङ्गे प्रयुज्यन्ते ।

अयं सोमः । एष भीमः । स धर्मः ।

३.२८ सङ्ग्रामादीनि नपुंसके च

अकारान्तमोपधेषु सङ्ग्राम–दाडिम–कुसुम–आश्रम–क्षेम–क्षौम–होम–उद्दामशब्दाः पुँल्लिङ्गे नपुंसके च प्रयुज्यन्ते ।

अयं सङ्ग्रामः, इदं सङ्ग्रामम् । एष दाडिमः । एतद् दाडिमम् । एवमेव – कुसुमः, कुसुमम् । आश्रमः, आश्रमम् । क्षेमः, क्षेमम् । क्षौमः, क्षौमम् । होमः, होमम् । उद्दामः, उद्दामम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३.२९ योपधः

अकारान्तेषु योपधशब्दाः पुँल्लिङ्गे भवन्ति ।

अयं समयः । एष हयः ।

३.३० किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके

अकारान्तयोपधेषु किसलय-हृदय-इन्द्रिय-उत्तरीयशब्दा नपुंसके प्रयुज्यन्ते ।

इदं किसलयम् । एतद् हृदयम् । इदम् इन्द्रियम् । तद् उत्तरीयम् ।

३.३१ गोमयकषायमलयान्वयाव्ययानि नपुंसके च

अकारान्तयोपधेषु गोमय-कषाय-मलय-अन्वय- अव्ययशब्दाः पुँल्लिङ्गे नपुंसके च प्रयुज्यन्ते ।

अयं गोमयः, इदं गोमयम् । एष कषायः, एतत् कषायम् । एवमेव- मलयः, मलयम् । अन्वयः, अन्वयम् । अव्ययः, अव्ययम् ।

३.३२ रोपधः

अकारान्तेषु रोपधशब्दा पुँल्लिङ्गे प्रयुज्यन्ते ।

अयं क्षुरः । एष अङ्कुरः । अयं वीरः । एष शूरः ।

३.३३ द्वारादीनि नपुंसके

अकारान्तरोपधेषु द्वार-तक्र-तीर-दूर-कृच्छ्र-रन्ध्र-केयूर-केदार-उदर-अजस्र-शरीर-कन्दर-पञ्जर-जठर-वैर-चामर-गह्वर-कुटीर-कुलीर-चत्वर-नीर-अम्बर-शिशिर-नक्षत्र-क्षेत्र-मित्र-कलत्र-चित्र-सूत्र-वक्त्र-नेत्र-शस्त्र-शास्त्र-वस्त्र-पत्र-पात्र-छत्रशब्दा नपुंसके प्रयुज्यन्ते ।

इदं द्वारम् । एतद् तक्रम् । तत् तीरम् । एवमेव - दूरम्, कृच्छ्रम्, रन्ध्रम्, केयूरम्, केदारम्, उदरम्, अजस्रम्, इत्यादीनि ।

३.३४ षोपधः

अकारान्तेषु षोपधशब्दाः पुँल्लिङ्गे प्रयुज्यन्ते ।

अयं वृषः । एष वृक्षः ।

३.३५ शिरीषादीनि नपुंसके

अकारान्तषोपधेषु शिरीष-पीयूष-पुरीष-किल्विषशब्दा नपुंसके भवन्ति।

इदं शिरीषम् । एतत् पीयूषम् । तत् पुरीषम् । इदं किल्विषम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३.३६ *सोपधः*

अकारान्तेषु सोपधशब्दाः पुँल्लिङ्गे प्रयुज्यन्ते ।

अयं वत्सः । एष महानसः । स वायसः ।

३.३७ *पनसबिसबुससाहसानि नपुंसके*

अकारान्तसोपधेषु पनस-बिस-बुस-साहसशब्दा नपुंसके प्रयुज्यन्ते ।

३.३८ *चमसादीनि नपुंसके च*

अकारान्तसोपधेषु - चमस-अंस-रस-उपवास-कार्पास-मांसशब्दाः पुँल्लिङ्गे नपुंसके च प्रयुज्यन्ते ।

अयं चमसः, इदं चमसम् । एष अंसः, एतद् असम् । अयं रसः, इदं रसम्। स उपवासः, तद् उपवासम् । स कार्पासः, तत् कार्पासम् । अयं मांसः, इदं मांसम्।

३.३९ *रश्मिदिवसाभिधानानि*

रश्मिदिवसयोर्वाचकाः शब्दाः पुँल्लिङ्गे प्रयुज्यन्ते ।

अयं रश्मिः, अयं मयूखः । स दिवसः, स घस्रः ।

दिवसाभिधायिनौ दिन-अहन्शब्दौ नपुंसके प्रयुज्येते । तद् दिनम्। तद् अहः। अहन्शब्दस्य रूपाणि प्रथमविभक्तौ अहः, अहनी, अहानि इति जायन्ते ।

३.४० *मानाभिधानानि*

परिमाणार्थस्य वाचकाः शब्दाः पुँल्लिङ्गे प्रयुज्यन्ते ।

अयं द्रोणः । अयं कुडवः । अयं प्रस्थः ।

३.४१ *खारीमानिके स्त्रियाम्*

परिमाणार्थस्य वाचकौ खारी-मानिकाशब्दौ स्त्रियां प्रयुज्येते ।

इयं खारी । इयं मानिका ।

३.४२ *दाराक्षतलाजासूनां बहुत्वं च*

दार-अक्षत-लाज-असुशब्दाः पुँल्लिङ्गे बहुवचन एव प्रयुज्यन्ते ।

इमे दाराः । एते अक्षताः । ते लाजाः । ते असवः ।

३.४३ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१ अधो लिखितसूत्राणां सोदाहरणमर्थं लिखत

क) रश्मिदिवसाभिधानानि ख) षोपधः

ग) दाराक्षतलाजासूनां बहुत्वं च । घ) टोपधः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२ अंशुक-यूप-सङ्ग्राम-वृक्ष-पीयूष-वायस-कार्पास-मांसशब्दाः कस्मिन् लिङ्गे प्रयुज्यन्ते सूत्रनिर्देशपूर्वकं लिखत ।

३ निम्नाङ्कितपदानां सविशेषणं वाक्येषु प्रयोगं कुरुत ।
वृषः, पुरीषम्, मयूखः, खारी, असवः ।

४ निम्नाङ्कितसूत्राणां प्रत्येकं पञ्च उदाहरणानि लिखत ।
क) सोपधः ख) मानाभिधानानि
ग) रश्मिदिवसाभिधानानि

५ अधोलिखितानां प्रातिपदिकानां प्रथमविभक्तौ रूपाणि लिखत
शरीर, खारी, अहन्, मानिका, असु ।

३.४४ *सिद्धरूपाणि लिखत ।*

कृष्ण + सु । कृष्ण + औ । कृष्ण + जस् । कृष्ण + अम् । कृष्ण + औट्। कृष्ण + शस् । कृष्ण + टा । कृष्ण + भ्याम् । कृष्ण + भिस् । कृष्ण + ङे । कृष्ण+ भ्यस् । कृष्ण + ङसि । कृष्ण + ङस् । कृष्ण + ओस् । कृष्ण + आम् । कृष्ण + ङि । कृष्ण + सुप् ।

हरि + सु । हरि + औ । हरि + जस् । हरि + अम् । हरि + औट् । हरि + शस् । हरि + टा । हरि + भ्याम् । हरि + भिस् । हरि + ङे । हरि + भ्यस् । हरि + ङसि । हरि + ङस् । हरि + ओस् । हरि + आम् । हरि + ङि । हरि + सुप् ।

सुधी + सु । सुधी + औ । सुधी + जस् । सुधी + अम् । सुधी + औट् । सुधी + शस् । सुधी + टा । सुधी + भ्याम् । सुधी + भिस् । सुधी + ङे । सुधी + भ्यस् । सुधी + ङसि । सुधी + ङस् । सुधी + ओस् । सुधी + आम् । सुधी + ङि। सुधी + सुप् ।

भानु + सु । भानु + औ । भानु + जस् । भानु + अम् । भानु + औट् । भानु+ शस् । भानु + टा । भानु + भ्याम् । भानु + भिस् । भानु + ङे । भानु + भ्यस् । भानु + ङसि । भानु + ङस् । भानु + ओस् । भानु + आम् । भानु + ङि। भानु + सुप् ।

नृ + सु । नृ + औ । नृ + जस् । नृ + अम् । नृ + औट् । नृ + शस् । नृ+ टा । नृ + भ्याम् । नृ + भिस् । नृ + ङे । नृ + भ्यस् । नृ + ङसि । नृ + ङस् । नृ + ओस् । नृ + आम् । नृ + ङि । नृ + सुप् ।

धातृ + सु । धातृ + औ । धातृ + जस् । धातृ + अम् । धातृ + औट् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धातृ+ शस् । धातृ + टा । धातृ + भ्याम् । धातृ + भिस् । धातृ + ङे । धातृ + भ्यस् । धातृ + ङसि । धातृ + ङस् । धातृ + ओस् । धातृ + आम् । धातृ + ङि। धातृ + सुप् ।

पितृ + सु । पितृ + औ । पितृ + जस् । पितृ + अम् । पितृ + औट् । पितृ+ शस् । पितृ + टा । पितृ + भ्याम् । पितृ + भिस् । पितृ + ङे । पितृ + भ्यस् । पितृ+ ङसि । पितृ + ङस् । पितृ + ओस् । पितृ + आम् । पितृ + ङि । पितृ + सुप् ।

पथिन् + सु । पथिन् + औ । पथिन्+जस् । पथिन् + अम् । पथिन् + औट्। पथिन् + शस् । पथिन् + टा । पथिन् + भ्याम् । पथिन् + भिस् । पथिन् + ङे । पथिन् + भ्यस् । पथिन् + ङसि । पथिन् + ङस् । पथिन् + ओस् । पथिन् + आम्। पथिन् + ङि । पथिन् + सुप् ।

वणिज् + सु । वणिज् + औ । वणिज् + जस् । वणिज् + अम् । वणिज् + औट् । वणिज् + शस् । वणिज् + टा । वणिज् + भ्याम् । वणिज् + भिस् । वणिज्+ ङे । वणिज्+ भ्यस् । वणिज् + ङसि । वणिज् + ङस् । वणिज् + ओस् । वणिज्+ आम् । वणिज् + ङि । वणिज् + सुप् ।

भवत् + सु । भवत् + औ । भवत् + जस् । भवत् + अम् । भवत् + औट्। भवत्+ शस् । भवत् + टा । भवत् + भ्याम् । भवत् + भिस् । भवत् + ङे । भवत्+ भ्यस् । भवत् + ङसि । भवत् + ङस् । भवत् + ओस् । भवत् + आम् । भवत् + ङि । भवत् + सुप् ।

यावत् + सु । यावत् + औ । यावत् + जस् । यावत् + अम् । यावत् + औट्। यावत् + शस् । यावत् + टा । यावत् + भ्याम् । यावत् + भिस् । यावत् + ङे । यावत् + भ्यस् । यावत् + ङसि । यावत् + ङस् । यावत् + ओस् । यावत् + आम् । यावत् + ङि । यावत् + सुप् ।

गच्छत् + सु । गच्छत् + औ । गच्छत् + जस् । गच्छत् + अम् । गच्छत् + औट् । गच्छत् + शस् । गच्छत् + टा । गच्छत् + भ्याम् । गच्छत् + भिस् । गच्छत्+ ङे । गच्छत्+ भ्यस् । गच्छत् + ङसि । गच्छत् + ङस् । गच्छत् + ओस् । गच्छत्+ आम् । गच्छत् + ङि । गच्छत् + सुप् ।

ब्रह्मन् + सु । ब्रह्मन् + औ । ब्रह्मन् + जस् । ब्रह्मन् + अम् । ब्रह्मन् + औट्। ब्रह्मन् + शस् । ब्रह्मन् + टा । ब्रह्मन् + भ्याम् । ब्रह्मन् + भिस् । ब्रह्मन् + ङे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४०७१ – १६ पाँच

ब्रह्मन् + भ्यस् । ब्रह्मन् + ङसि । ब्रह्मन् + ङस् । ब्रह्मन् + ओस् । ब्रह्मन् + आम्। ब्रह्मन् + ङि । ब्रह्मन् + सुप् ।

राजन् + सु । राजन् + औ । राजन् + जस् । राजन् + अम् । राजन् + औट्। राजन् + शस् । राजन्+ टा । राजन् + भ्याम् । राजन् + भिस् । राजन् + ङे । राजन्+ भ्यस् । राजन् + ङसि । राजन् + ङस् । राजन् + ओस् । राजन् + आम् । राजन् + ङि । राजन् + सुप् ।

युवन् + सु । युवन् + औ । युवन् + जस् । युवन् + अम् । युवन् + औट्। युवन् + शस् । युवन् + टा । युवन् + भ्याम् । युवन् + भिस् । युवन् + ङे । युवन्+ भ्यस् । युवन् + ङसि । युवन् + ङस् । युवन् + ओस् । युवन् + आम् । युवन् + ङि । युवन् + सुप् ।

दण्डिन् + सु । दण्डिन् + औ । दण्डिन् + जस् । दण्डिन् + अम् । दण्डिन्+ औट् । दण्डिन् + शस् । दण्डिन् + टा । दण्डिन् + भ्याम् । दण्डिन् + भिस् । दण्डिन् + ङे । दण्डिन् + भ्यस् । दण्डिन् + ङसि । दण्डिन् + ङस् । दण्डिन् + ओस् । दण्डिन् + आम् । दण्डिन् + ङि । दण्डिन् + सुप् ।

वेधस् + सु । वेधस् + औ । वेधस् + जस् । वेधस् + अम् । वेधस् + औट्। वेधस् + शस् । वेधस् + टा । वेधस् + भ्याम् । वेधस् + भिस् । वेधस् + ङे । वेधस् + भ्यस् । वेधस् + ङसि । वेधस् + ङस् । वेधस् + ओस् । वेधस् + आम् । वेधस् + ङि । वेधस् + सुप् ।

विद्वस् + सु । विद्वस् + औ । विद्वस् + जस् । विद्वस् + अम् । विद्वस् + औट् । विद्वस् + शस् । विद्वस् + टा । विद्वस् + भ्याम् । विद्वस् + भिस् । विद्वस् + ङे । विद्वस् + भ्यस् । विद्वस् + ङसि । विद्वस् + ङस् । विद्वस् + ओस् । विद्वस्+ आम् । विद्वस् + ङि । विद्वस् + सुप् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्थः पाठः

नपुंसकलिङ्गानुशासनम्

४.१ भावे ल्युडन्तः

धातोर्भावे (क्रियायाम्) ल्युट्प्रत्ययान्ताः शब्दा नपुंसके प्रयुज्यन्ते।
एतद् हसनम् । तद् गमनम् । इदं पचनम् ।
भावप्रत्ययान्ताः शब्दा एकवचन एव प्रयुज्यन्ते ।

४.२ निष्ठा च

धातोर्भावे निष्ठा (क्त) प्रत्ययान्ताः शब्दा अपि नपुंसके प्रयुज्यन्ते ।
एतद् हसितम् । तद् गीतम् । एवमेव - जल्पितम् । पतितम् ।

४.३ त्वष्यञौ तद्धितौ

भावे त्वष्यञ्तद्धितप्रत्ययान्ताः शब्दा नपुंसके प्रयुज्यन्ते ।
इदं शुक्लत्वम् । तत् शौक्ल्यम् ।
ष्यञ्प्रत्ययान्ता नपुंसकमतिरिच्य स्त्रियामपि प्रयुज्यन्ते ।
एतत् चातुर्यम्, एषा चातुरी । एतद् औचित्यम्, एषा औचिती ।

४.४ यद्यढग्यगञण्वुञ्छाश्च भावकर्मणि

भावे कर्मणि च यद्-य-ढक्-यक्-अञ्-अण्-वुञ्-छप्रत्ययान्ताः शब्दा नपुंसके प्रयुज्यन्ते ।

स्तेनस्य भावः कर्म वा = स्तेयम्
सख्युर्भावः कर्म वा = सख्यम्
कपेर्भावः कर्म वा = कापेयम्
अधिपतेर्भावः कर्म वा = आधिपत्यम्
पुरोहितस्य भावः कर्म वा = पौरोहित्यम्

४.५ द्वन्द्वैकत्वम्

द्वन्द्वसमासेन निष्पन्ना एकवद्भावविशिष्टाः शब्दा नपुंसके प्रयुज्यन्ते ।
एतत् पाणिपादम् । इदं वाक्त्वचम् । इदम् अहिनकुलम् । तद् गोव्याघ्रम् ।

४.६ मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि ।

मुख-नयन-लोह-वन-मांस-रुधिर-कार्मुक-विवर-जल-हल-धन-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अन्नाभिधायिनः शब्दा नपुंसके प्रयुज्यन्ते ।

इदं मुखम् । एते नयने । तत् लोहम् । एवमेव – वनम्, मांसम्, रुधिरम्, कार्मुकम्, विवरम्, जलम्, हलम्, धनम्, अन्नम् ।

एवमेतैषां पर्यायशब्दा अपि नपुंसके भवन्ति –

इदम् आननम् । एते लोचने ।

४.७ *शतादिः सङ्ख्या*

शतादिसङ्ख्याशब्दा नपुंसके प्रयुज्यन्ते ।

इदं शतम् । एतत् सहस्रम् । तद् लक्षम् ।

४.८ *असन्तो द्व्यच्कः*

असन्तेषु द्व्यच्काः शब्दा नपुंसके प्रयुज्यन्ते ।

इदं मनः । तद् यशः । एतत् तपः ।

असन्तशब्दानां नपुंसकलिङ्गे प्रथमविभक्तौ 'मनः, मनसी, मनांसि' इत्येवं विधानि रूपाणि जायन्ते ।

४.९ *त्रन्नन्तः*

त्रन्प्रत्ययान्ताः शब्दा नपुंसके प्रयुज्यन्ते ।

इदं छत्रम् । एतानि पत्राणि ।

४.१० *निम्नप्रश्नानामुत्तराणि लिखत ।*

१ अधो लिखितसूत्राणां सोदाहरणमर्थं लिखत

क) असन्तो द्व्यच्कः   ख) त्रन्नन्तः

ग) शतादिः सङ्ख्याः   घ) द्वन्द्वैकत्वम्

२ स्तेय-नयन-मुख-सख्य-यशस्तप-सहस्र-शब्दाः कस्मिन् लिङ्गे प्रयुज्यन्ते सूत्रनिर्देशपूर्वकं लिखत ।

४.११ *सिद्धरूपाणि लिखत ।*

फल + सु । फल + औ । फल + जस् । फल + अम् । फल + औट् । फल + शस् । फल + टा । फल + भ्याम् । फल + भिस् । फल + ङे । फल + भ्यस् । फल + ङसि । फल + ङस् । फल + ओस् । फल + आम् । फल + ङि। फल + सुप् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सानु + सु । सानु + औ । सानु + जस् । सानु + अम् । सानु + औट् । सानु+ शस् । सानु + टा । सानु + भ्याम् । सानु + भिस् । सानु + ङे । सानु + भ्यस् । सानु + ङसि । सानु + ङस् । सानु + ओस् । सानु + आम् । सानु + ङि। सानु + सुप् ।

मनस् + सु । मनस् + औ । मनस् + जस् । मनस् + अम् । मनस् + औट्। मनस् + शस् । मनस् + टा । मनस् + भ्याम् । मनस् + भिस् । मनस् + ङे । मनस् + भ्यस् । मनस् + ङसि । मनस् + ङस् । मनस् + ओस् । मनस् + आम्। मनस् + ङि । मनस् + सुप् ।

अहन् + सु । अहन् + औ । अहन् + जस् । अहन् + अम् । अहन् + औट्। अहन् + शस् । अहन् + टा । अहन् + भ्याम् । अहन् + भिस् । अहन् + ङे । अहन् + भ्यस् । अहन् + ङसि । अहन् + ङस् । अहन् + ओस् । अहन् + आम्। अहन् + ङि । अहन् + सुप् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमः पाठः

अवशिष्टलिङ्गम्

५.१ *अव्ययं कतियुष्मदस्मदः*

अव्ययशब्दानां कति-युष्मद्-अस्मत्शब्दानाञ्च किमपि विशेषं लिङ्गं न भवति। अर्थात् लिङ्गगतविशेषकार्येण विहीनाः सन्तः सर्वत्र समानरूपेण प्रयुज्यन्ते । यथा–

उच्चैः पर्वतः । उच्चैः हिमम् । उच्चैः नगरी । कति पुरुषाः । कति बालिका। कति पत्राणि । त्वं छात्रः । त्वं स्त्री । त्वं शरीरम् । अहं रामः । अहं गौरी । अहं छत्रम् ।

५.२ **ष्णान्ता सङ्ख्या**

षान्ता नान्ताश्च सङ्ख्यावाचकाः शब्दा लिङ्गविशेषरहिता भवन्ति ।

षट् पुमांसः । षट् स्त्रियः । षट् कुलानि । पञ्च छात्राः । पञ्च नद्यः। पञ्च इन्द्रियाणि।

५.३ **गुणवचनञ्च**

गुणवचनाः शब्दा विशेष्यलिङ्गा भवन्ति ।

शुक्लः पटः । शुक्ला शाटी । शुक्लं वस्त्रम् ।

५.४ **कृत्याश्च**

कृत्यप्रत्ययान्ताः शब्दा विशेष्यलिङ्गा भवन्ति ।

धार्यः पटः । धार्या शाटी । धार्यं वस्त्रम् ।

५.५ **करणाधिकरणयोर्ल्युट् च**

करणेऽधिकरणे च विहिता ल्युट्प्रत्ययान्ताः शब्दा विशेष्यलिङ्गा भवन्ति ।

इध्मप्रव्रश्चनः कुठारः । गोदोहनी स्थाली ।

५.६ **सर्वादीनि सर्वनामानि**

सर्वादिगणपठिताः सर्वनामशब्दा विशेष्यलिङ्गा भवन्ति ।

सर्वे मनुष्याः । सर्वाः नार्यः । सर्वं जलम् ।

५.७ **निम्नप्रश्नानामुत्तराणि लिखत ।**

१. अधोलिखितसूत्राणां सोदाहरणमर्थं लिखत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क) सर्वादीनि सर्वनामानि (ख) करणाधिकरणयोर्ल्युट् च

ग) कृत्याश्च

२. कति-युष्मद्-अस्मत् शब्दानां विशेषं लिङ्गं न भवतीति उदाहरणैः स्पष्टं कुरुत।

५.८ *त्रिष्वेव लिङ्गेषु सिद्धरूपाणि लिखत।*

सर्व + सु। सर्व + औ। सर्व + जस्। सर्व + अम्। सर्व + औट्। सर्व+ शस्। सर्व+ टा। सर्व+ भ्याम्। सर्व + भिस्। सर्व + ङे। सर्व + भ्यस्। सर्व+ ङसि। सर्व + ङस्। सर्व + ओस्। सर्व + आम्। सर्व + ङि। सर्व + सुप्।

प्रथम + सु। प्रथम + औ। प्रथम + जस्। प्रथम + अम्। प्रथम + औट्। प्रथम + शस्। प्रथम + टा। प्रथम + भ्याम्। प्रथम + भिस्। प्रथम + ङे। प्रथम + भ्यस्। प्रथम + ङसि। प्रथम + ङस्। प्रथम + ओस्। प्रथम + आम्। प्रथम + ङि। प्रथम + सुप्।

द्वितीय + सु। द्वितीय + औ। द्वितीय + जस्। द्वितीय + अम्। द्वितीय + औट्। द्वितीय+ शस्। द्वितीय + टा। द्वितीय + भ्याम्। द्वितीय + भिस्। द्वितीय+ ङे। द्वितीय+ भ्यस्। द्वितीय + ङसि। द्वितीय + ङस्। द्वितीय + ओस्। द्वितीय+ आम्। द्वितीय + ङि। द्वितीय + सुप्।

अन्यतर+ सु। अन्यतर+ औ। अन्यतर + जस्। अन्यतर+ अम्। अन्यतर+ औट्। अन्यतर + शस्। अन्यतर + टा। अन्यतर + भ्याम्। अन्यतर+ भिस्। अन्यतर + ङे। अन्यतर + भ्यस्। अन्यतर + ङसि। अन्यतर + ङस्। अन्यतर+ ओस्। अन्यतर + आम्। अन्यतर + ङि। अन्यतर + सुप्।

कतम + सु। कतम + औ। कतम + जस्। कतम + अम्। कतम + औट्। कतम + शस्। कतम + टा। कतम + भ्याम्। कतम + भिस्। कतम + ङे। कतम + भ्यस्। कतम + ङसि। कतम + ङस्। कतम + ओस्। कतम + आम्। कतम + ङि। कतम + सुप्।

किम् + सु। किम् + औ। किम् + जस्। किम् + अम्। किम् + औट्। किम् + शस्। किम् + टा। किम् + भ्याम्। किम् + भिस्। किम् + ङे। किम्+ भ्यस्। किम् + ङसि। किम् + ङस्। किम् + ओस्। किम् + आम्। किम् + ङि। किम् + सुप्।

तद् + सु। तद् + औ। तद् + जस्। तद् + अम्। तद् + औट्। तद् + शस्। तद् + टा। तद् + भ्याम्। तद् + भिस्। तद् + ङे। तद् + भ्यस्। तद्+

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ङसि । तद् + ङस् । तद् + ओस् । तद् + आम् । तद् + ङि । तद् + सुप् ।

एतद् + सु । एतद् + औ । एतद् + जस् । एतद् + अम् । एतद् + औट् । एतद् + शस् । एतद् + टा । एतद् + भ्याम् । एतद् + भिस् । एतद् + ङे । एतद्+ भ्यस् । एतद् + ङसि । एतद् + ङस् । एतद् + ओस् । एतद् + आम् । एतद् + ङि । एतद् + सुप् ।

इदम् + सु । इदम् + औ । इदम् + जस् । इदम् + अम् । इदम् + औट् । इदम् + शस् । इदम् + टा । इदम् + भ्याम् । इदम् + भिस् । इदम् + ङे । इदम्+ भ्यस् । इदम् + ङसि । इदम् + ङस् । इदम् + ओस् । इदम् + आम् । इदम् + ङि । इदम् + सुप् ।

अदस्+ सु । अदस्+ औ । अदस् + जस् । अदस् + अम् । अदस् + औट्। अदस् + शस् । अदस् + टा । अदस् + भ्याम् । अदस् + भिस् । अदस् + ङे । अदस्+ भ्यस् । अदस् + ङसि । अदस् + ङस् । अदस् + ओस् । अदस् + आम्। अदस् + ङि । अदस् + सुप् ।

यद् + सु । यद् + औ । यद् + जस् । यद् + अम् । यद् + औट् । यद् + शस् । यद् + टा । यद् + भ्याम् । यद् + भिस् । यद् + ङे । यद् + भ्यस् । यद्+ ङसि । यद् + ङस् । यद् + ओस् । यद् + आम् । यद् + ङि । यद् + सुप् ।

द्वि + औ । द्वि + औट् । द्वि + भ्याम् । द्वि + ओस् ।

त्रि + जस् । यद् + अम् । त्रि + शस् । त्रि + भिस् । त्रि + भ्यस् । त्रि + आम् । त्रि + सुप् ।

चतुर् + जस् । चतुर् + अम् । चतुर् + शस् । चतुर् + भिस् । चतुर् + भ्यस्। चतुर् + आम् । चतुर् + सुप् ।

पञ्च + जस् । पञ्च + अम् । पञ्च + शस् । पञ्च + भिस् । पञ्च + भ्यस् । पञ्च + आम् । पञ्च + सुप् ।

षष् + जस् । षष् + अम् । षष् + शस् । षष् + भिस् । षष् + भ्यस् । षष्+ आम् । षष् + सुप् ।

युष्मद् + सु । युष्मद् + औ । युष्मद् + जस् । युष्मद् + अम् । युष्मद् + औट् । युष्मद् + शस् । युष्मद् + टा । युष्मद् + भ्याम् । युष्मद् + भिस् । युष्मद्+ ङे । युष्मद् + भ्यस् । युष्मद् + ङसि । युष्मद् + ङस् । युष्मद् + ओस् । युष्मद्+ आम् । युष्मद् + ङि । युष्मद् + सुप् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षष्ठः पाठः

वाक्यविचारः

६.१ वाक्यलक्षणम्

परस्परं समन्वीय पूर्णैकार्थबोधकानां पदानां पदयोर्वा समूह एव वाक्यमिति निगद्यते। योग्यताकाङ्क्षासत्तियुक्तानां पदानां समुच्चयो वा वाक्यमित्यभिधीयते । क्रियान्वितं कारकं वा वाक्यमुच्यते । एकतिङ् वाक्यमिति चाहुर्वैयाकरणाः । तल्लक्षणं यथा *[पूरा अर्थ बुझाउने गरी आपसमा मिलेर रहेका दुई वा दुईभन्दा बढी पदहरूको समूहलाई वाक्य भनिन्छ अथवा योग्यता, आकाङ्क्षा र आसत्तिले युक्त पदको समूहलाई वाक्य भन्ने चलन छ। वैयाकरणहरूले न्यूनतम एक क्रियापद भएको पद समूहलाई वाक्य भनेका छन् । त्यसको लक्षण तल दिइएको छ] –*

परस्परं समन्वीय पूर्णैकार्थावबोधिनी
पदयोर्वा पदानां वा समष्टिर्वाक्यमुच्यते ।

६.२ वाक्यभेदाः

वक्तव्यतारतम्येन स्वल्पाकाराणि दीर्घाकाराणि वा वाक्यानि भवन्ति । क्रिया–कारकादीनामध्याहारापेक्षितानि 'पश्य' अहमित्यादीनि, बहुलविशेषणवर्जितैः कारक–पदैर्लसितानि प्रायशो वार्तालापे प्रयोज्यानि च वाक्यानि लघूनि भवन्ति । अनेकविध–विशेषणसमन्वितकारकपदैर्वाधिकक्रियापदैः समन्वितानि लेख्यभाषायामेव प्रयोगार्हाणि वाक्यानि दीर्घाकाराणि जायन्ते । तत्र लघुवाक्यस्योदाहरणानि यथा *[भनाइको ताच्छिल्यले गर्दा वाक्य छोटा अथवा लामा हुन्छन् । क्रिया, कारक आदिलाई अध्याहार गर्नुपर्ने पश्य, अहम्, इत्यादि र विशेषण नभएका थोरै कारकीय पदहरूले युक्त, प्रायः कुराकानीमा प्रयोग हुने वाक्यलाई लघुवाक्य भनिन्छ । धेरै विशेषण, विभिन्न कारकीय पद अथवा धेरै क्रियापदले युक्त भएका प्रायः लेख्यभाषामा मात्र प्रयोग गर्न लायक वाक्यहरूलाई दीर्घ वाक्य भनिन्छ । लघु वाक्यको उदाहरण जस्तै] –*

१. अत्रिः कृतयुगे वैद्योऽभूत् ।
२. द्वापरे सुश्रुतो वैद्य आसीत् ।
३. कलौ वाग्भटो वैद्योऽभवत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दीर्घवाक्यस्योदाहरणं यथा [दीर्घवाक्यको उदाहरण जस्तै] -

यथा व्याकरणेन भाषादोषा दूरीक्रियन्ते, योगेन चित्तं निर्मलीक्रियते तथैव वैद्यकेन शरीरस्य मलमपाक्रियते ।

रचनाभेदेन वाक्यं द्विधा विभज्यते - सामान्यवाक्यं मिलितवाक्यञ्च । *[रचनाको हिसाबले वाक्य दुई प्रकारका हुन्छन्- सामान्यवाक्य र मिलितवाक्य ।]*

६.२.१ *सामान्यवाक्यलक्षणम्*

एकोद्देश्यविधेयलसितमंशवाक्यवर्जितम्, परवाक्याश्रयं विनैव पूर्णैकार्थावबोधकं परस्परमन्वितानां पदानां कदम्बकमेव सामान्यवाक्यमित्यभिधीयते। तदुक्तम्- *[एउटै उद्देश्य र एउटै विधेय भएका, अङ्ग वाक्य नभएका, अरू वाक्यको आश्रय विना नै पूरा अर्थ बुझाउने परस्पर अन्वय मिलेका पदहरूको समूहलाई सामान्य वाक्य भनिन्छ]* -

एकोद्देश्यविधेयत्वादंशवाक्यविवर्जितम् ।
परानपेक्षं सामान्यं विश्रान्तैकार्थबोधकम् ।।

६.२.२ *मिलितवाक्यस्य लक्षणम्*

भिन्नोद्देश्यविधेययोर्भिन्नयोरंशवाक्ययोर्योगेनैकत्वमापन्नं वाक्यं मिलितमिति निगद्यते । तच्च मिश्रसंयुक्तभेदेन द्विधा विभज्यते । उक्तञ्च *[फरक फरक उद्देश्य र विधेय भएका अथवा विभिन्न वाक्यहरू मिलेर बनेका वाक्यहरूलाई मिलितवाक्य भनिन्छ । मिलितवाक्य दुई किसिमको हुन्छ - मिश्रवाक्य र संयुक्त वाक्य]* -

भिन्नोद्देश्यविधेयत्वाद्भिन्नयोरंशवाक्ययोः
योगेनैकत्वमापन्नं मिश्रं युक्तञ्च दृश्यते ।

मिश्रवाक्यस्य लक्षणं यथा

मिश्रमङ्गाङ्गिभावेन मिलितानेकवाक्यकम् ।

वाक्येऽस्मिन्नेकमङ्गिवाक्यम्, एकन्तदधिकानि वाङ्गवाक्यानि भवन्ति । द्वयोस्तदधिकानां वा अङ्गाङ्गीभूतानां वाक्यानां मिश्रणेन पूर्णार्थावबोधादेतादृशं वाक्यं मिश्रवाक्यमित्यभिधीयते । *[जसमा एउटा मुख्य वाक्य र एक वा सोभन्दा बढी अङ्ग वाक्यहरू हुन्छन् अर्थात् दुई वा सोभन्दा बढी अङ्गाङ्गिभाव भएका वाक्यहरूको मिश्रण हुन्छ, यस्ता पूर्ण अर्थ बुझाउने वाक्यलाई मिश्रवाक्य भनिन्छ ।]* यथा -

क) वैद्यो व्याधिं हरेद् येन तद्द्रव्यं प्रोक्तमौषधम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ख) येन सुश्रुतं न श्रुतं चरकञ्च नाधीतं स किं कर्तुं पारयति ।

ग) यः शिवं नार्चयति, व्रतोद्यापनं न विधत्ते, दीनान्नोपकुरुते तस्य जीवनं निरर्थकं भवति ।

अत्र त्रिषूदाहरणेष्वाद्ये केवलमेकमेव, द्वितीये द्वे, तृतीये च त्रीण्यङ्गवाक्यानि प्रधानवाक्यम् (अङ्गिवाक्यम्) आश्रित्य पूर्णार्थं बोधयन्तीति मिश्रवाक्यस्योदाहरणानीमानि। मिश्रवाक्येऽङ्गवाक्यस्याप्यङ्गत्वं कुत्रचिद् दृश्यते । *[यी तीन उदाहरणहरू मध्ये पहिलो वाक्यमा एउटा, दोस्रो वाक्यमा दुइटा र तेस्रो वाक्यमा तीनवटा अङ्गवाक्य मुख्यवाक्यसित आश्रित भएर अर्थ पूरा गरिरहेका छन् । त्यसैले यी मिश्रवाक्यका उदाहरण हुन् । मिश्रवाक्यमा कतैकतै अङ्गवाक्यको पनि अर्को अङ्गवाक्य हुनसक्छ ।]* –

अङ्गाङ्गवाक्यम्	अङ्गवाक्यम्	अङ्गिवाक्यम्
अहं तत्र न गच्छामि	इति यो हठमकरोत्	स एवाद्य समागतः
असौ वाचालः	इति यं सर्वे वदन्ति	सोऽपि ममाग्रे मूको भवति
यथा त्वमिच्छसि	तथा कुरु	इति मयाभिहितम्

अङ्गवाक्यञ्च नामाव्ययविशेषणैस्त्रिधा विभक्तं विद्यते । *[अङ्गवाक्य नाम, अव्यय, विशेषणका भेदले तीन किसिमको हुन्छ ।]* यथा –

नामाङ्गवाक्यानि–	कर्तरि –	छात्रैः सदा क्रीडनीयम् नोचितम्
	कर्मणि–	अहं गच्छामि इति राम अवोचत् ।
	करणे –	त्वं सम्यक् न पठसि तेन गुरुः कुप्यति ।
विशेषणाङ्गवाक्यानि–	भेदके–	गुरुर्हितमाह अस्य विचारं कुरु ।
	गुणे–	यदतीव रक्तं तदेव वस्त्रं दग्धम् ।
	संख्यायाम्–	यः प्रथमस्थानमलभत स नितरां प्रहृष्टः।
अव्ययाङ्गवाक्यानि–	देशे–	यत्र शीतं पतति तत्र बाधा जायते ।
	काले–	यदा सूर्य उदेति तदा तमो विनश्यति ।
	प्रकारे–	येथेच्छसि तथा कुरु ।
	तर्के–	त्वं सहायोऽसि चेत्कार्यं संपत्स्यते ।

संयुक्तवाक्यस्य लक्षणम्

यत्र च पुनः समप्रधानयोर्वाक्ययोर्वाक्यानां वा संयोजकेनानङ्गाङ्गितया योगो जायते,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तद् वाक्यं संयुक्तवाक्यमिति निगद्यते । [जहाँ बराबर प्राधान्य भएका दुई वा सोभन्दा बढी वाक्यहरू अङ्गाङ्गिभाव नभइकन संयोजकद्वारा जोडिएका हुन्छन्, तिनलाई संयुक्त वाक्य भन्दछन् । त्यसको लक्षण जस्तै] यथा -

अनङ्गाङ्गितया तुल्यप्रधाननिरपेक्षयोः ।
वाक्ययोर्योजकेनैक्ये संयुक्तं तद्बहुष्वपि ।

तच्च समुच्चयविकल्पाऽनुक्रमाद्यर्थबोधकतया विविधप्रकारत्वमाप्नोति । *[संयुक्त वाक्य समुच्चय, विकल्प, अनुक्रम आदि अर्थ बुझाउने हुँदा विभिन्न किसिमका हुनसक्छन् ।]* यथा -

समुच्चयार्थे -	स पश्यति तञ्च पृच्छति ।
विकल्पार्थे-	त्वं जानासि किं वा श्यामो जानाति ।
अनुक्रमार्थे-	पूर्वमहमगच्छम्, तदनु त्वं गतः ।
हेत्वर्थे -	पुत्रो मार्गेऽपतत्ततो माता तमुत्थापितवती ।
विशेषार्थे -	वयं तं सान्त्वयामः परं धैर्यं नादत्ते ।
वैपरीत्ये -	स कार्यं न करोति प्रत्युत व्याघातं विधत्ते ।
पक्षान्तरे -	त्वं सावधानं गच्छ, अन्यथा पतिष्यसि ।

उद्देश्यविधेययोरेकस्य प्रयोगद्वयेऽपि संयुक्तवाक्यमेव जायते । *[उद्देश्य र विधेयमध्ये एउटाको दुई पटक प्रयोग भएमा संयुक्तवाक्य नै हुन्छ ।]* यथा - एक एव केशवः शिवो वा देवो विद्यते । सूतो वा सूतपुत्रो वा यो वा को वा भवाम्यहम्। रामं कृष्णं वा भज। पादाभ्यां हस्ताभ्यां वा प्राहरत्। स गच्छति न वा।

परन्तु विधेयस्य द्वित्वबहुत्वसङ्ख्याबोधकस्य उद्देश्यपदैः सकृदेवान्वये तु न संयुक्तवाक्यम्, सामान्यवाक्यमेवं । *[तर विधेयको द्वित्व, बहुत्व सङ्ख्याबोधक उद्देश्य पदका साथ एक पटक अन्वय हुँदा संयुक्त वाक्य हुँदैन, सामान्य वाक्य नै हुन्छ ।]* यथा -

रामः कृष्णश्च गच्छतः । मुखं हृदयञ्चास्य मलिने स्तः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

६.३ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. वाक्यस्य किं लक्षणम्, कतिविधञ्च तत् ?
२. सामान्यवाक्यस्य कानि लक्षणानि, किञ्च तस्योदाहरणम् ?
३. मिलितवाक्यस्य कानि लक्षणानि, कतिविधञ्च तत् ?
४. मिश्रसंयुक्तवाक्ययोः किं पार्थक्यम् ?
५. अङ्गवाक्यस्य कः परिचयः, के च तद्भेदाः ?
६. नामविशेषणाव्ययाङ्गवाक्येषु कोऽस्ति परस्परं भेदः ?
७. मिश्रवाक्यस्य कानि लक्षणानि, किञ्च तस्योदाहरणम् ?
८. संयुक्तवाक्यस्य किं लक्षणम्, किञ्च तस्य निदर्शनम् ?

६.४ *तात्पर्यं प्रकाशयत–*

१. परस्परं समन्वीत पूर्णैकार्थावबोधिनी ।
पदयोर्वा पदानां वा समष्टिर्वाक्यमुच्यते ॥

२. एकोद्देश्यविधेयत्वादंशवाक्यविवर्जितम् ।
परानपेक्षं सामान्यं विश्रान्तैकार्थबोधकम् ॥

३. भिन्नोद्देश्यविधेयत्वाद्भिन्नयोरंशवाक्ययोः ।
योगेनैकत्वमापन्नं मिश्रं युक्तञ्च दृश्यते ॥

४. मिश्रमङ्गाङ्गिभावेन मिलितानेकवाक्यकम् ॥

५. अनङ्गाङ्गितया तुल्यप्रधाननिरपेक्षयोः ।
वाक्ययोर्योजकेनैक्ये संयुक्तं तद्बहुष्वपि ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तमः पाठः

वाक्यप्रयोगः

७.१ *वाक्यप्रयोगः*

संस्कृतभाषायां कर्तरि कर्मणि भावे च वाक्यानि प्रयुज्यन्ते । सकर्मकधातूनां प्रयोगे कर्तरि कर्मणि च, अकर्मकधातूनां योगे कर्तरि भावे च वाक्यानि निष्पद्यन्ते। *[संस्कृतभाषामा कर्ता, कर्म र भावमा वाक्यहरूको प्रयोग हुन्छ । सकर्मक धातुको प्रयोगमा कर्ता र कर्ममा, अकर्मक धातुको प्रयोगमा कर्ता र भावमा वाक्यहरू प्रयोग गरिन्छन् ।]* यथा -

वाक्यप्रयोगस्त्रिविधो भावे कर्तरि कर्मणि ।
सकर्मके नैव भावे नैव कर्मण्यकर्मके ।।

७.१.१ *कर्तरि प्रयोगः*

कर्तृवाच्ये कर्तरि प्रथमा, कर्मणि च द्वितीया भवति । तत्र कर्त्रनुरूपाणि क्रियापदानि प्रयुज्यन्ते । *[कर्तृ वाच्यमा कर्तामा प्रथमा र कर्ममा द्वितीया विभक्तिको प्रयोग गर्नुपर्दछ । यस वाच्यमा कर्ता अनुसार क्रियापदको प्रयोग हुन्छ।]* -

कर्तृवाच्यप्रयोगे हि कर्त्रधीनं क्रियापदम् ।
प्रथमान्तस्तदा कर्ता कर्मणि द्वितीया मता ।।

यथोदाहरणानि-

औषधिः रोगं हरति । भिषजौ चिकित्सालयं गच्छतः । वैद्याः रोगिणः पश्यन्ति । त्वं चिकित्सकमाह्वयसि । अहं चन्द्रं पश्यामि । वयं चरकसंहिताः पाठयामः । सः योगविद्यां श्रुतवान् ।

७.१.२ *कर्मणि प्रयोगः*

कर्मवाच्ये कर्मणि प्रथमा, कर्तरि च तृतीया भवति । क्रियापदानि कर्माधीनानि आत्मनेपदीयानि च भवन्ति । *[कर्म वाच्यमा कर्ममा प्रथमा र कर्तामा तृतीया विभक्तिको प्रयोग हुन्छ । क्रियापदको कर्म अनुसार प्रयोग गर्नुपर्दछ । क्रियापद आत्मनेपदी हुन्छन् ।]* यथा -

कर्मवाच्यप्रयोगे च कर्माधीनं क्रियापदम् ।
तृतीयान्तः सदा कर्ता कर्मणि प्रथमा मता ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथोदाहरणानि –

रामेण पाठः पठ्यते । रामेण पाठौ पठ्येते । रामेण पाठाः पठ्यन्ते । गुरुणा त्वं पाठ्यसे । शिक्षकेन युवां पाठ्येथे । मया यूयं पाठ्यध्वे । त्वया अहं पाठ्ये । तेन आवां पाठ्यावहि । तया वयं पाठ्यामहि । अनेन पाठः अपठ्यत । केशवेन पाठाः पठिष्यन्ते । वैद्यैः रोगिणो दृश्यन्ते ।

७.१.३ *भावे प्रयोगः*

भाववाच्ये कर्तरि तृतीया, सर्वदैव प्रथमपुरुषस्यैकवचने क्रियापदञ्च प्रयुज्यते। तच्चात्मनेपदि भवति । क्तादौ तु नपुंसकत्वमेकत्वञ्च।*[भाववाच्यमा कर्तामा तृतीया र सधैं प्रथम पुरुषको एक वचनमा क्रियापदको आत्मनेपदी प्रयोग हुन्छ।]* यथा–

भाववाच्यप्रयोगे तु तृतीया कर्तृकारके ।
प्रथमपुरुषस्यैकवचनञ्च क्रियापदम् ।।

यथोदाहरणानि –

मया हस्यते । त्वया उच्यते । तैः स्थीयते । अस्माभिः रुद्यते । तया ह्रीयते। युवत्या अत्रप्यत । बालिकया रुदिष्यते । अनया हसितम् ।

७.२ *वाक्ये पदक्रमः*

संस्कृतभाषायां प्रथमं कर्तृपदस्य प्रयोगो भवति । अन्ते च क्रियापदं प्रयुज्यते, मध्ये करणादीनां प्रयोगो भवति, विधेयं क्रियाविशेषणं कर्म च क्रियान्तिके प्रयुज्यन्ते। विशेषणं विशेष्यात् प्राक् प्रयुज्यते । विधेयं तत्पश्चात् प्रयुज्यते । भेदकं भेद्यतः पूर्वं प्रयुज्यते । अव्ययानि यथान्वयं प्रयुज्यन्ते । गौणक्रिया मुख्यक्रियातः पूर्वं प्रयुज्यते। प्रथमं सम्बोधनपदस्य प्रयोगो भवति । एषः सामान्यः पदक्रमो विद्यते । *[संस्कृत-भाषामा वाक्यमा सामान्यतया पहिले कर्ता र अन्त्यमा क्रियापदको प्रयोग हुन्छ, बीचमा करण, सम्प्रदान आदि कारकहरूको प्रयोग गरिन्छ । विधेय क्रियाविशेषण र कर्म क्रियाको नजिकै प्रयोग गरिन्छ । विशेषणलाई विशेष्य अगाडि राख्नु पर्दछ। विधेय त्यसभन्दा पछि प्रयोग गरिन्छ । भेदकलाई भेद्यभन्दा अगाडि प्रयोग गर्नुपर्दछ । अव्यय पदहरू तिनीहरूको जोसित सम्बन्ध छ, ती पदहरूका साथै राख्नुपर्दछ । गौणक्रियालाई मुख्य क्रियाभन्दा पहिले नै राखिन्छ ।]* यथा –

आदौ कर्ताऽऽख्यातमन्ते करणादिकमन्तरा
क्रियाविशेषणं कर्म विधेयञ्च क्रियान्तिके ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशेषणं विशेष्यात्प्राग् विधेयन्तु तदुत्तरम् ।
भेदकं भेद्यतः पूर्वमव्ययानि यथान्वयम् ।
गौणक्रिया मुख्यतः प्राग्, अग्रेऽस्याः कारकादिकम् ।।
आदौ संबोधनोद्गारो सामान्योऽयं पदक्रमः ।।

यथोदाहरणानि –

भगवन्! त्वं नः सदैव पाहि। अस्माभिर्विकसितानि पुष्पाणि चीयन्ते। कारुणिकाः आढ्या दीनेभ्यो द्वारि द्वारि, अन्नानि वितरन्ति । ऊर्णावस्त्रं प्रबलमपि शीतं बाधते । अहो! महानानन्दः समजनि । दशरथस्य सुतो रामः सीतया साकं वनाय प्रतस्थे ।

अभ्यासः

७.३ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. वाक्यप्रयोगः कतिविधः ?
२. कर्तृवाच्यस्य किं लक्षणम् ?
३. कर्मवाच्यस्य किं लक्षणम् ?
४. कर्तृकर्मवाच्ययोः को भेदः ?
५. भाववाच्यस्य किं लक्षणम् ?
६. कर्तृवाच्यभाववाच्ययोः किमन्तरम् ?
७. कर्मवाच्यभाववाच्ययोः को भेदः ?
८. कर्मवाच्ये कर्तरि कर्मणि च का विभक्तयः प्रयुज्यन्ते ?
९. वाक्ये पदक्रमः कीदृशः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टमः पाठः

कारकाणि विभक्तयश्च

८.१ *कारकपरिचयः*

क्रियान्वयित्वं कारकत्वमिति कारकस्य सामान्यलक्षणम् । कर्तृकर्मादीनां क्रियान्वयतया कारकत्वं सिध्यति । संबन्धस्तु क्रियान्वयाभावेन नार्हति कारकत्वम्। तानि षट्सङ्ख्यकानि बुधैराम्नातानि – कर्ता, कर्म, करणम्, सम्प्रदानम्, अपादानम्, अधिकरणञ्चेति । *[क्रियासँग सम्बन्ध राख्ने पदलाई कारक भनिन्छ । कर्ता, कर्म आदिको क्रियासँग सम्बन्ध हुनेहुँदा तिनलाई कारक भनिएको हो । सम्बन्धको क्रियासँग सम्बन्ध नहुने हुँदा त्यसलाई कारक भनिदैन। कारक ६ किसिमको हुन्छ– कर्ता, कर्म, करण, सम्प्रदान, अपादान र अधिकरण ।]* यथा –

कर्ता कर्म च करणं संप्रदानं तथैव च ।
अपादानाधिकरणमित्याहुः कारकाणि षट् ।।
तत्र पञ्चविधः कर्ता कर्म सप्तविधं भवेत् ।
करणं द्विविधञ्चैव सम्प्रदानं त्रिधा मतम् ।।
अपादानं द्विधा चैव तथाधारश्चतुर्विधः ।

यः कार्यं करोति स कर्ता इति उच्यते । कर्तृवाच्ये कर्तरि प्रथमा भवति । यथा – रामः पठति । कर्त्रा यत्कार्यं क्रियते तत् कर्म इति उच्यते । कर्मणि द्वितीया भवति। यथा – रामः पाठं पाठयति । कर्ता येन साधनेन कार्यं करोति तत् करणमिति उच्यते । करणे अनुक्तकर्तरि च तृतीया भवति । यथा – रामः शरेण मृगं घातयति, मया पाठः पठ्यते । यस्मै किमपि दीयते वा यन्निमित्तं कार्यं क्रियते तत् सम्प्रदानमिति कथ्यते । सम्प्रदाने चतुर्थी भवति । यथा – रामः मह्यं पुस्तकं ददाति । यस्मात् किमपि वस्तु पृथक् दूरे वा भवति, तद् अपादानमिति कथ्यते । अपादाने पञ्चमी भवति । यथा – वृक्षात् पत्राणि पतन्ति । यस्मिन् किमपि वस्तु तिष्ठति तथाविध आधार अधिकरणमिति कथ्यते । अधिकरणे सप्तमी भवति । यथा – कटे पुस्तकं विद्यते । सम्बन्धे च षष्ठी भवति । यथा – रामस्य पुस्तकम् विद्यते । सम्बोधने प्रथमा विभक्तिः प्रयुज्यते । यथा – हे राम ! अत्रागच्छ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जसले काम गर्छ त्यसलाई कर्ता भनिन्छ । कर्तृवाच्यमा कर्तामा प्रथमा विभक्तिको प्रयोग हुन्छ । जस्तै – रामः पाठं पाठयति । रामौ पाठं पाठयतः । रामाः पाठं पाठयन्ति ।

कर्ताले जुन काम गर्छ त्यसलाई कर्म भनिन्छ । कर्ममा द्वितीया विभक्ति हुन्छ। जस्तै माथिका उदाहरणमा पाठम् कर्मको रूपमा आएको छ ।

कर्ताले जसको सहायताद्वारा काम गर्छ त्यसलाई करण भनिन्छ । करण, कारक र अनुक्त कर्तामा तृतीया विभक्ति हुन्छ । जस्तै– रामः शरेण मृगं घातयति। यहाँ मृग मार्ने काममा रामलाई सहयोग गर्ने शर भएकोले शर करण हो । त्यसैले यहाँ तृतीया विभक्तिको प्रयोग भएको छ । 'मया पाठः पठ्यते' मा मया अनुक्त कर्ता हो । त्यसैले यसमा तृतीया विभक्तिको प्रयोग भएको छ ।

कसैलाई केही दिइन्छ वा कसैका निमित्त केही गरिन्छ भने त्यसलाई सम्प्रदान कारक भनिन्छ । सम्प्रदान कारकमा चतुर्थी विभक्ति हुन्छ । जस्तै – रामो मह्यं पुस्तकं ददाति । यस उदाहरणमा रामले मलाई पुस्तक दिएको हुँदा मह्यम् सम्प्रदान कारक हो ।

जसबाट केही वस्तु टाढा हुन्छ वा छुट्टिन्छ त्यसलाई अपादान भनिन्छ । अपादान कारकमा पञ्चमी विभक्ति हुन्छ । जस्तै – वृक्षात् पत्राणि पतन्ति । यहाँ पातहरू रूखबाट छुट्टिएको हुँदा रूख अपादान भयो । यसमा पञ्चमी विभक्तिको प्रयोग भएको छ ।

जसमा कुनै वस्तु रहन्छ अथवा आधार बुझिन्छ भने त्यो अधिकरण कारक हुन्छ । त्यसमा सप्तमी विभक्तिको प्रयोग गर्नुपर्दछ । जस्तै – कटे पुस्तकं विद्यते। यसमा पुस्तकको आधार भएको हुनाले कटे अधिकरण कारक हो र सप्तमी विभक्तिको रूप हो ।

सम्बन्धमा षष्ठी विभक्तिको प्रयोग हुन्छ । जस्तै – रामस्य पुस्तकं विद्यते । यसमा रामस्य सम्बन्ध भएकाले षष्ठी विभक्तिको प्रयोग भएको छ ।

सम्बोधनमा प्रथमा विभक्तिको प्रयोग हुन्छ । जस्तै – हे राम ! अत्रागच्छ। यहाँ हे राम सम्बोधन हो त्यसैले प्रथमा विभक्तिको प्रयोग भएको छ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अभ्यासः

८.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. कारकस्य किं लक्षणम् ?

२. कारकाणि कति, कानि च तानि ?

३. केषु केषु कारकेषु कासां विभक्तीनां प्रयोगः ?

४. कर्तृकारकस्य किमुदाहरणम् ?

५. कर्मकारकस्य परिचयं दत्त ।

६. करणसंप्रदानापादानाधिकरणानां लक्षणानि कानि ?

८.३ *तात्पर्यं प्रकाशयत–*

१. वाक्यप्रयोगस्त्रिविधो भावे कर्तरि कर्मणि ।
सकर्मके नैव भावे नैव कर्मण्यकर्मके ।।

२. कर्तृवाच्यप्रयोगे हि कर्त्रधीनं क्रियापदम् ।
प्रथमान्तस्तदा कर्ता कर्मणि द्वितीया मता ।।

३. कर्मवाच्यप्रयोगे च कर्माधीनं क्रियापदम् ।
तृतीयान्तः सदा कर्ता कर्मणि प्रथमा मता ।।

४. भाववाच्यप्रयोगे तु तृतीया कर्तृकारके ।
प्रथमपुरुषस्यैकवचनञ्च क्रियापदम् ।।

५. आदौ कर्ताऽऽख्यातमन्ते करणादिकमन्तरा ।
क्रियाविशेषणं कर्म विधेयञ्च क्रियान्तिके ।।
विशेषणं विशेष्यात्प्राग् विधेयन्तु तदुत्तरम् ।
भेदकं भेद्यतः पूर्वमव्ययानि यथान्वयम् ।।
गौणक्रिया मुख्यतः प्राग् अग्रेऽस्याः कारकादिकम् ।
आदौ संबोधनोद्गारो सामान्योऽयं पदक्रमः ।।

६. कर्ता कर्म च करणं संप्रदानं तथैव च ।
अपादानाधिकरणमित्याहुः कारकाणि षट् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नवमः पाठः

अस्तित्ववाचिक्रियापदप्रयोगः - १

प्रथमपुरुषे[1] -	एकव.	सः	अस्ति
	द्विव.	तौ	स्तः
	बहुव.	ते	सन्ति
मध्यमपुरुषे[2] -	एकव.	त्वम्	असि
	द्विव.	युवाम्	स्थः
	बहुव.	यूयम्	स्थ
उत्तमपुरुषे[3] -	एकव.	अहम्	अस्मि
	द्विव.	आवाम्	स्वः
	बहुव.	वयम्	स्मः

९.१ *अधोलिखितवाक्यानि पठत ।*

सः अस्ति । तौ स्तः । ते सन्ति । त्वम् असि । युवां स्थः । यूयं स्थ । अहम् अस्मि । आवां स्वः । वयं स्मः । वैद्यः अस्ति । वैद्यौ स्तः । वैद्याः सन्ति । सीता अस्ति । सीते स्तः । सीताः सन्ति । कविः अस्ति । कवी स्तः । कवयः सन्ति। मुनिः अस्ति । मुनी स्तः । मुनयः सन्ति । गुरुः अस्ति । गुरू स्तः । गुरवः सन्ति। भानुः अस्ति । भानू स्तः । भानवः सन्ति । नदी अस्ति । नद्यौ स्तः। नद्यः सन्ति। युवती अस्ति । युवत्यौ स्तः । युवत्यः सन्ति । पिता अस्ति । पितरौ स्तः । पितरः सन्ति । माता अस्ति । मातरौ स्तः । मातरः सन्ति । भ्राता अस्ति । भ्रातरौ स्तः। भ्रातरः सन्ति । सखा अस्ति । सखायौ स्तः । सखायः सन्ति । राजा अस्ति। राजानौ स्तः । राजानः सन्ति । भिषक् अस्ति । भिषजौ स्तः । भिषजः सन्ति ।

९.२ [4]*बहुवचने परिवर्तनं कुरुत ।*

वैद्यः अस्ति । *(वैद्याः सन्ति ।)* अर्जुनौ स्तः । त्वम् असि । युवां स्थः। अहम् अस्मि । आवाम् स्वः । सा अस्ति । दुर्गे स्तः । अरिः अस्ति । ऋषी स्तः।

---

१. शेषे प्रथमः । २. युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः । ३. अस्मद्युत्तमः । ४. बहुषु बहुवचनम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दशमः पाठः

अस्तित्ववाचिक्रियापदप्रयोगः - २

प्रथमपुरुषे –	एकव.	सः	आसीत्
	द्विव.	तौ	आस्ताम्
	बहुव.	ते	आसन्
मध्यमपुरुषे –	एकव.	त्वम्	आसीः
	द्विव.	युवाम्	आस्तम्
	बहुव.	यूयम्	आस्त
उत्तमपुरुषे –	एकव.	अहम्	आसम्
	द्विव.	आवाम्	आस्व
	बहुव.	वयम्	आस्म

१०.१ *अधोलिखितवाक्यानि पठत ।*

सः आसीत् । रामौ आस्ताम् । श्यामाः आसन् । कृष्णः आसीत् । कृष्णौ आस्ताम्। रमाः आसन् । लते आस्ताम् । हरयः आसन् । नदी आसीत् । पार्वत्यौ आस्ताम् । पितरः आसन् । राजा आसीत् । राजानौ आस्ताम् । राजानः आसन् । त्वम् आसीः । युवाम् आस्तम् । यूयम् आस्त । अहम् आसम् । आवाम् आस्व। वयम् आस्म । भिषक् आसीत् । भिषजौ आस्ताम् । भिषजः आसन् ।

१०.२ *एकवचने परिवर्तनं कुरुत ।*

रामाः आसन् । *(रामः आसीत् ।)* युवाम् आस्तम् । यूयम् आस्त । आवाम् आस्व । वयम् आस्म । नद्यौ आस्ताम् । मुनयः आसन् । गौर्यौ आस्ताम् । चमर्यः आसन्। बालकौ आस्ताम् । लताः आसन् । मुनी आस्ताम् । पितरः आसन् । भ्रातरौ आस्ताम् । राजानः आसन् । सखायौ आस्ताम् । कृष्णाः आसन् । स्त्रियौ आस्ताम्। वैद्यौ आस्ताम् । भिषजः आसन् ।

१०.३ *द्विवचने परिवर्तनं कुरुत ।*

कविराजः आसीत् । *(कविराजौ आस्ताम् ।)* अनुजाः सन्ति । केशवः अस्ति । नद्यः आसन्। हरयः सन्ति । पिता आसीत् । खगाः आसन्। अहम् आसम्। वयम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्मः। एताः सन्ति । इमे आसन् । का आसीत् ? कवयः सन्ति । भानवः आसन्। गुरुः आसीत् । गुरवः सन्ति । द्यौः अस्ति । राजा आसीत् । नृपाः सन्ति । फलानि आसन् । अन्नानि सन्ति। भवनम् आसीत् । वनानि सन्ति । औषधयः सन्ति।

१०.४ *बहुवचने परिवर्तनं कुरुत ।*

केशवः आसीत् । *(केशवाः आसन् ।)* त्वम् आसीः । अहम् आसम् । बालिके आस्ताम् । कविः आसीत् । नद्यौ आस्ताम् । पुष्पम् आसीत् । कुसुमे आस्ताम् । नारी आसीत्। चमर्यौ आस्ताम् । गुरुः आसीत् । भानू आस्ताम् । विधवा आसीत् । फले आस्ताम्। गर्दभः आसीत् । वानरौ आस्ताम् । कमला आसीत् । रमे आस्ताम् । स्त्रियौ आस्ताम् । मित्रे आस्ताम् । पिता आसीत् । मातरौ आस्ताम् । भ्राता आसीत् । श्वसुरः आसीत् । नप्तारौ आस्ताम् । भगिनी आसीत्। भागिनेयौ आस्ताम् । पत्रम् आसीत् । जामातरौ आस्ताम् । चक्रवाकवधूः आसीत्। सखायौ आस्ताम् । रिपुः अस्ति । शत्रू स्तः। नक्षत्रम् अस्ति । बालिके स्तः । एकः अस्ति। द्वौ स्तः । वैद्यः अस्ति । कविराजौ स्तः । भिषक् अस्ति ।

१०.५ *वर्तमानकाले परिवर्तनं कुरुत ।*

कविराजः आसीत् । *(कविराजः अस्ति ।)* उमेशौ आस्ताम्। मुनयः आसन्। त्वम् आसीः । युवाम् आस्तम्। यूयम् आस्त । अहम् आसम् । स्त्रियौ आस्ताम् । सखायः आसन्। राजानौ आस्ताम् । वैद्याः आसन् । चमूः आसीत् । भूपतयः आसन् । खगौ आस्ताम् । पक्षिणः आसन् ।

१०.६ *भूतकाले परिवर्तनं कुरुत ।*

सः अस्ति । *(सः आसीत् ।)* तौ स्तः । ते सन्ति । त्वम् असि । युवां स्थः। यूयं स्थ । अहम् अस्मि । आवाम् स्वः । वयं स्मः । वैद्यः अस्ति । रामौ स्तः। रामाः सन्ति। बालिका अस्ति । बालिके स्तः । बालिकाः सन्ति । सिंहः न अस्ति। कविराजौ न स्तः । वानराः न सन्ति । मुनिः न अस्ति । कवी न स्तः । कपयः न सन्ति । भानुः न अस्ति । गुरू न स्तः । विधवाः न सन्ति । कोकिलः न अस्ति । पुष्पे न स्तः । कुसुमानि न सन्ति । चमरी अस्ति । स्त्रियौ स्तः । नार्यः न सन्ति। वधूः अस्ति । रिपू स्तः । रिपवः न सन्ति । तारकाः सन्ति । नक्षत्राणि सन्ति। वने स्तः । भवनानि सन्ति । चमूः अस्ति । चक्रवाकाः सन्ति । शूकरौ स्तः। मार्जाराः सन्ति । भेकः अस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१०.७ *परस्परं मेलयत*

क	ख
१) श्यामः	क) स्मः
२) केशवौ	ख) सन्ति
३) हंसाः	ग) स्वः
४) त्वम्	घ) स्थ
५) युवाम्	ङ) अस्मि
६) यूयम्	च) स्तः
७) अहम्	छ) अस्ति
८) आवाम्	ज) असि
९) वयम्	झ) स्थः

१०.८ *कोष्ठस्थशब्दान् प्रयुज्य प्रश्नानामुत्तराणि लिखत ।*

अयं कः अस्ति ? (राम) ।
(अयं रामः अस्ति ।)

इमौ कौ स्तः ? (कवि)

इमे के सन्ति ?	(बालक)	स कः अस्ति ?	(वैद्य)
तौ कौ स्तः ?	(प्राध्यापक)	ते के सन्ति ?	(कविराज)
इयं का अस्ति ?	(बालिका)	इमे के स्तः ?	(छांत्रा)
इमाः काः सन्ति ?	(नारी)	सा का अस्ति ?	(शिक्षिका)
ते के स्तः ?	(अजा)	ताः काः सन्ति ?	(चमरी)
तत् किम् अस्ति ?	(पुस्तक)	ते के स्तः ?	(फल)
तानि कानि सन्ति ?	(पुष्प)	इदम् किम् अस्ति ?	(पत्र)
इमे के स्तः ?	(पुष्प)	इमानि कानि सन्ति ?	(कुसुम)

१०.९ *निम्नशब्दानां प्रथमाविभक्तौ रूपाणि लिखत ।*

तद्, युष्मद्, अस्मद्, केशव, रमा, मुनि, भानु, पितृ, पत्र, बधू, सखि, राजन्, महत्, कमला, गुरु, नदी, भ्रातृ, नप्तृ, रिपु, मित्र, नक्षत्र, चमरी, भेक, वन, स्त्री, पुष्प, विधवा, कुसुम, शूकर । भिषज् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकादशः पाठः

[1]विशेषणपदप्रयोगः

		पुंलिङ्गे		
प्रथमपुरुषे–	एकव.	रामः	सुन्दरः	अस्ति
	द्विव.	रामौ	सुन्दरौ	स्तः
	बहुव.	रामाः	सुन्दराः	सन्ति
मध्यमपुरुषे –	एकव.	त्वम्	सुन्दरः	असि
	द्विव.	युवाम्	सुन्दरौ	स्थः
	बहुव.	यूयम्	सुन्दराः	स्थ
उत्तमपुरुषे–	एकव.	अहम्	सुन्दरः	अस्मि
	द्विव.	आवाम्	सुन्दरौ	स्वः
	बहुव.	वयम्	सुन्दराः	स्मः
		स्त्रीलिङ्गे		
प्रथमपुरुषे–	एकव.	सीता	सुन्दरी	अस्ति
	द्विव.	सीते	सुन्दर्यौ	स्तः
	बहुव.	सीताः	सुन्दर्यः	सन्ति
मध्यमपुरुषे–	एकव.	त्वम्	सुन्दरी	असि
	द्विव.	युवाम्	सुन्दर्यौ	स्थः
	बहुव.	यूयं	सुन्दर्यः	स्थ
उत्तमपुरुषे–	एकव.	अहं	सुन्दरी	अस्मि
	द्विव.	आवाम्	सुन्दर्यौ	स्वः
	बहुव.	वयम्	सुन्दर्यः	स्मः
		नपुंसकलिङ्गे		
प्रथमपुरुषे–	एकव.	फलम्	सुन्दरम्	अस्ति
	द्विव.	फले	सुन्दरे	स्तः
	बहुव.	फलानि	सुन्दराणि	सन्ति

१. यल्लिङ्गं यद्वचनं याश्च विभक्तयो विशेष्यस्य । तल्लिङ्गं तद्वचनं ताश्च विभक्तयो विशेषणस्यापि ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११.१ *अधोलिखितवाक्यानि पठत ।*

रामः सुन्दरः अस्ति । अर्जुनौ निर्मलौ स्तः । श्यामाः सुन्दर्यः सन्ति । रमा शुद्धा अस्ति । लते निष्फले स्तः । गौर्यौ सपुत्रे स्तः । कृष्णः कपिलः अस्ति । रामौ कपिलौ स्तः। वायसाः कृष्णाः सन्ति । खगः कृष्णः अस्ति । खगौ पीनौ स्तः। खगाः श्वेताः सन्ति । फलम् रक्तम् अस्ति । फले रक्ते स्तः । फलानि रक्तानि सन्ति। वनम् घनम् अस्ति । वने घने स्तः । वनानि घनानि सन्ति । हरिः सुन्दरः अस्ति । हरी सुन्दरौ स्तः । हरयः सुन्दराः सन्ति। रामः गच्छन् अस्ति । रामौ गच्छन्तौ स्तः। रामाः गच्छन्तः सन्ति । सीता गच्छन्ती अस्ति । सीते गच्छन्त्यौ स्तः । सीताः गच्छन्त्यः सन्ति । फलम् पतत् अस्ति । फले पतती स्तः । फलानि पतन्ति सन्ति। अहम् भ्रमन् अस्मि । आवां भ्रमन्तौ स्वः । वयं भ्रमन्तः स्मः । स रोगी अस्ति । तौ रोगिणौ स्तः । ते रोगिणः सन्ति ।

११.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) रामः कीदृशः अस्ति ?
ख) कौ निर्मलौ स्तः ?
ग) काः सुन्दर्यः सन्ति ?
घ) रमा कीदृशी अस्ति ?
ङ) के निष्फले स्तः ?
च) गौर्यौ कीदृश्यौ स्तः ?
छ) कः कपिलः अस्ति ?
ज) वायसाः कीदृशाः सन्ति ?
झ) कः कृष्णः अस्ति ?
ञ) कौ पीनौ स्तः ?
ट) के श्वेताः सन्ति ?
ठ) फलम् कीदृशम् अस्ति ?
ड) के रक्ते स्तः ?
ढ) कानि रक्तानि सन्ति ?
ण) वनम् कीदृशम् अस्ति ?
त) के घने स्तः ?
थ) कानि घनानि सन्ति ?
द) हरिः कीदृशः अस्ति ?
ध) कौ सुन्दरौ स्तः ?
न) हरयः कीदृशाः सन्ति ?
प) रामः किं कुर्वन् अस्ति ?
फ) कौ गच्छन्तौ स्तः ?
ब) रामाः किं कुर्वन्तः सन्ति ?
भ) सीता किं कुर्वती अस्ति ?
म) के गच्छन्त्यौ स्तः ?
य) सीताः किं कुर्वत्यः सन्ति ?
र) किम् पतत् अस्ति ?
ल) फले किं कुर्वती स्तः ?
व) कनि पतन्ति सन्ति ?
श) त्वम् किं कुर्वन् असि ?
ष) युवां किं कुर्वन्तौ स्थः ?
स) यूयं किं कुर्वन्तः स्थ ?
ह) सः कोऽस्ति ?
क्ष) ते के सन्ति ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११.३ *बहुवचने परिवर्तनं कुरुत ।*

श्यामः पठन् अस्ति । *(श्यामाः पठन्तः सन्ति ।)* अनुजौ क्रीडन्तौ स्तः । सीता लिखन्ती अस्ति । रमे धावन्त्यौ स्तः । हरिः कथयन् अस्ति । मुनी वदन्तौ स्तः । भानुः तपन् अस्ति । विधू प्रकाशमानौ स्तः । बालकः शयानः अस्ति । नदी वहन्ती अस्ति। गौर्यौ गच्छन्त्यौ स्तः। त्वम् गच्छन्ती असि। युवाम् पतन्त्यौ स्थः। अहम् सुन्दरी अस्मि। आवाम् वसन्तौ स्वः । एषा क्रन्दन्ती अस्ति । इमौ लिखन्तौ स्तः । जम्बूकः क्रोशन् अस्ति । फले पक्वे स्तः । वनम् हरिद्वर्णम् अस्ति ।

११.४ *गच्छत्-भ्रमत् - पतत् - सुन्दर-कृष्ण-श्वेतशब्दानां त्रिषु लिङ्गेषु प्रथमाविभक्तौ रूपाणि लिखत ।*

११.५ *कोष्ठमनुसृत्य रिक्तस्थानं पूरयत ।*

क) रामः .... अस्ति (गम्) ।
ख) केशवौ .... स्तः (धाव्) ।
ग) सीता .... आसीत् (सुन्दर) ।
घ) रमे .... स्तः (कुरूप) ।
ङ) श्यामाः .... सन्ति (शी) ।
च) अहम् .... अस्मि (हस्) ।
छ) आवाम् .... स्वः (क्रीड्) ।
ज) वयम् .... स्मः (लिख्) ।
झ) नदी .... अस्ति (वह्) ।
ञ) गौर्यौ .... स्तः (रूपवती) ।
ट) फलानि .... सन्ति (पक्व) ।
ठ) निर्झराः .... आसन् (पत्) ।
ड) हिमशिखराणि .... सन्ति (धवल) ।
ढ) वने .... स्तः (कृष्ण) ।
ण) घोटकौ .... स्तः (श्वेत) ।
त) भवनानि .... सन्ति (सुन्दर) ।
थ) चमर्यः .... आसन् (चर्) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११.६ *अधस्तनपदानां वाक्येषु प्रयोगं कुरुत ।*

पक्वम् । श्वेतौ । निर्मले । क्षालयन्ती । लिखन्त्यौ । धावन्त्यः । भ्रमन्त सुन्दर्यः। क्रन्दन् । शुभ्रः । मनोहरम् । विकसत् । द्योतयन् । क्रीडन्त्यौ । पठन्त पतन्ति । पश्यन्त्यः। धवलौ । वदन् । सुन्दर्यौ । क्रोशन्तौ । गर्जन्तः । शुद्धम् ।

११.७ *वाक्येषु प्रयोगं कुरुत ।*

श्वेतः । श्वेता । श्वेतम् । कष्णः । कृष्णाः । कृष्णम् । रक्तम् । रक्ता। रक्त पीता । पीतः । पीतम् । मधुरः । मधुरा । मधुरम् । हरितः । हरिता । हरितम् कटुः । कट्वी । कटु । अम्लः । अम्ला । अम्लम् । शीतलः । शीतला शीतलम्। उष्णः । उष्णा । उष्णम्। शोभनः। शोभना । शोभनम् । स्थूलः। मनोहर कृशः । बुद्धिमान् । साधुः। स्थूला । कृशा। मनोहरा । बुद्धिमती साध्वी। स्थूलम कृशम् । मनोहरम् । बुद्धिमत् ।

११.८ *(११.१,११.३) निर्दिष्टवाक्यानां भूतकाले परिवर्तनं कुरुत ।*

११.९ *(११.३) निर्दिष्टवाक्यानां प्रश्नार्थकवाक्येषु परिवर्तनं कुरुत ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वादशः पाठः

वर्तमानकालिकवाक्यप्रयोगः

प्रथमपुरुषे –	एकव.	रामः	पठति ।
	द्विव.	रामौ	पठतः ।
	बहुव.	रामाः	पठन्ति ।
मध्यमपुरुषे–	एकव.	त्वम्	पठसि ।
	द्विव.	युवाम्	पठथः ।
	बहुव.	यूयम्	पठथ ।
उत्तमपुरुषे –	एकव.	अहम्	पठामि ।
	द्विव.	आवाम्	पठावः ।
	बहुव.	वयम्	पठामः ।

१२.१ *अधोलिखितवाक्यानि पठत ।*

रामः पठति । सीते हसतः । रमाः गच्छन्ति । त्वं पश्यसि । युवां क्रन्दथः। यूयम् आगच्छथ । अहं हसामि । आवां पचावः । वयं त्यजामः । शिष्यः नमति। शिष्यौ नमतः। शिष्याः नमन्ति । उमेशः पिबति । उमेशौ पिबतः । उमेशाः पिबन्ति। लता त्रुटति । लते त्रुटतः। लताः त्रुटन्ति । कविः सृजति । कवी सृजतः। कवयः सृजन्ति । छात्रः पठति । छात्रौ पठतः । छात्राः पठन्ति । पिता क्षाम्यति ।-पितरौ क्षाम्यतः । पितरः क्षाम्यन्ति । त्वं क्षाम्यसि । युवां क्षाम्यथः। यूयं क्षाम्यथ। अहं क्षाम्यामि । आवां क्षाम्यावः । वयं क्षाम्यामः ।

१२.२ *बहुवचने परिवर्तनं कुरुत ।*

रामः पठति ।*(रामाः पठन्ति ।)* केशवः हसति । देवौ गच्छतः । मनुष्यौ पश्यतः। खगः उद्गच्छति । त्वं वदसि । अहं वदामि । आवां क्रीडावः । सीता नृत्यति । उमेशः आगच्छति । रमे पठतः । सः काङ्क्षति । त्वं त्यजसि । शिष्यौ नमतः । अहं नमामि। आवां पचावः । केशवौ पिबतः । लुब्धकः भ्रमति । विप्रौ त्यजतः । याचकः याचति । अहं वदामि । माधवः रक्षति । गोविन्दौ वसतः । गर्दभः वहति। आवां तिष्ठावः । चौरः हरति । बालकः क्रन्दति । अहं वाञ्छामि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शृगालौ क्रोशतः । सिंहः गर्जति । व्याघ्रौ धावतः । मृगः चरति । वृकौ खादतः । हरी किरतः । मूर्खः तुदति । सर्पः गिरति । कृषकौ कर्षतः । केशवौ क्षिपतः । त्वं पृच्छसि । आवां मुञ्चावः । युवां स्पृशथः । बालकौ लिखतः । अहं प्रविशामि। तारके स्फुरतः । बालिका तुष्यति । मयूरौ नृत्यतः । गोधूमः नश्यति । पुत्रौ क्रुध्यतः। अहं क्षुध्यामि । तौ सीदतः । बालिके लिखतः । नरौ शोचतः । कृषकः वपति । मेघः वर्षति । सैनिकौ रक्षतः । भूपालः जयति । आवाम् क्रीडावः । विष्णू तरतः । कृषकः खनति । गायकौ गायतः । मूषकः चर्वति । नापितौ क्षुरतः। विप्रः जीवति । अग्निः ज्वलति । सूर्यः तपति । सः तर्जति । मूर्खौ तर्दतः । हंसः तरति। आवाम् नन्दावः । खलौ निन्दतः । बालकौ पुष्यतः । छात्रः बोधति । भगिन्यौ मूर्छतः । मुनिः शपति । कवी सृजतः । युवां सिञ्चथः । अयं स्मरति । केशवौ उत्तरतः । वृक्षौ फलतः । तौ क्षिपतः । एतौ जिघ्रतः । लते त्रुटतः । विमलौ भक्षयतः । चौरः चोरयति । अर्जुनौ कथयतः ! वृद्धः न स्मरति । देवौ न जल्पतः। आवां प्रक्षिपावः । अयं मुञ्चति । मशकौ दशतः । एषा चिन्तयति ।

१२.३ *द्विवचने परिवर्तनं कुरुत ।*

केशवः गच्छति । *(केशवौ गच्छतः ।)* कमलाः मिलन्ति । सर्पः दशति। इमे मुञ्चन्ति । गुरवः पाठयन्ति । एते क्षिपन्ति । अहं चिन्तयामि । एषा लिम्पति । मूर्खः तर्दति । हरयः तरन्ति। कृषकः सिञ्चति । व्याघ्राः गर्जन्ति । मृगः धावति । कविः सृजति। बालकाः पिबन्ति । मुनयः जपन्ति । वयं स्मरामः । भृत्यः चलति। एते मुञ्चन्ति । चौराः चोरयन्ति । मनुजाः मूर्छन्ति। अहं खनामि। वयं तरामः। पिता क्षाम्यति । बालकाः क्रीडन्ति । मूषकः खनति । हरयः कुप्यन्ति । वयं तिष्ठामः । वृषभाः पिबन्ति । त्वं क्षुरसि । ते नमन्ति । भ्रमराः भ्रमन्ति । यूयं पश्यथ । वयं पश्यामः। ते पुष्यन्ति। लताः फलन्ति। मूषकाः प्रविशन्ति। मूर्खाः निन्दन्ति। हाराः त्रुटन्ति। हरिणाः चर्वन्ति। वयं जपामः। भटः जयति। इमे कथयन्ति। अहं लिम्पामि। वयं गायामः । कृषकाः वपन्ति । यूयं जीवथ । कवयः सृजन्ति। असुराः क्रुध्यन्ति। त्वं शोचसि । बालिकाः क्रीडन्ति । ते हरन्ति। श्यामाः यजन्ति। त्वं वदसि । माधवाः तर्दन्ति । वयं त्यजामः । पयोदः वर्षति । सैनिकाः धावन्ति । याज्ञिकः यजति । गोविन्दः याचति । अहं भजामि । ते तिष्ठन्ति । नद्यः वहन्ति । बाला क्रन्दति । यूयं वाञ्छथ । छात्राः लिखन्ति । मुनयः तपन्ति । सा वदति । ते लिम्पन्ति । शिक्षकः पाठयति । हाराः त्रुटन्ति । मनुजाः शोचन्ति । मूकः न वदति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१२.४ *एकवचने परिवर्तनं कुरुत ।*

अनुजौ गच्छतः । *(अनुजः गच्छति ।)* भ्रातरः पठन्ति । वयं हसामः । कमले पश्यतः। युवां नमथः। वयं क्रीडामः। यूयं नृत्यथ। हरयः गर्जन्ति । कवयः सृजन्ति। यतयः जपन्ति। यूयं त्यजथ। वयं काङ्क्षामः। पितरः पृच्छन्ति । ते स्पृशन्ति। ताः क्षिपन्ति। वयं लिखामः। यूयं नयथ । ईश्वराः रक्षन्ति । एताः हरन्ति । केशवाः तर्दन्ति । बालिकाः लिम्पन्ति । एते गायन्ति । कृषकाः वपन्ति। वयं जीवामः। भागिरथ्यौ वहतः। ते खनन्ति। क्रमेलकाः वहन्ति । यूयं यजथ । ताः निन्दन्ति । वयं नमामः । मूषकाः प्रविशन्ति । सिंहाः गर्जन्ति । मेषाः चरन्ति। अजाः भ्रमन्ति। छात्रौ पठतः । वयं भ्रमामः । हारौ त्रुटतः । नापितौ क्षुरतः । वानराः आरोहन्ति । वृद्धौ स्खलतः । युवकाः चलन्ति । बालिके क्रन्दतः । नृपाः यजन्ति । विप्रौ जपतः। भिक्षुकौ यातः । आवां चलावः। एते कथयन्ति । शृगालाः क्रोशन्ति।

१२.५ *प्रथमपुरुषे परिवर्तनं कुरुत ।*

अहं गच्छामि । *(सः गच्छति ।)* आवां पठावः । वयं हसामः । त्वं पठसि। युवां लिम्पथः। यूयं जपथ । अहं धावामि । आवां सृजावः । वयं त्यजामः । त्वं क्रुध्यसि। युवां नृत्यथः। युवां काङ्क्षथः । यूयं क्षुरथ । वयं भ्रमामः । यूयं स्खलथ। अहं वाञ्छामि। आवां पठावः । त्वं क्रन्दसि । युवां धावथः । यूयं जपथ। वयं चर्वामः । अहं यजामि । आवां क्रीडावः। त्वं वदसि । युवां मूर्छथः। यूयं शोचथ। अहं जीवामि । आवां हसावः । वयं रक्षामः । त्वं तरसि । युवां क्रुध्यथः । यूयं किरथ । अहं तिष्ठामि । आवां जिघ्रावः। वयं नयामः। त्वं सीदसि । युवां पृच्छथः। यूयं क्रोशथ । अहं गच्छामि । आवां क्षिपावः । वयं नमामः ।

१२.६ *मध्यमपुरुषे परिवर्तनं कुरुत ।*

सः गच्छति । *(त्वं गच्छसि ।)* तौ पठतः । ते हसन्ति । अहं जपामि । आवां क्रीडावः। वयं यजामः । वायुः चलति । श्यामौ क्रोशतः । याचकौ याचतः। रामः पश्यति। आवां सृजावः । हरयः गर्जन्ति । मुनयः तपन्ति । वयं नृत्यामः । खलौ तुदतः । अहं स्पृशामि । आवां तिष्ठावः । वयं सृजामः । बालिकाः क्रन्दति। सिंहौ खादतः। मृगाः बिभ्यति । वायवः वान्ति । अहं यच्छामि । आवां भरावः । वयं घातयामः । चौरः चोरयति। गुरू पाठयतः । भटौ जयतः । हरिणाः धावन्ति। मनुजौ पततः। अहं त्यजामि । अनुजाः भ्रमन्ति । भृङ्गाः पीडयन्ति । अहं मुञ्चामि। आवां क्षिपावः । वयं लिखामः । अहं सीदामि। आवां धावावः । वयं नमामः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१२.७ *उत्तमपुरुषे परिवर्तनं कुरुत ।*

सः पठति । *(अहं पठामि ।)* तौ हसतः। ते प्रविशन्ति । त्वं लिखसि । युव धावथः । यूयं चलथ । रामः याचति । देवौ वदतः । त्वं नमसि । युवां सृजथः यूयं लिम्पथ । गुरवः पाठयन्ति । छात्रौ पठतः । ते त्यजन्ति । त्वं हससि बालिकाः रुदन्ति । युवां नयथः । यूयं जयथ । युवां वाञ्छथः । छात्राः लिखन्ति मुनयः तपन्ति । सा वदति। ते लिम्पन्ति । शिक्षकः पाठयति । मणयः त्रुटन्ति मनुजाः शोचन्ति । नाविकः तरति। यतयः भजन्ति । कवी सृजतः। सिंहाः गर्जन्ति त्वं नमसि । युवां जिघ्रथः । यूयं भ्रमथ। एते कथयन्ति । त्वं काङ्क्षसि। युव क्रीडथः । यूयं स्खलथ । भटाः रक्षन्ति । एतौ क्षिपतः। खलः निन्दति । मेषाः धावन्ति । ते वदन्ति। त्वं क्रुध्यसि । युवां कुप्यथः । यूयं चिन्तयथः। कृषकः सिञ्चति । वानरौ आरोहतः ।

१२.८ *कोष्ठस्थधातूननुसृत्य रिक्तस्थानं पूरयत ।*

१) रामः .... (स्पृश्) । २) सीता .... (खाद्)।
३) हरिः .... (गै) । ४) रमे .... (क्रीड्)।
५) बालिकाः .... (पठ्) । ६) त्वं ....(लिख्)।
७) युवां .... (नम्) । ८) यूयं .... (भ्रम्)।
९) अहं .... (हस्) । १०) आवां .... (वद्)।
११) वयं .... (सद्) । १२) केशवः .... (भी)।
१३) सिंहः .... (हन्) । १४) भटाः .... (जि) ।
१५) अहं .... (स्था) । १६) त्वं .... (क्रुध्) ।
१७) व्याघ्रौ ....(गर्ज्) । १८) कवयः .... (सृज्)।
१९) भृङ्गाः .... (गुञ्ज्) । २०) हरयः .... (गर्ज्) ।
२१) वृद्धौ .... (स्खल्) । २२) मूर्खाः .... (निन्द्)।
२३) हरिणाः .... (धाव्) । २४) त्वं .... (भज्) ।
२५) युवां .... (कथ्) । २६) यूयं .... (सिञ्च्)।
२७) मूर्खौ .... (तुद्) । २८) फले .... (पत्) ।
२९) वयं .... (पा) । ३०) एते .... (पा) ।

१२.९ *निम्नलिखितधातूनां वर्तमाने (लटि) रूपाणि लिखत ।*

पठ्, हस्, गम्, क्रन्द्, पच्, त्यज्, पा, त्रुट्, सृज्, क्षम्, दृश्, वद्, क्रीड्, न

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

काङ्क्ष्, भ्रम्, याच्, रक्ष्, वस्, वह्, स्था, हृ, वाञ्छ्, धाव्, चर्, खाद्, तुद्, कृष्, क्षिप्, प्रच्छ्, पृश्, लिख्, विश्, स्फुर्, तुष्, नश्, क्रुध्, वप्, वर्ष्, चर्व्, जीव्, तप्, ज्वल्, घ्रा, भक्ष् ।

१२.१० *त्रिषु लिङ्गेषु निम्नपदानि प्रयुज्य वाक्यानि रचयत ।*

गच्छन् । हसन् । पठन् । क्रीडन् । चलन् । जपन् । जीवन् । ज्वलन् । तर्कयन् । दर्शयन् । नमन् । पतन् । जिघ्रन् । पिबन् । पालयन् । पूजयन् । कुर्वन्। भक्षयन् । भ्रमन् । मुञ्च । रचयन् । आलपन् । वदन् । वसन् । प्रविशन् । वेष्टयन्। शिक्षयन् । श्वसन् । तिष्ठन् । स्पृशन् । स्मरन् । स्वपन् । हसन् । हिंसन् । हरन् ।

१२.११ *लट्लकारसम्बद्धान्यधोलिखितधातुरूपाणि सस्वरं पठित्वा वाक्येषु प्रयोगं कुरुत ।*

भवति	भवतः	भवन्ति	करोति	कुरुतः	कुर्वन्ति
भवसि	भवथः	भवथ	करोषि	कुरुथः	कुरुथ
भवामि	भवावः	भवामः	करोमि	कुर्वः	कुर्मः
हन्ति	हतः	घ्नन्ति	क्रीणाति	क्रीणीतः	क्रीणन्ति
हंसि	हथः	हथ	क्रीणासि	क्रीणीथः	क्रीणीथ
हन्मि	हन्वः	हन्मः	क्रीणामि	क्रीणीवः	क्रीणीमः
ददाति	दत्तः	ददति	दीव्यति	दीव्यतः	दीव्यन्ति
ददासि	दत्थः	दत्थ	दीव्यसि	दीव्यथः	दीव्यथ
ददामि	दद्वः	दद्मः	दीव्यामि	दीव्यावः	दीव्यामः
तुदति	तुदतः	तुदन्ति	रुणद्धि	रुन्धः	रुन्धन्ति
तुदसि	तुदथः	तुदथ	रुणत्सि	रुन्धः	रुन्ध
तुदामि	तुदावः	तुदामः	रुणध्मि	रुन्ध्वः	रुन्ध्मः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयोदशः पाठः

आत्मनेपदप्रयोगः

प्रथमपुरुषे –	एकव.	रामः	लभते
	द्विव.	रामौ	लभेते
	बहुव.	रामाः	लभन्ते
मध्यमपुरुषे –	एकव.	त्वम्	लभसे
	द्विव.	युवाम्	लभेथे
	बहुव.	यूयम्	लभध्वे
उत्तमपुरुषे –	एकव.	अहम्	लभे
	द्विव.	आवाम्	लभावहे
	बहुव.	वयम्	लभामहे

१३.१ *अधोलिखितवाक्यानि पठत ।*

सः लभते । तौ लभेते । ते लभन्ते । सीता लभते । सीते लभेते । सीताः लभन्ते। हरिः लभते । हरी लभेते । हरयः लभन्ते । रामः वर्धते । रामौ वर्धेते । रामाः वर्धन्ते । नदी वर्धते । नद्यौ वर्धेते । नद्यः वर्धन्ते । माता वर्तते । मातरौ वर्तेते। मातरः वर्तन्ते । भ्राता सेवते। भ्रातरौ सेवेते । भ्रातरः सेवन्ते । तारकाः प्रकाशन्ते । राजा यतते । राजानौ यतेते । राजानः यतन्ते। त्वं पचसे । युवां पचेथे। यूयं पचध्वे । अहं सहे । आवां सहावहे । वयं सहामहे।

१३.२ *बहुवचने परिवर्तनं कुरुत ।*

श्यामः वर्धते । *(श्यामाः वर्धन्ते ।)* रामौ एधेते । फले वर्तेते । ज्ञानं वर्धते। सः यतते । भृत्यः सेवते । मृगौ कम्पेते । बालिका नयते । सीते पचेते । हरी मन्येते। आवां खिद्यावहे। युवां रमेथे । ते वर्धेते । नार्यौ उपक्रमेते । मृगः निलयते। अनुजः सङ्गच्छते । कार्यं संपद्यते । राधे प्रतिपद्येते । मूर्खः विप्रतिपद्यते । वृक्षौ उत्पद्येते। श्यामः कुरुते । सा निवर्तते । तौ व्यावर्तेते । कालिका शेते । अहम् अनुशये । कविः क्रीणीते । बालकौ प्रेक्षेते। परीक्षकः परीक्षते। सः उपेक्षते । भावकः समीक्षते। तौ प्रतीक्षेते । बालौ शयाते । अहं श्रये। आवां यतावहे । त्वं सहसे । युवां समीक्षेथे। अहं खिद्ये । आवां नमावहे । सः रमते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१३.३ *द्विवचने परिवर्तनं कुरुत ।*

रामः सेवते । *(रामौ सेवेते ।)* तारकाः द्योतन्ते । सा कम्पते। एताः निवर्तन्ते। मूढाः विप्रतिपद्यन्ते। बालकाः जायन्ते। लता जायते। फलानि पचन्ते। वयं यतामहे। यूयं मन्यध्वे। हरिः सहते । भृत्याः सेवन्ते । अहं नये । वयं कुर्महे। एते रमन्ते । सूर्यः प्रकाशते। बालिकाः वर्धते । त्वं कुरुषे । यूयं सेवध्वे । अहं कुर्वे । वयं सहामहे । सा यतते । मृगाः प्रेक्षन्ते । बालकाः शेरते। त्वं निवर्तसे । यूयं एधध्वे। वयं यतामहे । नारी अनुशेते । परीक्षकाः परीक्षन्ते । बुधाः समीक्षन्ते । अर्जुनः गणयते। वयं गवेषयामहे। ते जुगुप्सन्ते। त्वं जृम्भसे । यूयं तर्जध्वे । ताः तितिक्षन्ते। वयं जपामहे । युवानः त्वरन्ते । वयं दध्महे । त्वं चर्चयसे । ते पराक्रमन्ते ।

१३.४ *एकवचने परिवर्तनं कुरुत ।*

तौ लभेते । *(सः लभते ।)* ताः खिद्यन्ते । ते जुगप्सेते । वयं जृम्भामहे । तौ तर्जेते । भृत्यौ सेवेते । मानवाः लभन्ते । युवां तितिक्षेथे । वयं त्वरामहे । ते गणयेते। तौ प्रकाशेते । यूयं रमध्वे । मीनाः प्लवन्ते । केशवौ ब्रुवाते । बालकाः भजन्ते । आवां संभाषावहे । भिक्षुकाः भिक्षन्ते । शिखराणि भ्राजन्ते । वयं मीमांसामहे। युवकाः यजन्ते । याचकाः याचन्ते । बालकाः आरभन्ते । वयं रोचामहे । स्त्रियः लज्जन्ते । वयं परीक्षामहे । युवां वन्देथे । वयं वस्महे । ते व्यथन्ते । ताः शङ्कन्ते। शिक्षकाः शिक्षन्ते । बालाः शेरते । पर्वताः शोभन्ते। नार्यः सूयन्ते । वृक्षाः स्पन्दन्ते। वयं विस्मयामहे । वस्त्राणि स्रंसन्ते ।

१३.५ *कोष्ठस्थधातूननुसृत्य रिक्तस्थानं पूरयत ।*

१) एतौ .... (वेप्) ।	२) सा .... (तर्ज्) ।
३) ते .... (व्यथ्) ।	४) मूढाः .... (शङ्क्) ।
५) युवकाः .... (यत्) ।	६) तारकाः .... (द्युत्)।
७) वयं .... (याच्) ।	८) तौ .... (प्लव्) ।
९) यूयं .... (त्रप्) ।	१०) सा .... (त्वर्) ।
११) बाला .... (जृम्भ्) ।	१२) ताः .... (रम्) ।
१३) याचकः .... (याच्) ।	१४) युवां .... (नि-वृत्)।
१५) तौ .... (तिज्) ।	१६) युवानः .... (आ-रभ्)।
१७) यूयं .... (पा) ।	१८) ते .... (गवेष्) ।
१९) मुनयः .... (भ्रम्) ।	२०) पितरः .... (ब्रू) ।
२१) यूयं .... (सिञ्च्) ।	२२) बालाः .... (शी) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२३) बालिका .... (जन्) ।
२४) भृत्याः .... (सेव्)।
२५) ते .... (वस्) ।
२६) नार्यः .... (लज्ज्)।
२७) वृक्षौ .... (स्पन्द्) ।
२८) एते .... (कृ) ।
२९) वयं .... (मन्) ।
३०) भावकौ ..... (सम्-ईक्ष्)।

१३.६ *निषेधार्थकवाक्येषु प्रश्नार्थकवाक्येषु च परिवर्तनं कुरुत ।*

(१२.१, १२.२, १२.३, १२.४)

१३.७ *वाक्येषु प्रयोगं कुरुत ।*

लभते । वर्धेते । वर्तन्ते । सेवेथे । यतेथे । पचध्वे। सहे। कम्पते । उत्पद्यते समीक्षते । शेरते । तितिक्षसे । प्रतीक्षते । संभाषते । भ्राजन्ते ।

१३.८ *निम्नधातूनां लटि रूपाणि लिखत ।*

लभ्, वृध्, वृत्, सेव्, यत्, सह्, पच्, मन्, अय्, शी, ईक्ष्, खिद्, द्युत्, जन् रम्, गण्, प्लव्, शिक्ष्, लस्ज्, भिक्ष्, भ्राज्, मन्, कृ ।

१३.९ *वाक्येषु प्रयोगं कुरुत ।*

उपेक्षमाणः । क्रीणानः । लभमानः । भाषमाणः । कुर्वाणः । वर्तमानः वर्धमानः । ईक्षमाणः । यतमानः । संपद्यमानः । छिद्यमानः । जायमानः । दह्यमानः उपदिश्यमानः। चिन्वानः । ग्रथ्यमानः । कृष्यमाणः । निरस्यमानः । शयानः । शोभमानः स्पर्धमानः । याचमानः । यतमानः । मुच्यमानः । मीमांसमानः । भिक्षमाणः ।

१३.१० *लट्लकारसम्बद्धान्यधोलिखितधातुरूपाणि सस्वरं पठित्वा वाक्येषु प्रयोगं कुरुत ।*

शेते	शयाते	शेरते	क्रीणीते	क्रीणाते	क्रीणते
शेषे	शयाथे	शेध्वे	क्रीणीषे	क्रीणाथे	क्रीणीध्वे
शये	शेवहे	शेमहे	क्रीणे	क्रीणीवहे	क्रीणीमहे
दत्ते	ददाते	ददते	वर्धते	वर्धेते	वर्धन्ते
दत्से	ददाथे	दद्ध्वे	वर्धसे	वर्धेथे	वर्धध्वे
ददे	दद्वहे	दद्महे	वर्धे	वर्धावहे	वर्धामहे
तुदते	तुदेते	तुदन्ते	जायते	जायेते	जायन्ते
तुदसे	तुदेथे	तुदध्वे	जायसे	जायेथे	जायध्वे
तुदे	तुदावहे	तुदामहे	जाये	जायावहे	जायामहे
कुरुते	कुर्वाते	कुर्वते			
कुरुषे	कुर्वाथे	कुरुध्वे			
कुर्वे	कुर्वहे	कुर्महे			

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्दशः पाठः

भूतकालिकवाक्यप्रयोगः - १

प्रमथपुरुषे –	एकव.	सः	अपठत्
	द्विव.	तौ	अपठताम्
	बहुव.	ते	अपठन्
मध्यमपुरुषे –	एकव.	त्वम्	अपठः
	द्विव.	युवाम्	अपठतम्
	बहुव.	यूयम्	अपठत
उत्तमपुरुषे –	एकव.	अहम्	अपठम्
	द्विव.	आवाम्	अपठाव
	बहुव.	वयम्	अपठाम

१४.१ *अधोलिखितवाक्यानि पठत ।*

रामः अधावत् । रामौ अधावताम् । रामाः अधावन् । त्वम् अधावः । युवाम् अधावतम् । यूयम् अधावत । अहम् अधावम् । आवाम् आधावाव । वयम् अधावाम । सीता अजिघ्रत् । सीते अजिघ्रताम् । सीताः अजिघ्रन् । त्वम् अजिघ्रः । युवाम् अजिघ्रतम्। यूयम् अजिघ्रत । अहम् अजिघ्रम् । आवाम् अजिघ्राव। वयम् अजिघ्राम । हरिः अपश्यत्। हरी अपश्यताम् । हरयः अपश्यन् । त्वम् अपश्यः । युवाम् अपश्यतम् । यूयम् अपश्यत। अहम् अपश्यम् । आवाम् अपश्याव। वयम् अपश्याम । गुरुः अवदत् । गुरू अवदताम् । गुरवः अवदन् । नदी अवहत्। नद्यौ अवहताम् । नद्यः अवहन् । राजा अगच्छत् । राजानौ अगच्छताम् । राजानः अगच्छन् । त्वम् अगच्छः । युवाम् । अगच्छतम् । यूयम् अगच्छत। अहम् अगच्छम् । आवाम् अगच्छाव । वयम् अगच्छाम ।

१४.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१) रामः किम् अकरोत् ?
२) रामौ किम् अकुरुताम् ?
३) रामाः किम् अकुर्वन् ?
४) अहम् किम् अकरवम् ?
५) आवां किम् अकुर्व ?
६) वयम् किम् अकुर्म ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७) त्वं किम् अकरोः ?
८) युवां किम् अकुरुतम् ?
९) यूयं किम् अकुरुत ?
१०) सीता किम् अकरोत् ?
११) सीते किम् अकुरुताम् ?
१२) सीताः किम् अकुर्वन् ?
१३) कः अपश्यत् ?
१४) कौ अपश्यताम् ?
१५) के अपश्यन् ?
१६) कः अवदत् ?
१७) कौ अवदताम् ?
१८) के अवदन् ?
१९) का अवहत् ?
२०) के अवहताम् ?
२१) काः अवहन् ?
२२) कः अगच्छत् ?
२३) कौ अगच्छताम् ?
२४) के अगच्छन् ?

१४.३ *अधोलिखितवाक्यानां वर्तमाने (लटि) परिवर्तनं कुरुत ।*

श्यामः अपठत् । *(श्यामः पठति ।)* बालाः अगच्छन् । ते अभवन् । त्वम् अक्रन्दः । काः अहसन् । रमे अक्रीडताम् । अहम् अवदम् । रजकाः अक्षालयन्। वानराः अकुप्यन्। त्वम् अकाङ्क्षः । ते अचिकित्सन् । खगाः अकूजन् । वयम् अकृन्ताम । कृषकाः अकर्षन् । त्वम् अकिरः। ते अक्रन्दन् । वयम् अक्रीणीम । त्वम् अक्रोशः। सिंहाः अक्लिश्यन्। युवाम् अक्षिपतम् । वयम् अक्षुध्याम । मूषकाः अखनन् । व्याघ्रौ अखादताम् । त्वम् अगणयः । मक्षिकाः अगुञ्जन् । युवाम् अगुम्फतम् । ते अघोषयन्। सीते अचरताम् । गावः अचर्वन् । बालौ अक्रीडताम्। केशवः अचिनोत् । नायकः अचुम्बत् । तौ अचोरयताम् । ते अछादयन् । तौ अवपताम् । रामः अजपत् । खगाः अजीवन् । ते आज्ञापयन् । अग्नयः अज्वलन्। ताः अटङ्कयन् । सूर्यः अतपत् । छात्राः अतर्कयन् । पितरः अतर्जयन् । मूढाः अतुदन् । मत्स्याः अतृप्यन् । हारः अत्रुटत् । मशकाः अदशन्। ते अद्रुह्यन् । खलौ अनिन्दताम् । केशवौ अपूजयताम्। वयम् अपृच्छाम । युवाम् अभर्त्सयतम् । सः अभृज्जत्। श्यामौ अमार्जयताम् । ते अमुञ्चन् । तौ अमूर्छताम्।

१४.४ *भूतकाले (लङि) परिवर्तनं कुरुत ।*

सः मुञ्चति । तौ मूर्छतः । त्वं सृजसि । तौ यजतः । ते यच्छन्ति । त्वं यासि। ते याचतः । अश्वाः धावन्ति । वयं रक्षामः । युवां रचयथः । यूयं रञ्जयथ। तौ लिम्पतः । वयं लुनीमः । ते वाञ्छन्ति । सः वेत्ति । रामाः व्रजन्ति । हंसौ तरतः। श्यामाः शक्नुवन्ति । अहं स्नामि । आवां स्निह्यावः । लता क्षुभ्यति । बालकाः विकिरन्ति । त्वम् क्रन्दसि । युवां गायथः । त्वम् ग्रससि । तौ जिघ्रतः। ते चर्वन्ति। जलं च्योतति । ते वमन्ति । मुनयः जपन्ति । जनकः जीर्यति । अग्नयः ज्वलन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्त्रियः टङ्कयन्ति । अहं तनोमि । आवां तर्जयावः । वयं तेजयामः । पितरः तृप्यन्ति । वयं जपामः । सीता त्रोटयति । नृपः दण्डयति । वह्निः दहति । तारके भातः । त्वम् उपदिशसि । ते निर्दिशन्ति । हिमं द्रवति । बालकाः उपद्रवन्ति । तौ द्रुह्यतः । आवां दध्वः । घटिके ध्वनतः । वयं ध्यायामः । त्वं लिखसि । भ्रातरः पश्यन्ति । वयं लिम्पामः । ते लिखन्ति । वानराः कुप्यन्ति । बुधाः पठन्ति । मूषकौ प्रविशतः ।

१४.५ *निषेधार्थकवाक्येषु परिवर्तनं कुरुत ।*

(१४.१, १४.३ द्रष्टव्यम्)

१४.६ *प्रश्नार्थकवाक्येषु परिवर्तनं कुरुत ।*

(१४.३, १४.४ द्रष्टव्यम्)

१४.७ *निम्नलिखितधातूनां लङि (भूतकाले) रूपाणि लिखत ।*

पठ्, गम्, भू, क्रन्द्, क्रीड्, हस्, वध्, पाल्, कुप्, काङ्क्ष्, चिकित्स्, कृ, क्षुध्, गुञ्ज्, गण, चि, चुर्, छिद्, हन्, टङ्क्, तप्, तुद्, तृप्, भ्रस्ज्, मृज्, मुञ्च्, दा (ण्), धाव्, रक्ष्, लुञ्, वाञ्छ्, शक्, स्ना, स्निह्, गै, वम्, च्युत्, तन्, नुद्, धा।

१४.८ *वाक्येषु प्रयोगं कुरुत ।*

पठितवान्, पठितवती, गतवान्, गतवती, क्रीडितवान्, क्रीडितवती, हसितवान्, हसितवती, हतवान्, हतवती, कुपितवान्, कुपितवती, गणितवान्, गणितवती, लिखितवान्, लिखितवती, ध्वनितवान्, ध्वनितवती, दृष्टवान्, दृष्टवती, सृष्टवान्, सृष्टवती, प्रविष्टवान्, प्रविष्टवती, उक्तवान्, उक्तवती, घोषितवान्, घोषितवती, आज्ञापितवान्, आज्ञापितवती, श्रुतवान्, श्रुतवती, हृतवान्, हृतवती, विहसितवान्, विहसितवती, उपदिष्टवान्, उपदिष्टवती, निर्दिष्टवान्, निर्दिष्टवती, दग्धवान्, दग्धवती, तृप्तवान्, तृप्तवती, धावितवान्, धावितवती, ज्वलितवान्, ज्वलितवती ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चदशः पाठः

भूतकालिकवाक्यप्रयोगः - २

प्रथमपुरुषे –	एकव.	सः	अलभत
	द्विव.	तौ	अलभेताम्
	बहुव.	ते	अलभन्त
मध्यमपुरुषे –	एकव.	त्वम्	अलभथाः
	द्विव.	युवाम्	अलभेथाम्
	बहुव.	यूयम्	अलभध्वम्
उत्तमपुरुषे –	एकव.	अहम्	अलभे
	द्विव.	आवाम्	अलभावहि
	बहुव.	वयम्	अलभामहि

१५.१ *अधोलिखितवाक्यानि पठत ।*

श्यामः अलभत । रामौ अवर्धेताम् । उमेशाः अवर्तन्त । त्वम् अरमथाः । युवाम् असहेथाम्। यूयम् अमन्यध्वम्। सः अखिद्यत । तौ अवर्तेताम् । ते अवर्धन्त। त्वं अयतथाः। युवाम् अत्रपेताम्। सा अत्वरत। बाला अजृम्भत । याचकौ अयाचेताम्। ते न्यवर्तन्त । त्वं अतितिक्षथाः । युवकाः आरभन्त । ऋषयः अभजन्त। बालिका अजायत । वयम् अमन्यामहि । नार्यः अलज्जन्त । अहं प्रारेभे। ते अशेरन्त । बालकाः असेवन्त । तारके प्राकाशेताम् । त्वम् अलज्जथाः। वृक्षौ अस्पन्दताम् । पर्वताः अभ्राजन्त । सूर्यः अद्योतत । लताः अवेपन्त । हिमम् अशोभत।

१५.२ *भूतकाले परिवर्तनं कुरुत ।*

(१३.१, १३.२, १३.३, १३.४ द्रष्टव्यम्)

१५.३ *कोष्ठस्थधातूननुसृत्य रिक्तस्थानं पूरयत ।*

१) रामः ...अत्रप्यत... (अ + त्रप्)
२) सीते ...अलभेताम् (अ + लभ्)
३) रामाः .... (अ + तर्ज्)
४) त्वं .... (अ + वृध्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५) युयम् .... (अ + ब्रू)
६) युवाम् .... (अ + सेव्)
७) अहम् .... (अ + कथ्)
८) आवाम् .... (अ + त्वर्)
९) वयम् .... (अ + भज्)
१०) तारकाः .... (प्र–अ+काश्)

१५.४ *निम्नलिखितधातूनां लङि (भूतकाले) रूपाणि लिखत ।*

लभ्, वृध्, वृत्, रम्, सह्, मन्, खिद्, तितिक्ष्, लस्ज्, काश्, भ्राज्, द्युत्, वेप्, शुभ्, नी, शिक्ष्, श्लाघ्, स्पन्द्, कृ ।

१५.५ *लङ्लकारसम्बद्धान्यधोलिखितधातुरूपाणि सस्वरं पठित्वा वाक्येषु प्रयोगं कुरुत ।*

अभवत्	अभवताम्	अभवन्	अकुरुत	अकुर्वाताम्	अकुर्वन्त
अभवः	अभवतम्	अभवत	अकुरुथाः	अकुर्वाथाम्	अकुरुध्वम्
अभवम्	अभवाव	अभवाम	अकुर्वि	अकुर्वहि	अकुर्महि
अशेत	अशयाताम्	अशेरत	अक्रीणात्	अक्रीणीताम्	अक्रीणन्
अशेथाः	अशयाथाम्	अशेध्वम्	अक्रीणाः	अक्रीणीतम्	अक्रीणीत
अशयि	अशेवहि	अशेमहि	अक्रीणाम्	अक्रीणीव	अक्रीणीम
अहन्	अहताम्	अघ्नन्	अक्रीणीत	अक्रीणाताम्	अक्रीणत
अहन्	अहतम्	अहत	अक्रीणीथाः	अक्रीणाथाम्	अक्रीणीध्वम्
अहनम्	अहन्व	अहन्म	अक्रीणि	अक्रीणीवहि	अक्रीणीमहि
अददात्	अदत्ताम्	अददुः	अवर्धत	अवर्धेताम्	अवर्धन्त
अददाः	अदत्तम्	अदत्त	अवर्धथाः	अवर्धेथाम्	अवर्धध्वम्
अददाम्	अदद्व	अदद्म	अवर्धे	अवर्धावहि	अवर्धामहि
अदत्त	अददाताम्	अददत	अदीव्यत्	अदीव्यताम्	अदीव्यन्
अदत्थाः	अददाथाम्	अदद्ध्वम्	अदीव्यः	अदीव्यतम्	अदीव्यत
अददि	अदद्वहि	अदद्महि	अदीव्यम्	अदीव्याव	अदीव्याम
अतुदत्	अतुदताम्	अतुदन्	अजायत	अजायेताम्	अजायन्त
अतुदः	अतुदतम्	अतुदत	अजायथाः	अजायेथाम्	अजायध्वम्
अतुदम्	अतुदाव	अतुदाम	अजाये	अजायावहि	अजायामहि
अकरोत्	अकुरुताम्	अकुर्वन्	अरुणत्	अरुन्धाम्	अरुन्धन्
अकरोः	अकुरुतम्	अकुरुत	अरुणः	अरुन्धम्	अरुन्ध
अकरवम्	अकुर्व	अकुर्म	अरुणधम्	अरुन्ध्व	अरुन्ध्म

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षोडशः पाठः

भविष्यत्कालिकवाक्यप्रयोगः

प्रथमपुरुषे–	एकव.	सः	पठिष्यति / लप्स्यते ।
	द्विव.	तौ	पठिष्यतः / लप्स्येते ।
	बहुव.	ते	पठिष्यन्ति / लप्स्यन्ते ।
मध्यमपुरुषे –	एकव.	त्वम्	पठिष्यसि / लप्स्यसे ।
	द्विव.	युवाम्	पठिष्यथः / लप्स्येथे ।
	बहुव.	यूयम्	पठिष्यथ / लप्स्यध्वे ।
उत्तमपुरुषे –	एकव.	अहम्	पठिष्यामि / लप्स्ये ।
	द्विव.	आवाम्	पठिष्यावः / लप्स्यावहे ।
	बहुव.	वयम्	पठिष्यामः / लप्स्यामहे ।

१६.१ *अधोलिखितवाक्यानि पठत ।*

रामः लेखिष्यति । तौ वदिष्यतः । ते हसिष्यन्ति । त्वं धाविष्यसि । युवां रक्षिष्यथः। यूयं क्रीडिष्यथ । अहं गमिष्यामि । आवाम् आगमिष्यावः । वयं पतिष्यामः । सीता नर्तिष्यति! रमे दास्यतः । विमला भेष्यति । त्वं विधास्यसि । युवां हास्यथः। यूयं धास्यथ। अहम् आप्स्यामि । केशवः शक्ष्यति । रामौ धाविष्यतः। अर्जुनाः चेष्यन्ति । त्वं मोक्ष्यसि। युवां सेक्ष्यथः । यूयं तर्पिष्यथ । गोविन्दः प्रक्ष्यति। दिनेशौ प्रक्ष्यतः । उमेशाः प्रक्ष्यन्ति । रामौ भोक्ष्येते । देवाः ग्रहीष्यन्ते । युवां नुत्स्यथः । माता पक्ष्यते । जनकः पालयिष्यते । वयं वर्धिष्यामहे। पण्डिताः भोत्स्यन्ते । तौ भर्त्सयिष्येते । ते भाषिष्यन्ते । सः मनिष्यते । तौ भञ्जयिष्येते।

१६.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१) रामः किं करिष्यति ?
२) तौ किं करिष्यतः ?
३) ते किं करिष्यन्ति ?
४) अहं किं करिष्यामि ?
५) आवां किं करिष्यावः ?
६) वयम् किं करिष्यामः ?
७) त्वं किं करिष्यसि ?
८) युवां किं करिष्यथः ?
९) यूयं किं करिष्यथ ?
१०) का नर्तिष्यति ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११) के दास्यतः ?	१२) का भेष्यति ?
१३) कः शक्ष्यति ?	१४) कौ धाविष्यतः ?
१५) के चेष्यन्ति ?	१६) कः प्रक्ष्यति ?
१७) कौ प्रक्ष्यतः ?	१८) के प्रक्ष्यन्ति ?
१९) के ग्रहीष्यन्ति ?	२०) का पक्ष्यते ?

१६.३ ***भूतकाले वर्तमानकाले च परिवर्तनं कुरुत ।***

(द्र. १६.१)

१६.४ ***भविष्यत्काले परिवर्तनं कुरुत ।***

(द्र. १२.१, १२.२, १२.३, १२.४, १२.५, १२.६, १२.७, १३.१, १३.२, १३.३, १३.४, १४.१, १४.३, १४.४, १५.१)

१६.५ ***कोष्ठस्थधातूननुसृत्य भविष्यत्काले रिक्तस्थानं पूरयत ।***

१)	रामः	(पठ्)	छात्राः	(भाष्)
२)	श्यामौ	(लभ्)	गर्दभः	(वह्)
३)	सीताः	(सह्)	पितामहः	(गम्)
४)	त्वं	(तर्ज्)	पितृव्यः	(बुध्)
५)	युवां	(शी)	भ्रातृजाया	(पच्)
६)	यूयं	(वृत्)	भ्रात्रीयः	(क्रीड्)
७)	विमला	(यत्)	मातुलः	(दृश्)
८)	पार्वत्यौ	(ब्रू)	मातुलानी	(स्निह्)
९)	हरयः	(गर्ज्)	सहोदरः	(कुप्)
१०)	आदित्यः	(प्र-काश्)	स्नुषा	(लज्ज्)

१६.६ ***निम्नलिखितधातूनां भविष्यति (लृटि) रूपाणि लिखत ।***

लिख्, वद्, हस्, धाव्, रक्ष, क्रीड्, गम्, पत्, नृत्, दा, भी, हा, घा, आप्, शक्, चि, मुच्, सिच्,तृप्, लभ्, भुज्, वृध्, पच्, बुध्, मन्, भाष्, ईक्ष्, ग्रह्, द्युत्।

१६.७ ***वाक्येषु प्रयोगं कुरुत ।***

पठिष्यन्, धाविष्यन्, दास्यमानः, पक्ष्यमाणः, सेक्ष्यमाणः, विधास्यमानः, द्योतिष्यमाणः, लप्स्यमानः, करिष्यन्, ग्रहीष्यमाणः, प्राप्स्यन्, कथयिष्यन्, नर्तिष्यन्, हरिष्यन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१६.८ *निम्नलिखितपदानि प्रयुज्य वाक्यानि रचयत ।*

१	२	३	४	५	६	७	८	९	१०
एकः	द्वौ	त्रयः	चत्वारः	पञ्च	षट्	सप्त	अष्ट	नव	दश
एका	द्वे	तिस्रः	चतस्रः	पञ्च	षट्	सप्त	अष्ट	नव	दश
एकम्	द्वे	त्रीणि	चत्वारि	पञ्च	षट्	सप्त	अष्ट	नव	दश

१६.९ *लृट्लकारसम्बद्धान्यधोलिखितधातुरूपाणि सस्वरं पठित्वा वाक्येषु प्रयोगं कुरुत ।*

भविष्यति भविष्यतः भविष्यन्ति
भविष्यसि भविष्यथः भविष्यथ
भविष्यामि भविष्यावः भविष्यामः
शयिष्यते शयिष्येते शयिष्यन्ते
शयिष्यसे शयिष्येथे शयिष्यध्वे
शयिष्ये शयिष्यावहे शयिष्यामहे
हनिष्यति हनिष्यतः हनिष्यन्ति
हनिष्यसि हनिष्यथः हनिष्यथ
हनिष्यामि हनिष्यावः हनिष्यामः
दास्यति दास्यतः दास्यन्ति
दास्यसि दास्यथः दास्यथ
दास्यामि दास्यावः दास्यामः
दास्यते दास्येते दास्यन्ते
दास्यसे दास्येथे दास्यध्वे
दास्ये दास्यावहे दास्यामहे
तोत्स्यति तोत्स्यतः तोत्स्यन्ति
तोत्स्यसि तोत्स्यथः तोत्स्यथ
तोत्स्यामि तोत्स्यावः तोत्स्यामः
करिष्यति करिष्यतः करिष्यन्ति
करिष्यसि करिष्यथः करिष्यथ
करिष्यामि करिष्यावः करिष्यामः

करिष्यते करिष्येते करिष्यन्ते
करिष्यसे करिष्येथे करिष्यध्वे
करिष्ये करिष्यावहे करिष्यामहे
क्रेष्यति क्रेष्यतः क्रेष्यन्ति
क्रेष्यसि क्रेष्यथः क्रेष्यथ
क्रेष्यामि क्रेष्यावः क्रेष्यामः
क्रेष्यते क्रेष्येते क्रेष्यन्ते
क्रेष्यसे क्रेष्येथे क्रेष्यध्वे
क्रेष्ये क्रेष्यावहे क्रेष्यामहे
वर्धिष्यते वर्धिष्येते वर्धिष्यन्ते
वर्धिष्यसे वर्धिष्येथे वर्धिष्यध्वे
वर्धिष्ये वर्धिष्यावहे वर्धिष्यामहे
देविष्यति देविष्यतः देविष्यन्ति
देविष्यसि देविष्यथः देविष्यथ
देविष्यामि देविष्यावः देविष्यामः
जनिष्यते जनिष्येते जनिष्यन्ते
जनिष्यसे जनिष्येथे जनिष्यध्वे
जनिष्ये जनिष्यावहे जनिष्यामहे
रोत्स्यति रोत्स्यतः रोत्स्यन्ति
रोत्स्यसि रोत्स्यथः रोत्स्यथ
रोत्स्यामि रोत्स्यावः रोत्स्यामः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तदशः पाठः

आज्ञार्थकवाक्यप्रयोगः

परस्मैपदे –			
प्रथमपुरुषे –	एकव.	सः	पठतु ।
	द्विव.	तौ	पठताम् ।
	बहुव.	ते	पठन्तु ।
मध्यमपुरुषे –	एकव.	त्वम्	पठ ।
	द्विव.	युवाम्	पठतम् ।
	बहुव.	यूयम्	पठत ।
उत्तमपुरुषे –	एकव.	अहम्	पठानि ।
	द्विव.	आवाम्	पठाव ।
	बहुव.	वयम्	पठाम ।
आत्मनेपदे –			
प्रथमपुरुषे-	एकव.	सः	लभताम् ।
	द्विव.	तौ	लभेताम् ।
	बहुव.	ते	लभन्ताम् ।
मध्यमपुरुषे –	एकव.	त्वम्	लभस्व ।
	द्विव.	युवाम्	लभेथाम् ।
	बहुव.	यूयम्	लभध्वम् ।
उत्तमपुरुषे –	एकव.	अहम्	लभै ।
	द्विव.	आवाम्	लभावहै ।
	बहुव.	वयम्	लभामहै ।

१७.१ ***अधोलिखितवाक्यानि पठत ।***

सः गच्छतु। तौ गच्छताम् । ते गच्छन्तु । त्वं गच्छ । युवां गच्छतम् । यूयं गच्छत । अहम् गच्छानि । आवां गच्छाव । वयं गच्छाम । रामः भ्रमताम् । तौ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भ्रमेताम् । ते भ्रमन्ताम्। त्वं भ्रमस्व । युवां भ्रमेथाम् । यूयं भ्रमध्वम् । अहं भ्रमै आवां भ्रमावहै । वयं भ्रमामहै । सः सहताम् । तौ सहेताम् । ते सहन्ताम् । त्वं सहस्व। युवां सहेथाम् । यूयं सहध्वम् । अहं सहै । आवां सहावहै । वयं सहामहै

१७.२ *आज्ञार्थकवाक्ये (लोटि) परिवर्तनं कुरुत ।*

(द्र. १२.१, १२.२, १२.३, १२.४, १२.५, १२.६, १२.७, १३.१, १३.२ १३.३, १३.४, १४.३)

१७.३ *निम्नलिखितधातूनामाज्ञार्थे (लोटि) रूपाणि लिखत ।*

गम्, भ्रम्, सह्, आ-रभ्, रम्, हस्, दृश्, हन्, क्रीड्, नृत्, पठ्, त्यज्, नम् पा, वस्, स्था, मृ, तुष्, क्षुध्, गै, सिच्, घ्रा, स्मृ, बुध्, ईक्ष्, सृज्, पा, वृध्, लभ्।

१७.४ *लोट्लकारसम्बद्धान्यधोलिखितधातुरूपाणि सस्वरं पठित्वा वाक्येषु प्रयोग कुरुत ।*

भवतु	भवताम्	भवन्तु	कुरुताम्	कुर्वाताम्	कुर्वताम्
भव	भवतम्	भवत	कुरुष्व	कुर्वाथाम्	कुरुध्वम्
भवानि	भवाव	भवाम	करवै	करवावहै	करवामहै
शेताम्	शयाताम्	शेरताम्	क्रीणातु/क्रणीतात्	क्रीणीताम्	क्रीणन्तु
शेष्व	शयाथाम्	शेध्वम्	क्रीणीहि/क्रणीतात्	क्रीणीतम्	क्रीणीत
शयै	शयावहै	शयामहै	क्रीणानि	क्रीणीव	क्रीणीम
हन्तु/हतात्	हताम्	घ्नन्तु	क्रीणीताम्	क्रीणाताम्	क्रीणताम्
जहि/हतात्	हतम्	हत	क्रीणींष्व	क्रीणाथाम्	क्रीणीध्वम्
हनानि	हनाव	हनाम	क्रीणै	क्रीणावहै	क्रीणामहै
ददातु/दत्तात्	दत्ताम्	ददतु	वर्धताम्	वर्धेताम्	वर्धन्ताम्
देहि/दत्तात्	दत्तम्	दत्त	वर्धस्व	वर्धेथाम्	वर्धध्वम्
ददानि	ददाव	ददाम	वर्धै	वर्धावहै	वर्धामहै
दत्ताम्	ददाताम्	ददताम्	दीव्यतु/	दीव्यताम्	दीव्यन्तु
दत्स्व	ददाथाम्	दद्ध्वम्	दीव्य	दीव्यतम्	दीव्यत
ददै	ददावहै	ददामहै	दीव्यानि	दीव्यव	दीव्याम
तुदतु	तुदताम्	तुदन्तु	जायताम्	जायेताम्	जायन्ताम्
तुद	तुदतम्	तुदत	जायस्व	जायेथाम्	जायध्वम्
तुदानि	तुदाव	तुदाम	जायै	जायावहै	जायामहै
करोतु/करुतात्	कुरुताम्	कुर्वन्तु	रुणद्धु/रुन्धात्	रुन्धाम्	रुन्धन्तु
कुरु/कुरुतात्	कुरुतम्	कुरुत	रुन्ध/रुन्धात्	रुन्धम्	रुन्ध
करवाणि	करवाव	करवाम	रुणधानि	रुणधाव	रुणधाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टादशः पाठः

सम्भावनार्थकवाक्यप्रयोगः

प्रथमपुरुषे-	एकव.	सः	पठेत् / लभेत ।
	द्विव.	तौ	पठेताम् /लभेयाताम् ।
	बहुव.	ते	पठेयुः / लभेरन् ।
मध्यमपुरुषे -	एकव.	त्वम्	पठेः / लभेथाः।
	द्विव.	युवाम्	पठेतम् / लभेयाथाम् ।
	बहुव.	यूयम्	पठेत / लभेध्वम् ।
उत्तमपुरुषे -	एकव.	अहम्	पठेयम् / लभेय ।
	द्विव.	आवाम्	पठेव / लभेवहि ।
	बहुव.	वयम्	पठेम / लभेमहि ।

१८.१ अधोलिखितवाक्यानि पठत-

रामः पठेत् । रामौ वदेताम् । रमाः पठेयुः । ते गच्छेयुः । त्वं गच्छेः । युवाम् गच्छेतम् । यूयम् गच्छेत । अहम् गच्छेयम् । आवाम् गच्छेव । वयम् गच्छेम। स लभेत । तौ लभेयाताम् । ते लभेरन् । हरिः हिंस्यात् । अरी हिंस्याताम्। अरयः हिंस्युः । त्वम् हिंस्याः । युवाम् हिंस्यातम् । यूयं हिंस्यात । अहम् हिंस्याम्। आवाम् हिंस्याव । वयम् हिंस्याम । मशकः दशेत् । धनिकः यच्छेत् । बानरौ त्यजेताम् । भ्राता पश्येत् । अग्नयः दहेयुः । अहम् भजेयम् । आवाम् वसेव । वयम् हन्याम । केशवः दुह्यात् । तौ दुह्याताम् । ते दुह्युः । त्वम् लिह्याः । युवाम् शयीयाथाम् । यूयम् रुद्यात । बालकाः स्वप्युः । वयम् जागृयाम । उमा दरिद्रियात्। सीते जुहुयाताम् । त्वम् विभृयाः । सा मिमीत । ते मिमीयाताम्। ताः मिमीरन् ।

१८.२ अधोलिखितप्रश्नानामुत्तराणि लिखत-

१. रामः किं कुर्यात् ?
२. रामौ किं कुर्याताम् ?
३. रामाः किं कुर्युः ?
४. सते किं कुर्याताम् ?
५. के गच्छेयुः ?
६. अहम् किं कुर्याम् ?
७. आवाम् किं कुर्याव ?
८. वयम् किं कुर्याम् ?
९. त्वम् किं कुर्याः ?
१०. युवाम् किं कुर्यातम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१८.३ सम्भावनार्थकवाक्येषु परिवर्तनं कुरुत-

१२.१, १२.२, १२.३, १२.४, १२.५, १३.१, १३.२, १४.१, १५.३, १७.१

१८.४ निम्नलिखित धातूनां विधिर्लिङि रूपाणि लिखत -

गम्, भ्रम्, सह्, आ-रभ्, रम्, हस्, दृश्, हन्, क्रीड्, नृत्, पठ्, त्यज्, नम्, पा, वस्, स्था, मृ, तुष्, क्षुध्, गै, सिच्, घ्रा, स्मृ, बुध्, ईक्ष्, सृज्, पा, वृध्, लभ्, वृत्, सेव्, क्री, कृ, परि-ईक्ष्, यत्, सम्-ईक्ष्, शी, गण, तर्ज, त्वर, चर्च, जन्।

१८.४ लिङ्लकारसम्बद्धान्यधोलिखितधातुरूपाणि सस्वरं पठित्वा वाक्येषु प्रयोगं कुरुत।

भवेत्	भवेताम्	भवेयुः	कुर्वीत	कुर्वीयाताम्	कुर्वीरन्
भवेः	भवेतम्	भवेत	कुर्वीथाः	कुर्वीयाथाम्	कुर्वीध्वम्
भवेयम्	भवेव	भवेम	कुर्वीय	कुर्वीवहि	कुर्वीमहि
शयीत	शयीयाताम्	शयीरन्	क्रीणीयात्	क्रीणीयाताम्	क्रीणीयुः
शयीथाः	शयीयाथाम्	शयीध्वम्	क्रीणीयाः	क्रीणीयातम्	क्रीणीयात
शयीय	शयीवहि	शयीमहि	क्रीणीयाम्	क्रीणीयाव	क्रीणीयाम
हन्यात्	हन्याताम्	हन्युः	क्रीणीत	क्रीणीयाताम्	क्रीणीरन्
हन्याः	हन्यातम्	हन्यात	क्रीणीथाः	क्रीणीयाथाम्	क्रीणीध्वम्
हन्याम्	हन्याव	हन्याम	क्रीणीय	क्रीणीवहि	क्रीणीमहि
दद्यात्	दद्याताम्	दद्युः	वर्धेत	वर्धेयाताम्	वर्धेरन्
दद्याः	दद्यातम्	दद्यात	वर्धेथाः	वर्धेयाथाम्	वर्धेध्वम्
दद्याम्	दद्याव	दद्याम	वर्धेय	वर्धेवहि	वर्धेमहि
ददीत	ददीयाताम्	ददीरन्	दीव्येत्	दीव्येताम्	दीव्येयुः
ददीथाः	ददीयाथाम्	ददीध्वम्	दीव्येः	दीव्येतम्	दीव्येत
ददीय	ददीवहि	ददीमहि	दीव्येयम्	दीव्येव	दीव्येम
तुदेत्	तुदेताम्	तुदेयुः	जायेत	जायेयाताम्	जायेरन्
तुदेः	तुदेतम्	तुदेत	जायेथाः	जायेयाथाम्	जायेध्वम्
तुदेयम्	तुदेव	तुदेम	जायेय	जायेवहि	जायेमहि
कुर्यात्	कुर्याताम्	कुर्युः	रुन्ध्यात्	रुन्ध्याताम्	रुन्ध्युः
कुर्याः	कुर्यातम्	कुर्यात	रुन्ध्याः	रुन्ध्यातम्	रुन्ध्यात
कुर्याम्	कुर्याव	कुर्याम	रुन्ध्याम्	रुन्ध्याव	रुन्ध्याम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकोनविंशः पाठः

अनुक्ते कर्मणि द्वितीया

	एकव.	रामः	पाठम्	पठति
प्रथमपुरुषे–	द्विव.	रामौ	पाठौ	पठतः
	बहुव.	रामाः	पाठान्	पठन्ति
	एकव.	त्वम्	पाठान्	पठसि
मध्यमपुरुषे –	द्विव.	युवाम्	पाठौ	पठथः
	बहुव.	यूयम्	पाठम्	पठथ
	एकव.	अहम्	पाठम्	पठामि
उत्तमपुरुषे –	द्विव.	आवाम्	पाठौ	पठावः
	बहुव.	वयम्	पाठान्	पठामः

१९.१ *अधोलिखितवाक्यानि पठत ।*

स [1]पुस्तकं पठति । चिन्ताज्वरः निद्रां हरति । क्रियाशीलः सिद्धिं लभते । मार्जारः आखुं न मुञ्चति । रोगाः देहं शत्रव इव प्रहरन्ति । जरा व्याघ्रीव तिष्ठति । गर्धभाः वाजिधुरं न बहन्ति । आतुरः औषधम् इच्छति । वैद्य स्वव्याधिम् अवैति। कविराज व्याधिं हरति । अनुजौ फले खादतः। नृपः प्रजाः रक्षति । वयम् आम्रफलानि खादामः । ते मृद्वीके खादतः। यूयं मोदकं काङ्क्षथ । पौत्रः अक्षोटफलं वाञ्छति । ते पुगिफलम् इच्छन्ति। छात्राः पुस्तकानि धारयन्ति। भागिनेयः तक्रं पिबति । बालकाः दुग्धं पिबन्ति । छात्रौ आज्ञां पालयतः। अनुजा पत्रिकाम् नयति। सिंहः मृगान् हन्ति । मूढाः विवादं कुर्वन्ति। अग्नयः काष्ठानि दहन्ति। छात्रः पुस्तकं धत्ते। वृकाः महिषान् घातयन्ति। भगिन्यः पूपं पचन्ति । माता पायसं ददाति । भृत्यौ दुग्धम् आनयतः। कः रोटिकां न इच्छति? वयं कार्यं प्रारभामहे। माता पुत्रं स्निह्यति। त्वम् अपराधं न सहसे। आवां सुकृत्यम् आचरावः। वयम् ईश्वरं नमामः। भल्लूकाः बदरीफलं भक्षयन्ति । यूयं तान् पाठयथ । सा रम्भां न खादति। लोकसेवायोगः कर्मकरान् नियुङ्क्ते । सचिवः द्विचक्रिकां चालयति । तक्षकः तक्षां रचयति । ते जम्बूरसं पिबन्ति । वयं विद्यालयं गच्छामः। स ग्रामं गच्छन् [2]तृणं स्पृशति ।

१. *कर्तुरीप्सिततमं कर्म । कर्मणि द्वितीया ।* २. *तथायुक्तं चानीप्सितम् ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११.२ *कोष्ठानुसारं कर्मपदानि लिखत ।*

सः (पाठ) पठति ।	तौ (कार्य) कुरुतः ।
ते (चलचित्र) पश्यन्ति ।	अहं (कन्दुक) क्रीडामि ।
आवां (द्रव्य) याचावः ।	वयं (पाद) स्पृशामः ।
बालकः (पत्र) लिखति ।	चौरौ (रूप्यक) हरतः ।
आवां (अश्रु) मुञ्चावः ।	बालिके (प्राङ्गण) लिम्पतः ।
विष्णू (नदी) तरतः ।	कृषकाः (क्षेत्र) खनन्ति ।
ते (जल) पिबन्ति ।	सः (भृत्य) तर्जति ।
चौराः (भाण्ड) चोरयन्ति ।	गर्दभौ (भार) वहतः ।
त्वं (छात्र) पाठयसि ।	हरिः (कार्य) अकरोत् ।
कवी (काव्य) असृजताम् ।	मुनयः (मन्त्र) अजपन् ।
तौ (पत्र) अलिखताम् ।	त्वं (पुस्तक) अपठः ।
यूयं (पारितोषिक) लभध्वे ।	अहम् (चित्र) अपश्यम् ।
आवां (कथा) शृणुवः ।	वयं (छात्र) शिक्षामहे ।
त्वं (अन्न) भिक्षसे ।	केशवः (भिक्षा) याचते ।
सः (अस्मद्) ताडयति ।	तौ (युष्मद्) पीडयतः ।
सीता (तत्) स्निह्यति ।	शुकः (तत्) अनुकरोति ।
महात्मानः (स्वर्गति) प्रार्थयन्ते ।	छात्रौ (पाठ) अभ्यस्यतः ।
सः (धूर्त) निरस्यति ।	रजः (आकाश) व्याप्नोति ।
त्वं (अस्मद्) किङ्करम् अवेहि ।	सः (स्वामिन्) अभ्येति ।
सेवकः (स्वामिन्) अन्वेति ।	चातकः (पयोधर) प्रार्थयते ।
अलसः (कर्तव्य) उपेक्षते ।	किमर्थं (अस्मद्) तिरस्करोषि ।
ते (सत्यमार्ग) अनुसरन्ति ।	कामः (चित्त) विकरोति ।
स (गृह) आगच्छत् ।	गुरुः (युष्मद्) अनुगृह्णाति ।
बालिकाः (कुसुम) अचिन्वन् ।	रामः (गङ्गा) उदतरत् ।
गुरुवः (विद्या) वितरन्ति ।	यूयं (स्थान) निर्दिशत ।
केशवः (वस्त्र)न परिदधाति ।	त्वं (मित्र) अनुनय ।
युवां (सलिल) आनयतम् ।	सन्तः (सुख) अनुभवन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११.३ *अधस्तनपदानां सकर्म वाक्येषु प्रयोगं कुरुत ।*

[३]व्याप्नोति । प्राप्नोति । समाप्नोति । उपैति । अत्येति । प्रेक्षते । परीक्षते । प्रतीक्षते। प्रक्षिपसि । आक्षिपसि । उत्क्षिपतः । सङ्क्षिपसि । अनुगच्छति । आनयति। प्रहरन्ति। संहरतु । उपसंहरति। निर्दिशति । आदिशति । सन्दिशति । अपनयति । उद्गच्छति । पाठयति। कथयति । वादयति । पश्यति । शृणोति । जिघ्रति । पिबन्ति। अलिखत् । अतरन् । नियुङ्क्ते।

११.४ *अधोलिखितवाक्यानि पठत ।*

विद्याम्[४] अन्तरेण सुखं न भवति । वाग्वतीं मनोहराम् च अन्तरा कोटेश्वरः अस्ति। त्वाम्[५] ऋते अहं न जीवामि । [६]केशवं विना धर्मः न जायते । [७]गृहम् उत्तरेण तडागः अस्ति। [८]भवनम् अभितः बाटिकाः सन्ति । ज्ञानिनं परितः भक्ताः निवसन्ति । वनस्थलीं निकषा विष्णुमती वहति । ग्रामं निकषा वनं विद्यते । [९]वयं मासं निवसामः । केशवो [१०]मासमधीते। क्रोशं नदी कुटिला वहति । [११]पितरम् अनु पुत्राः गच्छन्ति । दीनं प्रति दयां कुरु । मूर्खजीवनं धिक् अस्ति। [१२]पर्वतं सर्वतः वृक्षाः वर्तन्ते । वाग्वतीम् उभयतः तरवः विद्यन्ते । [१३]बालकः शय्याम् अधिशेते । रमेशः गृहम् अधितिष्ठति । श्री ५ वीरेन्द्रः सिंहासनम् अध्यास्ते । विष्णुः वैकुण्ठम् अनुवसति। वयं [१४]गृहम् उपवसामः। पशुपतिनाथः देवपत्तनम् अधिवसति । भक्ताः देवमन्दिरम् आवसन्ति । मनः धर्मम् [१५]अभिनिविशते । मृगः [१६]सत्वरं धावति । नृपः [१७]शत्रुं स्वर्गमगमयत् ।

११.५ *प्रत्येकं दशवाक्येषु प्रयोगं कुरुत ।*

शीघ्रम् । अभिनिविशते । आवसतः । अधिवसामः । उपवसथ । अध्यासते। अधितिष्ठसि । अध्यतिष्ठत् । अधिशेरते । धिक् । प्रति । अनु । मासम् । योजनम्। क्रोशम्। निकषा । समया । हा । परितः । अभितः । सर्वतः। उपरि । उभयतः। अधोऽधः। अन्तरा । अन्तरेण । विना । ऋते । उत्तरेण । पुरुषं पुरुषम् ।

३. उपसर्गेण धात्वर्थो बलादन्यत्र नीयते । प्रहाराहारसंहारविहारपरिहारवत् । ४. अन्तराऽन्तरेण युक्ते । ५. ततोऽन्यत्रापि दृश्यते इति द्वितीया, ऋते द्वितीया चेति चान्द्रं सूत्रम् । ६. पृथग्विनानाभिस्तृतीयाऽन्यतरस्यामिति पक्षे द्वितीया । ७. एनपा द्वितीया । ८. अभितः परितः समयानिकषाहाप्रतियोगेऽपि । ९. अकर्मकधातुभिर्योगे देशःकालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम् । १०. कालाध्वनोरत्यन्तसंयोगे । ११. लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः । १२. उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । सर्वतोऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते । १३. अधिशीङ्स्थासां कर्म । १४. उपान्वध्याङ्वसः । १५. अभिनिविशश्च । १६. क्रियाविशेषणे द्वितीया क्लीबत्वमेकत्वञ्च । १७. गतिबुद्धिप्रत्यवसानार्थशब्द-कर्माकर्मकाणामणि कर्ता स णौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११.६ *कोष्ठस्थशब्दाननुसृत्य रिक्तस्थानं पूरयत ।*

१. भिक्षुकाः .... याचन्ते (पुरुष पुरुष) ।
२. समुद्रः .... विद्यते (शतयोजन) ।
३. .... परितः प्राकाराः सन्ति (भवन) ।
४. .... अधोऽधः गङ्गा वहति (पर्वत) ।
५. नागरिकाः .... सर्वतः भ्रमन्ति (नगर) ।
६. .... धिक् अस्ति । (युष्मद्) ।
७. सिंहः .... अभियाति (करिन्) ।
८. .... अन्तरा मार्गः अस्ति (पुर, वन) ।
९. .... अन्तरेण कः जगत् प्रकाशयति (सूर्य) ।
१०. अहं .... ब्रह्मचर्यं चरामि (संवत्सर) ।
११. याचकाः .... भिक्षन्ते (गृह, गृह) ।
१२. .... अभितः नद्यौ वहतः (उपवन) ।
१३. .... उपर्युपरि पतङ्गाः उड्डीयन्ते (भवन) ।
१४. .... अनु शिष्याः अगच्छन् (गुरु) ।
१५. योद्धुम् .... अन्तरेण न कः अपि शक्नोति (सैनिक) ।
१६. .... अन्तरा केशवः तिष्ठति (युष्मद्, अस्मद्) ।
१७. केशवः .... अधिवसति (मञ्च) ।
१८. वयं .... अध्यास्महे (भूमि) ।
१९. ते .... अधिशेरते (धरणी) ।
२०. .... दक्षिणेन कौशिकी वहति (हिमालय) ।

११.७ *संशोधयत ।*

त्वम् खट्वायाम् अधिशेषे । भवनस्य परितः वाटिकाः सन्ति । गोष्ठस्य अभितः गावः सञ्चरन्ति । गुरोः निकषा छात्राः वसन्ति । भवनस्य समया नद्यः वहन्ति । छात्राः मासे आसते । क्रोशे गिरयः सन्ति । वाटिकायाः सर्वतः पुष्पाणि विकसन्ति । भिक्षुकाः जनाद् जनाद् याचन्ते । तव मम च अन्तरा कुड्यं नास्ति । कृष्णस्य उभयतः गोपालाः तिष्ठन्ति । मूर्खस्य धिक् अस्ति । गङ्गायाः यमुनायाः च अन्तरा प्रयागः वर्तते । शिष्याः आसनेषु अधितिष्ठन्ति । ब्राह्मणाः विष्टरेषु अध्यासते। ज्ञानस्य विना मानवः पशुः भवति । छात्राणाम् अन्तरेण गुरवः न तिष्ठन्ति । कृषकाः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग्रामे गच्छन्ति । ते वने यावत् धावन्ति । स्वामिनः अनु सेवकः गच्छति । दीनस्य प्रति दयां कुरु । नास्तिकाय धिक् यः ईश्वरलीलां न पश्यति ।

११.८ *अधोलिखितवाक्यानि पठत ।*

गोपः [१८]गां पयः [१९]दोग्धि । दरिद्रः राजानं वस्त्रं याचते । राजपुरुषः चौरं शतं दण्डयति। गोपालकाः व्रजं गाः अवरुन्धन्ति । बालकः नरं मार्गं पृच्छति । बालिका लतां पुष्पाणि चिनोति । गुरुः शिष्यान् धर्मं ब्रूते । मुनिः ब्रह्मचारिणः धर्मं शास्ति । नृपतिः शत्रुं राज्यं जयति । देवाः सागरम् अमृतं मथ्नन्ति । चौरः धनिकं सहस्रं मुष्णाति । केशवः नगरं वृषभं नयति । स्तेनः कृपणं धनम् अहरत् । नराः वसुधां रत्नानि कर्षन्ति ।

११.९ *रिक्तस्थानेषु समुचितानि पदानि स्थापयत ।*

१) माता .... पयः दोग्धि (गौ) ।
२) याचकः .... वस्त्रं याचते (धनिन्) ।
३) सः .... ओदनं पचति (तण्डुल) ।
४) राजा .... शतं दण्डयति (चौर) ।
५) सैनिकाः .... चौरान् अवरुन्धन्ति (कारागार) ।
६) वयं .... धर्मं पृच्छामः (धर्मशास्त्रिन्) ।
७) ते .... पुष्पाणि चिन्वन्ति (वृक्ष) ।
८) नेता .... भाषणं भाषते (जन) ।
९) गुरुः .... धर्मं शास्ति (शिष्य) ।
१०) कार्यालयः .... शतं दण्डयति (युष्मद्) ।
११) माता .... घृतं मथ्नाति (दधि) ।
१२) ते .... महिषं नयन्ति (ग्राम) ।
१३) स्तेनः .... सुवर्णम् अहरत् (गृह) ।
१४) कृषकाः .... आलुकं कर्षन्ति (क्षेत्र) ।
१५) छात्राः .... पाठं पृच्छन्ति (गुरु) ।
१७) महाश्वेता .... अनामयम् अपृच्छत् (कादम्बरी) ।
१८) नृपाः .... रत्नानि दुदुहुः (धरित्री) ।

---

१८. अकथितञ्च । १९. द्विकर्मका धातवः – दुह्याच्-पच्-दण्ड्-रुधि-प्रच्छि-चिब्रूशासुजिमथ्मुषाम्। कर्मयुक्स्यादकथितं तथा स्यान्नीहृकृष्वहाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१९) मधुसूदनः .... वाक्यमवोचत् (शिव) ।

२०) गर्दभः .... भारं नयति (ग्राम) ।

१९.१० सकर्म प्रत्येकं दशवाक्येषु प्रयोगं कुरुत ।

दुग्धः। घुक्षे । दुहन्ति । धोक्ष्यति । अयाचत् । याचते । याचिष्यति। पचति। पचते । अपचत् । दण्डयति । अदण्डयत् । दण्डयिष्यति । दण्डयतु । रुणद्धि । रुणत्सि । रुन्धे । अरुणत् । रोत्स्यन्ते । चिनोति। चिनोतु । अचिनोत् । चेष्यति । जयति। अजयत्। जयतु। जेष्यति । अजयन्। मथ्नाति। ब्रवीति । ब्रवीमि । उवाच। अवोचत् । वक्ष्यति । मुष्णन्ति । अमुष्णात् । नयसि । नयन्ते । नयताम् । नेष्यति। नयतु। हरतः। अहरताम्। हरिष्यन्ति। हरन्ताम्। कर्षति। अकर्षत्। कर्षतु। क्रक्ष्यति।

१९.११ निम्न प्रश्नानाम् १८.१ पाठं विलोक्योत्तराणि लिखत ।

१) सः किं पठति ? *(स पुस्तकं पठति ।)* २) गुरुः किं करोति ? ३) अनुजौ किं खादतः ? ४) भ्रातरः किं कुर्वन्ति ? ५) नृपः किं करोति ? ६) यूयं किं खादथ ? ७) ते किं वाञ्छन्ति ? ८) वयं किं काङ्क्षामः ? ९) पौत्रः किं वाञ्छति ? १०) भृत्यः कं सेवते? ११) छात्राः किं धारयन्ति ? १२) भगिनी किं करोति ? १३) बालकाः किं कुर्वन्ति ? १४) छात्रौ किं कुरुतः ? १५) अनुजा किं नयति? १६) सिंहः कान् हन्ति? १७) मूढाः किं कुर्वन्ति ? १८) के काष्ठं दहन्ति? १९) छात्रः किं धत्ते ? २०) वृकाः कान् घातयन्ति ? २१) भगिन्यः किं पचन्ति? २३) भृत्यौ किम् आनयत् ? २४) यूयं किं प्रारभध्वे ? २५) माता कं स्निह्यति? २६) कः अपराधं न सहते ? २७) यूयं किम् आचरथ ? २८) यूयं कं नमथ ? २९) भल्लूकाः किं भक्षयन्ति ? ३०) वयं किं कुर्मः ? ३१) सा किं न खादति? ३२) कर्मकरं कः नियुङ्क्ते ? ३३) सचिवः किं चालयति ? ३४) तक्षकः किं करोति ? ३५) ते किं पिबन्ति ? ३६) यूयं कुत्र गच्छथ ?

१९.१२ कोष्ठस्थशब्दाननुसृत्योत्तरं लिखत ।

(उत्तरेषु सार्वनामिकपदानां प्रयोगः कर्तव्यः)

१) केशवः किं करोति ? (पाठ, पठ)
(स पाठं पठति ।)

२) गुरू किं कुरुतः ? (छात्र, पाठ)

३) ते किं कुर्वन्ति ? (द्रविण, याच)

४) त्वं किं करोषि ? (पत्र, लिख)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५) युवां किं कुरुथः ?	(कुसुम, चि)
६) यूयं किं कुरुथ ?	(क्षेत्र, कृष)
७) अहं किं करोमि ?	(द्विचक्रिका, चाल)
८) आवां किं कुर्वः ?	(पुष्प, घ्रा)
९) वयं किं कुर्मः ?	(जल, पा)
१०) त्वं कुत्र शेषे ?	(अधि-शी)
११) वाटिकाः कुत्र सन्ति ?	(परितः)
१२) युवां कुत्र वसथः ?	(निकषा)
१३) प्रयागः कुत्र वर्तते ?	(अन्तरा)
१४) शिष्याः कुत्र वसन्ति ?	(भूमि, अधि-स्था)
१५) कां विना मानवः पशुः भवति ?	(विद्या)
१६) गोपालौ कुत्र तिष्ठतः ?	(केशवः, उभयतः)
१७) साधवः कं प्रति दयां कुर्वन्ति ?	(दीन)
१८) नद्यौ कुत्र वहतः ?	(ग्राम, समया)

१९.१३ *निम्नवाक्यानि पठत ।*

श्यामः औषधं कृत्वा[२०] गच्छति। तौ वृक्षं छित्त्वा आगच्छतः । मित्रं निन्दित्वा मूर्खाः प्रसन्नाः भवन्ति । बालिकाः जलं नीत्वा गृहं यान्ति । छात्राः पाठं पठित्वा भवनं प्रत्यागच्छन्ति । त्वं तक्रं पीत्वा हृष्टः भवसि । कृषकाः गाः पालयित्वा दुग्धं विक्रीणन्ति । वृक्षाः पुष्पित्वा फलन्ति । युवत्यः जलं पूरयित्वा घटम् स्थापयन्ति। बालकः अञ्जलिं बद्ध्वा महेशं प्रार्थयते। वायसः तण्डुलकणान् भक्षयित्वा उदगच्छत्। त्वां मूर्खं मत्वा केशवः न अवोचत् । याचकाः प्रतिगृहं भ्रमित्वा द्रव्यम् अयाचन्त। माता दधि मथित्वा घृतम् आनयत् । युवां तं मन्त्रयित्वा गृहम् आगच्छतम् । यूयं कथां श्रुत्वा आगच्छत । अहं जीर्णवस्त्रं मुक्त्वा नवं वस्त्रम् अधारयम् । आवां यतित्वा साफल्यम् अलभावहि । वयं धनं लब्ध्वा हर्षम् अन्वभवाम । बालिका पत्रं लिखित्वा प्रेषयिष्यति । रामौ किम् उक्त्वा गमिष्यन्ति । मूढाः युष्मान् वञ्चयित्वा यास्यन्ति । त्वं श्लाघयित्वा किं विधास्यसि ? युवाम् ईश्वरं नत्वा पाठं पठिष्यथः। यूयं पशुपतिं स्तुत्वा पूजयथ । अहं मृगं हत्वा आनयिष्यामि । आवां कर्णौ स्पृष्ट्वा वदिष्यावः । वयम् छात्रान् सान्त्वयित्वा आगमिष्यामः । ते मां पृष्ट्वा गृहं यास्यन्ति। त्वम् जीर्णवस्त्राणि त्यक्त्वा आगच्छ । युवां पत्रं प्रेषयित्वा गच्छतम् । यूयं क्रीडित्वा

२०. *समानकर्तृकयोः पूर्वकाले इति क्त्वा ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आगच्छत । भगवान् ईश्वरं नत्वा पठतु । तौ भगवन्तं स्मृत्वा कार्यं कुरुताम् ।

११.१४ क्त्वाप्रत्ययान्तैः पदैः संयोजयत ।

१. रामः विद्यालयं गच्छति । सः पाठं पठति ।
(रामः विद्यालयं गत्वा पठति ।)
२. त्वं पुस्तकानि पठसि । त्वं लेखं लिखसि ।
३. ते धर्मशास्त्रं पठन्ति । ते धर्मम् आचरन्ति ।
४. वयं गायामः । वयं नृत्यामः ।
५. नेतारः मञ्चं गच्छन्ति । ते भाषणं कुर्वन्ति ।
६. छात्राः चत्वरं गच्छन्ति । ते कन्दुकेन क्रीडन्ति ।
७. वानराः वृक्षम् आरोहन्ति । ते फलं खादन्ति ।
८. पूजकः मन्दिरं गच्छति । सः शिवम् अर्चयति ।
९. गुरवः विद्यालयं गच्छन्ति । ते छात्रान् पाठयन्ति ।
१०. अहं लेखम् लिखामि । अहं लेखं प्रकाशयामि ।
११. वयं मन्दिराणि पश्यामः । वयं आनन्दम् अनुभवामः ।
१२. कविः काव्यं सृजति । सः यशः लभते ।
१३. भावकः काव्यानि पठति । सः काव्यानि समीक्षते ।
१४. मेघाः गर्जनं कुर्वन्ति । ते जलं वर्षन्ति ।
१५. त्वं रामायणं शृणोषि । त्वं ज्ञानं लभसे ।
१६. वयं बिभीमः । अतः वनं न गच्छामः ।
१७. बालिका पुष्पाणि जिघ्रति । सा प्रसन्ना भवति ।
१८. छात्रः निबन्धं रचयति । सः पारितोषिकं लभते ।
१९. पिता धनम् अर्जयति । सः अस्मान् भरति ।
२०. ते शिवं पूजयन्ति । ते विद्यां याचन्ते ।
२१. धूमकेतुः सूर्यसमीपं गच्छति । सः प्रकाशते ।
२२. त्वं ज्यौतिषं पठसि । त्वं ग्रहगतिं गणयसि ।
२३. कालिदासः काव्यानि असृजत् । सः ख्यातिम् अलभत ।
२४. व्यासः भारतम् अरचयत् । सः पुराणानि असृजत् ।
२५. बालिका सरस्वतीं नमति । सा विद्याम् याचते ।

११.१५ निम्नवाक्यानि पठित्वा तदनुवर्तिनां प्रश्नानामुत्तराणि लिखत ।

बालकः फलं प्राप्य[२१] सन्तुष्टः भवति । तौ धनम् उपार्ज्य आनन्दम् अनुभवतः ।

२१. *समासेऽनञ्पूर्वे क्त्वो ल्यप्, इति क्त्वास्थाने ल्यप् ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ते ईश्वरं प्रणम्य सुखम् इच्छन्ति । त्वं गृहं निर्माय तिष्ठसि । युवां विचार्य कार्यं कुरुथः । यूयं सर्वं समीक्ष्य वदथ । अहं छात्रान् अध्याप्य आगच्छामि । आवां कार्यं संपाद्य गृहं गच्छावः। वयं विचिन्त्य कार्यं कुर्मः । सा शिवं संपूज्य भवनं याति । पर्यटकाः हिमालयं विलोक्य प्रसन्नाः भवन्ति । भटाः शत्रून् विजित्य पारितोषिकं लभन्ते । पत्रकारः वृतान्तं प्रकाश्य सत्यम् उद्घाटयति । त्वां प्राप्य मनः प्रसन्नम् अभवत् ।

१. बालकः किं कृत्वा सन्तुष्टः भवति ?
२. तौ किं कृत्वा आनन्दम् अनुभवतः ?
३. ते किं कृत्वा सुखम् इच्छन्ति ?
४. अहं किं कृत्वा तिष्ठामि ?
५. आवां किं कृत्वा कार्यं कुर्वः ?
६. वयं किं कृत्वा वदामः ?
७. त्वं किं कृत्वा आगच्छसि ?
८. युवां किं कृत्वा गृहं गच्छथः ?
९. यूयं किं कृत्वा कार्यं कुरुथ ?
१०. सा किं कृत्वा भवनं याति ?
११. पर्यटकाः किं कृत्वा प्रसन्नाः भवन्ति ?
१२. भटाः किं कृत्वा पारितोषिकं लभन्ते ?
१३. कृषकाः किं कृत्वा भवनं यान्ति ?
१४. लेखकः किं कृत्वा धनम् अर्जयति ?
१५. पत्रकारः किं कृत्वा सत्यम् उद्घाटयति ?
१६. किं कृत्वा मनः प्रसन्नम् अभवत् ?

१.१६ *अधोलिखितपदानि प्रयुज्य वाक्यानि रचयत ।*

कुपित्वा । कूजित्वा । कल्पयित्वा । क्रन्दयित्वा । क्रीत्वा । क्रीडित्वा । क्रुद्ध्वा। क्षमित्वा । क्षिप्त्वा । खादित्वा । खनित्वा । गत्वा । गणयित्वा । गुम्फित्वा। ग्रथित्वा । घ्रात्वा । चर्वयित्वा । चित्त्वा । जनित्वा । जित्वा । ताडयित्वा । दृष्ट्वा। तर्जयित्वा । त्रपित्वा । नत्वा । दुग्ध्वा । द्योतित्वा । छित्त्वा नष्ट्वा । निन्दित्वा । नीत्वा । पठित्वा । पतित्वा । पीत्वा । पालयित्वा । पुष्पित्वा। पूरयित्वा । पृष्ट्वा । फलित्वा । बद्ध्वा । भक्षयित्वा । मत्वा । भ्रमित्वा । मण्डयित्वा । मथित्वा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्त्रयित्वा । मित्वा । मार्जयित्वा । मोचयित्वा । मुक्त्वा। यतित्वा । क्षिप्त्वा
लब्ध्वा । लिखित्वा । सृष्ट्वा । स्तुत्वा । स्पृष्ट्वा । स्मृत्वा । हत्वा ।

११.१७ वाक्येषु प्रयोगं कुरुत ।

आलोच्य । उपसृत्य । समर्च्य । उपार्ज्य । प्राप्य । अधीत्य । समीक्ष्य प्रणम्य। सङ्कल्प्य । सङ्क्षिप्य । विलिख्य । आघ्राय । आचम्य । विजित्य । विज्ञाय उड्डीय। उपदिश्य । विधाय। निधाय। निपत्य। संपाद्य । उत्पाद्य । संपूज्य । आपृच्छ्य संबोध्य। प्रबोध्य । विभज्य । विमुच्य । विरुध्य । आलोक्य । आश्रित्य ।

११.१८ निम्नवाक्यानि पठत ।

केशवः कार्यं [२२]कर्तुं कार्यालयं याति । बालकौ क्रीडितुं प्राङ्गणं गच्छतः बालिका फलं खादितुं वाञ्छति । त्वं गातुम् शक्नोषि । युवां पुष्पाणि घ्रातुं इच्छथः । यूयं कुसुमानि चेतुं वाटिकां याथ । अहं काष्ठं छेत्तुं कुठारम् आनयामि भटाः शत्रून् जेतुम् यतन्ते । रमा पत्रं टङ्कयितुं कार्यालयम् अधितिष्ठति । पर्यटकाः कौशिकीं तर्तुं तरणीम् आरोहन्ति। मुनयः स्वर्गं गन्तुम् तपः चरन्ति । त्वम् जीर्णवस्त्रं त्यक्तुम् इच्छसि । युवां पितॄन् तर्पयितुं जलाशयं गच्छथः । कृपणाः धनं दातुं न उत्सहन्ते । सिंहाः मृगान् विदारयितुम् धावन्ति । बालकाः नवं वस्त्रं धर्तुं यतन्ते अश्वाः धावितुं प्रारभन्ते । ते इन्धनम् आनेतुं विपिनं यान्ति । महिषाः जलं पातुं निपानं प्रविशन्ति। राजानः जनान् पातुं सैनिकान् पालयन्ति । युवत्यः जलं पूरयितुं घटम् आनयन्ति । छात्राः पाठं पठितुं विद्यापीठं गच्छन्ति। ते चलचित्रं विलोकयितुं दृश्ययन्त्रम् उद्घाटयन्ति । कः अपि मर्तुं न इच्छति । त्वं गृहं यातुम् ईप्ससि युवां धनं लब्धुं यतेथे । यूयं कथां श्रोतुं गच्छथ । अहं त्वां बद्धुम् इच्छामि। शिष्याः गुरून् प्रीणयितुं यतन्ते । वणिजः फलानि विक्रेतुम् आपणम् अभियान्ति।

११.१९ उपरितनवाक्यानि पठित्वा प्रश्नानामुत्तराणि लिखत ।

१. केशवः किं कर्तुं कार्यालयं गच्छति ?
२. बालकौ किमर्थं प्राङ्गणं गच्छतः ?
३. बालिका किं विधातुं वाञ्छति ?
४. अहं किं कर्तुं शक्नोमि ?
५. आवां किम् इच्छावः ?
६. वयं किं कर्तुं वाटिकां यामः ?
७. त्वं किमर्थं कुठारम् आनयसि ?

२२. *तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्, इति तुमुन् ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८. भटाः किं कर्तुं यतन्ते ?
९. रमा किमर्थं कार्यालयं अधितिष्ठति ?
१०. पर्यटकाः किं कर्तुं तरणीम् आरोहन्ति ?
११. मुनयः किमर्थं तपः कुर्वन्ति ?
१२. अहं किं कर्तुम् इच्छामि ?
१३. आवां किमर्थं जलाशयं गच्छावः ?
१४. शिष्याः किं कर्तुं यतन्ते ?

११.२० *तुमुन्प्रत्ययान्तपदैः संयोजयत ।*

१. रामः पाठं पठति । सः विद्यालयं गच्छति ।
२. बालकौ क्रीडतः । तौ प्राङ्गणं गच्छतः ।
३. बालिकाः विद्यालयं गच्छन्ति । ताः वस्त्राणि परिदधते ।
४. त्वम् आसनम् अधितिष्ठसि । त्वं पाठं पठसि ।
५. कृष्णः फलं चिनोति । सः उद्यानं गच्छति ।
६. युवां कार्यं कुरुथः । युवां कार्यालयं गच्छथः ।
७. यूयं जलं पिबथ । यूयं जलाशयं गच्छथ ।
८. अहं शिवं पूजयामि । अहं घण्टां वादयामि ।

११.२१ *निम्नपदानि प्रयुज्य वाक्यानि रचयत ।*

११ एकादश	१२ द्वादश	१३ त्रयोदश	१४ चतुर्दश	१५ पञ्चदश
१६ षोडश	१७ सप्तदश	१८ अष्टादश	१९ नवदश	२० विंशतिः
२१ एकविंशतिः	२२ द्वाविंशतिः	२३ त्रयोविंशतिः	२४ चतुर्विंशतिः	२५ पञ्चविंशतिः
२६ षड्विंशतिः	२७ सप्तविंशतिः	२८ अष्टाविंशतिः	२९ नवविंशतिः	३० त्रिंशत्

११.२२ *अधोलिखितशब्दानां द्वितीयाविभक्तौ रूपाणि लिखत ।*

तद्, युष्मद्, अस्मद्, केशव, रमा, मुनि, भानु, पितृ, पत्र, बधू, सखि, राजन्, महत्, कमला, गुरु, नदी, भ्रातृ, नप्तृ, रिपु, मित्र, नक्षत्र, चमरी, भेक, वन, स्त्री, पुष्प, विधवा, कुसुम, शूकर ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विंशः पाठः

करणे तृतीया

प्रथमपुरुषे-	एकव.	रामः	करेण	धारयति
	द्विव.	रामौ	नेत्राभ्याम्	पश्यतः
	बहुव.	रामाः	लगुडैः	ताडयन्ति
मध्यमपुरुषे-	एकव.	त्वम्	जलेन	क्षालयसि
	द्विव.	युवाम्	हस्ताभ्याम्	खादथः
	बहुव.	यूयम्	लेखनीभिः	लिखथ
उत्तमपुरुषे-	एकव.	अहम्	पादाभ्याम्	गच्छामि
	द्विव.	आवाम्	खनित्राभ्याम्	खनावः
	बहुव.	वयम्	पुष्पैः	पूजयामः

२०.१ *अधोलिखितवाक्यानि पठत ।*

रामः कुठारेण[1] वृक्षं छिनत्ति । सीता हस्तेन फलं खादति । हरिः लेखन्या पत्रं लिखति । नारी करेण रोटिकां गृह्णाति । गुरुः मुखेन छात्रं पाठयति । वधूः जलेन वर्तनं क्षालयति । बालकः दण्डेन सर्पं मारयति । त्वं पुष्पेण देवं पूजयसि। अहं द्विचक्रिकया विद्यालयं गच्छामि । माता करेण लेखनीं धारयतिं । पिता पणेन पुस्तकं क्रीणाति । गौरी खनित्रेण भूमिं खनति । नेता पत्रवाहकेन पत्रं प्रेषयति । राजा सैनिकेन युध्यते । मूर्खः व्यसनेन कालं यापयति । बालिका हस्तेन दिवसं गणयति । मालाकारः मालया शिवम् अर्चयति । सर्पः मुखेन भेकं गिरति । बालकः मनसा ईश्वरं स्मरति । नायकः मुखेन नायिकां चुम्बति । चौरः हस्तेन द्रविणं चोरयति । सेवकः छत्रेण स्वामिनं छादयति । शववाहकः वस्त्रेण शवम् आच्छादयति । त्वं मनसा मन्त्रं जपसि । अहम् अन्नेन जीवामि। दीपः तैलेन ज्वलति । चन्द्रः सूर्यतेजसा प्रकाशते । पूजकः सलिलेन पितरं तर्पयति । मशकः मुखेन रक्तं पिबति । सर्पः दशनेन मानवं दशति । वनेचरः अग्निना वनं दहति । खलः वचसा सज्जनं निन्दति । फलेन शरीरं पुष्यति । युवतिः जलेन घटं पूरयति।

१. *साधकतमं करणम् । कर्तृकरणयोस्तृतीया ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दाता अन्नेन दीनं भरति । वामा भूषणेन वदनं मण्डयति ।

२०.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. वामाः केन वदनं मण्डयन्ति ? २. दाता केन दीनं भरति ? ३. रामः केन वृक्षं छिनत्ति ? ४. सीता केन फलं खादति ? ५. खलः केन सज्जनं निन्दति? ६. नारी केन रोटिकां भक्षयति ? ७. वधूः केन वर्तनं क्षालयति ? ८. अहं केन देवं पूजयामि ? ९. बालकः केन सर्पं मारयति ? १०. त्वं केन विद्यालयं गच्छसि ? ११. चन्द्रः केन प्रकाशते? १२. मशकः केन रक्तं पिबति ? १३. पूजकः केन पितरं तर्पयति ? १४. वनेचरः केन वनं दहति ? १५. माता केन लेखनीं धारयति? १६. पिता केन पुस्तकं क्रीणाति ? १७. त्वं केन जीवसि ? १८. सेवकः केन स्वामिनं छादयति ? १९. चौरः केन द्रविणं चोरयति ? २०. बालकः केन ईश्वरं स्मरति ? २१. सर्पः केन भेकं निगिरति ? २२. मालाकारः केन शिवम् अर्चयति? २३. मूर्खः केन कालं यापयति ? २४. नेता केन पत्रं प्रेषयति ? २५. गौरी केन भूमिं खनति? २६. खलः केन सज्जनं निन्दति ? २७. युवतिः केन घटं पूरयति?

२०.३ *उपरितन (२०.१) वाक्यानां द्विवचने बहुवचने च परिवर्तनं कुरुत।*

२०.४ *कोष्ठस्थशब्दाननुसृत्य रिक्तस्थानं पूरयत ।*

१) सूर्यः .... जगत् प्रकाशते (तेजस्) ।
२) देवाः .... समुद्रम् अमथ्नन् (मन्दराचल) ।
३) बालिकाः .... मुखानि मण्डयन्ति (अलंकार) ।
४) पुष्पाणि .... अवर्धन्त (सलिल) ।
५) बालकाः .... मङ्गलग्रहं पश्यन्ति (दूरवीक्षण) ।
६) वयम् .... शिखरं विलोकयामः (चक्षुष्)
७) माता .... चणकान् भृज्जति (हस्त) ।
८) अश्वाः .... धावन्ति (पाद) ।
९) स्त्रियः .... पत्राणि लिखन्ति (लेखनी) ।
१०) बालाः .... मधु लिहन्ति (जिह्वा) ।
११) रजकः .... भारं वहति (गर्दभः)
१२) ज्योतिर्विदः .... ग्रहगतिं निर्णयन्ति (गणित) ।
१३) वयं .... ईश्वरं स्मरामः (मनस्) ।
१४) शुक्रः .... द्योतते (सूर्यतेजस्) ।
१५) वयं .... दीपं ज्वालयामः (अग्नि) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१६) खलौ .... सज्जानान् निन्दतः (वचस्) ।
१७) बालिकाः .... वदनानि मण्डयन्ति (भूषण) ।
१८) पूजकौ .... ईश्वरं पूजयतः (पुष्प) ।
१९) ते .... शिवं ध्यायन्ति (चेतस्) ।
२०) सर्पाः .... मूषकान् गिरन्ति (मुख) ।
२१) सिंहाः .... मृगान् घातयन्ति (दन्त) ।
२२) व्याघ्राः .... मांसं खादन्ति (वदन) ।
२३) अहम् .... पुष्पगन्धं जिघ्रामि (नासिका) ।
२४) ताः .... शब्दं शृण्वन्ति (कर्ण) ।
२५) रमा .... फलम् अखादत् (हस्त) ।

२०.५ ***कोष्ठस्थशब्दाननुसृत्य प्रश्नानामुत्तराणि लिखत ।***
(सार्वनामिकपदानां प्रयोगोऽपेक्षितः)

१) रमा केन कार्यं करोति ? (हस्त)
(सा हस्तेन कार्यं करोति ।)
२) हरिः केन जलं पिबति ? (जलपात्र)
३) माता कया बालं ताडयति ? (मुष्टि)
४) युवकाः कैः क्रीडन्ति ? (कन्दुक)
५) वानराः काभ्यां वृक्षम् आरोहन्ति (कर)
६) मशकः केन नरान् दशति ? (तुण्ड)
७) विटः काभ्यां चेटीं चुम्बति ? (ओष्ठ)
८) वयं केन नगरं गच्छामः ? (मोटरयान)
९) त्वं केन कार्यं करोषि ? (हस्त)
१०) स्तेनः केन द्रव्यं हरति ? (कर)
११) व्याघ्राः कैः मृगान् विदारयन्ति (दन्त)
१२) अहं काभ्याम् हिमालयं विलोकयामि ? (नयन)
१३) आवां कया अम्रफलानि स्वदावहे ? (रसना)
१४) वयं केन अपूपं भक्षयामः (मुख)
१५) बालिकाः कैः पुष्पाणि चिन्वन्ति ? (कर)
१६) करिणः काभिः वृक्षान् त्रोटयन्ति ? (शुण्डा)
१७) यूयं केन ईश्वरं पूजयथ ? (कुसुम)
१८) वृकाः कैः महिषान् घातयन्ति ? (नख)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१९) त्वम् कया ग्रामं गच्छसि (द्विचक्रिका)

२०) वयं केन क्षेत्रं कर्षामः (कुद्दालक)

२०.६ *अधोलिखितवाक्यानि पठत ।*

केशवः [२]प्रकृत्या दुर्जनः अस्ति । त्वं स्वभावेन सज्जनः असि । अहं जात्या ब्राह्मणः अस्मि । अयं नाम्ना केशवः अस्ति । लक्ष्मणः रामेण[३] सह अगच्छत् । त्वं तेन सह गृहं यासि । मया सार्धं केशवः याति । रामेण साकं द्वेषः नास्ति । धर्मेण[४] सदृशः अन्यः बन्धुः नास्ति । त्वया सदृशं मित्रं न विद्यते । केन[५] हेतुना त्वं गृहं गच्छसि ? श्रमेण[६] विना छात्राः विद्यां न लभन्ते । अयं [७]जटाभिः किं तापसः अस्ति? बालकः चक्षुषा काणः अस्ति। बालिका कर्णाभ्यां बधिरा विद्यते । त्वं पादेन खञ्जः असि । ते पृष्ठैः कुब्जाः सन्ति ।

२०.७ *वाक्येषु प्रयोगं कुरुत ।*

जलेन । सह । साकम् । तुल्यम् । सदृशः । प्रकृत्या । जात्या । स्वभावेन। कैः । विहीनाः । विना । अलम् । धनेन । पुस्तकेन । दशवर्षैः । काणः । खञ्जः।

२०.८ *कोष्ठस्थशब्दाननुसृत्य रिक्तस्थानानि पूरयत ।*

१) कशवौ .... दुर्जनौ स्तः (प्रकृति)।

२) युवां .... सज्जनौ स्थः (स्वभाव) ।

३) यूयं .... ब्राह्मणाः स्थ (कर्म) ।

४) सः .... रामः अस्ति (नाम) ।

५) केशवः .... सह गृहं गच्छति (स्त्री) ।

६) सा .... साकं न तिष्ठति (अस्मद्)

७) वयम् .... सार्धं गच्छामः (तद् – स्त्री.ब.)

८) .... सदृशी माता नास्ति (तद् –स्त्री. ए.)

९) केन .... त्वं रुदसि (हेतु) ?

१०) .... विना वयं न जीवामः (अन्न) ।

११) .... हीनः नरः पशुः अस्ति (विद्या) ।

१२) .... अलम् (धन) ।

१३) .... प्रयोजनं नास्ति । (द्रव्य)

१४) .... पयः मधुरं भवति । (प्रकृति)

---

२. *प्रकृत्यादिभ्य उपसङ्ख्यानम् ।* ३. *सहयुक्तेऽप्रधाने ।* ४. *तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् ।*

५. *हेतौ ।* ६. *पृथग्विनानानाभिस्तृतीयान्यतरस्याम् ।* ७. *इत्थंभूतलक्षणे।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकविंशः पाठः

अनुक्ते कर्तरि तृतीया

प्रथमपुरुषे	एकव.	(तेन)	पाठः	पठ्यते
	द्विव.	(ताभ्याम्)	पाठौ	पठ्येते
	बहुव.	(तैः)	पाठाः	पठ्यन्ते
मध्यमपुरुषे	एकव.	(तेन)	त्वम्	मुच्यसे
	द्विव.	(ताभ्याम्)	युवाम्	मुच्येथे
	बहुव.	(तैः)	यूयम्	मुच्यध्वे
उत्तमपुरुषे	एकव.	(तेन)	अहम्	मुच्ये
	द्विव.	(ताभ्याम्)	आवाम्	मुच्यावहे
	बहुव.	(तैः)	वयम्	मुच्यामहे

२१.१ *अधोलिखितवाक्यानि पठत ।*

कर्तृ वाच्ये	कर्मवाच्ये
१) रामः पाठं पाठयति ।	१) रामेण पाठः पाठ्यते ।
२) रामः पाठौ पाठयति ।	२) रामेण पाठौ पाठ्येते ।
३) रामः पाठान् पाठयति ।	३) रामेण पाठाः पाठ्यन्ते ।
४) केशवः त्वाम् पाठयति ।	४) केशवेन त्वं पाठ्यसे ।
५) सः युवां पाठयति ।	५) तेन युवां पाठ्येथे ।
६) तौ युस्मान् पाठयतः ।	६) ताभ्यां यूयं पाठ्यध्वे ।
७) ते मां पाठयन्ति ।	७) तैः अहं पाठ्ये ।
८) त्वम् आवां पाठयसि ।	८) त्वया आवां पाठ्यावहे ।
९) युवाम् अस्मान् पाठयथः ।	९) युस्माभिः वयं पाठ्यामहे ।
१०) यूयं तम् अपाठयत	१०) युष्माभिः सः अपाठ्यत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

११) अहं तौ अपाठयम् ।	११) मया तौ अपाठ्येताम् ।
१२) आवां तान् अपाठयामः ।	१२) आवाभ्यां ते अपाठ्यन्त ।
१३) वयं त्वाम् अपाठयामः ।	१३) अस्माभिः त्वम् अपाठ्यथाः ।
१४) सा युवाम् अपाठयत् ।	१४) तया युवाम् अपाठ्येथाम् ।
१५) ते युष्मान् अपाठयताम् ।	१५) ताभ्याम् यूयम् अपाठ्यध्वम्।
१६) ताः माम् अपाठयन् ।	१६) ताभिः अहम् अपाठ्ये ।
१७) त्वम् आवाम् अपाठयः ।	१७) त्वया आवाम् अपाठ्यावहि।
१८) युवाम् अस्मान् अपाठयतम् ।	१८) युवाभ्यां वयम् अपाठ्यामहि ।
१९) यूयं तं पाठयिष्यथ ।	१९) युष्माभिः सः पाठयिष्यते ।
२०) अहं तौ पाठयिष्यामि ।	२०) मया तौ पाठयिष्येते ।
२१) आवां तान् पाठयिष्यावः ।	२१) आवाभ्यां ते पाठयिष्यन्ते ।
२२) वयं त्वां पाठयिष्यामः ।	२२) अस्माभिः त्वं पाठयिष्यसे ।
२३) सा युवां पाठयिष्यति ।	२३) तया युवां पाठयिष्येथे।
२४) ते युष्मान् पाठयिष्यतः ।	२४) ताभ्यां यूयं पाठयिष्यध्वे ।
२५) ताः मां पाठयिष्यन्ति ।	२५) ताभिः अहं पाठयिष्ये ।
२६) त्वम् आवां पाठयिष्यसि ।	२६) त्वया आवां पाठयिष्यावहे ।
२७) युवाम् अस्मान् पाठयिष्यथः ।	२७) युवाभ्यां वयं पाठयिष्यामहे ।
२८) यूयं तं पाठितवन्तः ।	२८) युस्माभिः सः पाठितः ।
२९) अहं तौ पाठितवान् ।	२९) मया तौ पाठितौ ।
३०) आवां तान् पाठितवन्तौ ।	३०) आवाभ्यां ते पाठिताः ।

२१.२ *कर्मवाच्ये परिवर्तनं कुरुत ।*

रामः फलं काङ्क्षति । *(रामेण फलं काङ्क्ष्यते ।)* ते शत्रून् जयन्ति । अहं त्वां त्यजामि। आवां युवां पश्यावः । वयं युष्मान् नमामः । त्वं मां नयसि । युवाम् आवां पाठयावः । यूयम् अस्मान् नर्तयथ । स जलम् अपिबत् । तौ फले अखादताम्। ते ईश्वरम् अनमन् । स त्वाम् अभरत् । ते देवान् अयजन् । रामः युवाम् अरक्षत्। दरिद्रः धनम् अयाचत । ते पुस्तकानि अलभन्त । युवाम् आवाम् अस्मरतम् । ते

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

युष्मान् अश्रयन् । त्वं माम् असेवेथाः । यूयम् अस्मान् अक्षमध्वम् । सः क्षेत्रं खनिष्यति । तौ फले भक्षयिष्यतः। ते काष्ठानि घक्षन्ति । अहं त्वां वन्दिष्ये । वयं युवां शङ्किष्यामहे । आवां युष्मान् वेदिष्यावः। त्वं मां स्नापयिष्यसि । युवाम् आवां स्वापयिष्यथः । यूयम् अस्मान् हनिष्यथ । रामः रावणं हतवान् । त्वं वृक्षौ पातितवान् । युयं शत्रून् घातितवन्तः । शशकः सिंहं विनाशितवान् । आवां कार्याणि कृतवन्तौ । वयं फले खादितवन्तः । ते बालान् पाठितवन्तः । तौ तां पूजितवन्तौ । रामः [1]गां पयः दोग्धि । [illegible]ः वलिं वसुधां भिक्षते । बालिका माणबकं पन्थानं ब्रूते । दरिद्रः राजानं धनं याचते । गोपालः गां व्रजमवरुणद्धि । देवाः समुद्रं सुधाम् अमथ्नन् । स अजां ग्रामं नयति । चौरः कृपणं धनम् अहरत्। नराः वसुधां रत्नानि कर्षन्ति।

२१.३ *कर्तृवाच्ये परिवर्तनं कुरुत ।*

मया पाठाः पठ्यन्ते । आवाभ्यां फले काङ्क्ष्येते । अस्माभिः त्वं नीयसे। युवाभ्यां कार्याणि क्रियन्ते । वानरेण शाखाः त्रोट्यन्ते । त्वया अहं पीड्ये । मया त्वं तर्ज्यसे । बालिकाभिः दुग्धं पीयते । युष्माभिः चणकाः चर्व्यन्ते । तैः पुष्पाणि चीयन्ते । विटैः नार्यः चुम्ब्यन्ते । सर्पैः भेकाः गीर्यन्ते । अस्माभिः वृक्षाः रक्ष्यन्ते। आवाभ्यां विद्या प्राप्यते । मया त्वं ताड्यसे । ज्ञानेन संशयाः छिद्यन्ते । मूढैः सज्जनाः तुद्यन्ते । सद्भिः कुलटाः त्यज्यन्ते। सैनिकेन शत्रू दण्ड्येते । नृपैः धनं वितीर्यते । व्याघ्रेण त्वं दीर्यसे । तया युवां निन्द्येथे । मया जलम् अपीयत । युवाभ्याम् अहं पाल्ये । ज्वरेण वयं पीड्यामहे । मलेन वृक्षाः अपुष्यन्त। अस्माभिः देवाः अपूज्यन्त । बालिकया घटौ अपूर्येताम् । अलङ्कारैः काव्यानि अभूष्यन्त । भावकैः नाटकानि मीमांस्यन्ते । सिंहैः मृगाः मार्ग्यन्ते । अस्माभिः त्वम् अमुच्यथाः। तया धनं याच्यते । तैः वयं अरक्ष्यामहि । कविभिः काव्यं रच्यते । तेन पुस्तकानि पाठितानि । तया मोदकं खादितम् । मया नाटकं रचितम् । शशकेन सिंहः घातितः। रामेण गौः पयः दुह्यते । तेन् वृषभः ग्रामं नीयते । देवैः समुद्रः मथ्यते। मया ताण्डुलाः ओदनं पच्यन्ते ।

२१.४ *भाववाच्ये पविर्तनं कुरुत ।*

रामः हसति । बालिके रुदतः । मातरः उत्तिष्ठन्ति । मधुकराः भ्रमन्ति । मृगाः बिभ्यति । मूर्खाः कुप्यन्ति । वयं जृम्भामहे । त्वं भवसि । आवां एधावहे।

---

१. गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम् । बुद्धिभक्ष्यार्थयोः शब्दकर्मकाणां निजेच्छया ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वृक्षाः कम्पन्ते। बालाः बुभुक्षया क्रन्दन्ति । जम्बुकाः क्रोशन्ति । बालिके हसतः। वयं क्षुध्यामः । तौ ग्लायतः । दुन्दुभयः घोषन्ति । तारकाः चकासति । जलं च्योतति । यूयं जीवथ । अग्निः ज्वलति । यूयं सेवया तुष्यथ । पूजया देवाः तृप्यन्ति । वामाः अत्रपन्त । बालकाः अत्रस्यन्। त्वम् अत्वरथाः । नक्षत्राणि अदीप्यन्त । सूर्यातपेन ग्रहाः अद्योतन्त । घटिका नदति । शस्त्रप्रयोगेण मानवाः नश्यन्ति । मयूराः घनगर्जनेन नृत्यन्ति । वयं पतिष्यामः । अङ्कुराः उत्पत्स्यन्ते। हंसौ धाविष्यतः । वयं मुह्यामः । यूयं यतिष्यध्वे । ते रुदितवन्तः। वयं हसितवन्तः। युवाम् उल्लसितवन्तौ । बालिकाः कुपितवत्यः।

२१.५ *अधोलिखितवाक्यानि पठत ।*

कार्यं क्रियताम् । पत्राणि लिख्यन्ताम् । काव्ये रच्येताम् । देवाः पूज्यन्ताम्। घटेषु जलानि पूर्यन्ताम् । नावः आनीयन्ताम् । नाटकानि रच्यन्ताम् । मोदकं खाद्यताम् । बालकाः पाल्यन्ताम् । पाठाः पठ्यन्ताम् । गावः दुह्यन्ताम् । धनानि याच्यन्ताम् । वृकाः निवार्यन्ताम्। जनाः रक्ष्यन्ताम् । देवाः तृप्यन्ताम् । रसाः लिह्यन्ताम् । वानराः दृश्यन्ताम् । क्षेत्राणि कृष्यन्ताम् । वार्ताः श्रूयन्ताम् । विद्वांसः श्लाघ्यन्ताम् । वस्त्रं सीव्यताम् । छात्रौ सूच्येताम्। शिवः स्तूयताम् । मातरः सेव्यन्ताम् । अध्ययनं न त्यज्यताम् । चणकाः चर्व्यन्ताम् । घटिका नद्यताम्। मूढाः निन्द्यन्ताम् । काव्यानि मीमांस्यन्ताम् । नाटकं चर्च्यताम् । विषयः विमृश्यताम्। चौराः ताड्यन्ताम् । पुष्पाणि चीयन्ताम् ।

२१.६ *उपरितन (२१.५) वाक्यानां कर्तृवाच्ये परिवर्तनं कुरुत ।*

२१.७ *कोष्ठस्थशब्दाननुसृत्य निम्नप्रश्नानामुत्तराणि लिखत ।*

(सार्वनामिकपदानां प्रयोग आवश्यकः)

१. बालिकया किं क्रियते ? (पाठ, पठ)

(तया पाठः पठ्यते ।)

२. बालैः कानि वस्तूनि खाद्यन्ते ? (आम्रफल)

३. रमाभिः किं विधीयते ? (वस्त्र, सीव्)

४. वानरैः किं क्रियते ? (फल, पात)

५. कैः क्रन्द्यते ? (बालिका)

६. रमेशाभ्यां किं त्यज्यते ? (कार्य)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७. भ्रात्रा किं क्रियते ? (पुस्तक, वि-क्री)
८. शरीरं केन पुष्यते ? (जल)
९. मातृभिः के पाल्यन्ते ? (अस्मद्-बहु.)
१०. गुरुभिः किं पाठ्यते ? (पाठ-ब.)
११. त्वया किं विधीयते ? (फल, खाद्)
१२. चौरैः किं नीयते ? (धन)
१३. लुण्ठकैः त्वं किं क्रियसे ? (ताड्)
१४. मशकैः के अदश्यन्त ? (युष्मद्)
१५. कैः चणकाः खादिष्यन्ते ? (अस्मद्)
१६. त्वया किं खादितम् ? (रोटिका)
१७. सीतया किं पीतम् ? (जल)
१८. अस्माभिः किं लिखितम् ? (काव्य)
१९. अनुजाभ्यां किं पठितम् ? (कथा)
२०. मित्रैः किं प्रेषितम् ? (पत्र)

२१.८ *अशुद्धीः संशोधयत ।*

अहं पाठः पठ्यते । तया छात्रान् पाठ्यन्ते । केन कार्याणि क्रियते । चौराः धनं ह्रियन्ते । मूषकाः अन्नानि खाद्यते । युष्माभिः बालकान् पाठ्यते । ताभिः चणकाः भृज्यन्ते । अहं लेखः अलिख्यत । फलानि खाद्यताम् । देवाः तर्प्यताम्। मूढाः अपसार्यताम् । पदार्थाः विक्रीयताम् । त्वया हस्यन्ताम् । सीतया जलं पिबति। ताभिः कार्यं समाप्नोति । सर्पैः भेकाः निगिरन्ति । मूर्खः सज्जनान् तुदन्ति। त्वया किं कृतवान् । मया लेखान् लिखितम्। बालकैः रुदितवन्तः ।

२१.९ *वाक्येषु प्रयोगं कुरुत ।*

याच्यते । क्रियन्ते । निर्मीयन्ते । पाठ्यन्ते । खाद्येते । निगद्यते । प्रकाश्यते। स्तूयन्ते । जृम्भ्यते । गम्यते । ईड्यन्ते । काम्यते । कूज्यते । कृष्येते । क्रियन्ते । क्रीड्येते। लिख्यन्ते । क्षिप्यताम् । खन्यताम् । गण्यताम् । निगृह्यताम् । चर्व्यताम्। छिद्यताम् । जीव्यते । बध्यसे । तर्ज्येथे । दह्यते। दुष्यते । दृश्यन्ते। दीर्यते । दीयते। धार्यते । ध्वन्यते। प्रणम्यते । नश्यते। निन्द्यते । नूयते । पच्येते । पीयते। पाल्यन्ते। पुष्यते । पूयते । पूज्यसे । भर्त्स्येथे । भूष्यते । मथ्यते । मृग्यसे । प्रारभ्यन्ते । लभ्यते । अवलोक्यते । ऊह्यते । शक्यते । निषिध्यते । सेव्यन्ते ।

२१.१० *कर्मवाच्यस्य प्रयोगं विधाय विंशतिर्वाक्यानि लिखत ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२१.११ *प्रश्नार्थकवाक्येषु परिवर्तनं कुरुत ।*

(द्र. २०.२, २०.३, २०.४)

२१.१२ *निम्नपदानि प्रयुज्य वाक्यानि रचयत ।*

प्राप्तव्यम्। कर्तव्यम्। ईक्षितव्यम्। आकर्षितव्यम्। चलितव्यम्। कल्पयितव्यम्। क्षन्तव्यम् । क्षिप्तव्यम् । खादितव्यम् । गन्तव्यम् । गोपितव्यम्। गुम्फितव्यम् । ग्रहीतव्यम् । चेतव्यम् । चूर्णयितव्यम् । जनितव्यम् । जेतव्यम् । जीवितव्यम् । ज्ञातव्यम् । टङ्कयितव्यम् । ताडयितव्यम् । त्रपितव्यम् । त्रोटयितव्यम् । दग्धव्यम्। दातव्यम् । दोग्धव्यम् । पातव्यम् । पूजयितव्यम् । व्यक्तव्यम् । भेतव्यम् ।

अन्वेषणीयम् । अध्ययनीयम् । ईक्षणीयम् । कम्पनीयम् । करणीयम् । कर्तनीयम् । कर्षणीयम् । क्रयणीयम् । क्षेपणीयम् । गणनीयम् । गवेषणीयम् । गोपनीयम् । जननीयम् । तर्जनीयम् । तेजनीयम् । तर्पणीयम् । गोपनीयम् । दहनीयम् । दोषणीयम् । दर्शनीयम् । धारणीयम् । नन्दनीयम् नमनीयम् । निन्दनीयम् । पठनीयम् । पानीयम् । पालनीयम् । प्रच्छनीयम् । प्लवनीयम् । बोधनीयम् । यजनीयम् । भोजनीयम् । भरणीयम् । मण्डनीयम् । मननीयम् । मार्जनीयम् । स्मरणीयम् । याचनीयम् । योजनीयम् । रक्षणीयम् । रोधनीयम् । रोहणीयम् । लेपनीयम् । देवनीयम् । वेष्टनीयम् । शङ्कनीयम् । श्रवणीयम् । सूचनीयम् । स्वापनीयम् । हिंसनीयम् । हरणीयम् ।

२१.१३ *निम्नपदानि प्रयुज्य वाक्यानि रचयत ।*

३१ एकत्रिंशत्	३२ द्वात्रिंशत्	३३ त्रयस्त्रिंशत्	३४ चतुस्त्रिंशत्
३५ पञ्चत्रिंशत्	३६ षट्त्रिंशत्	३७ सप्तत्रिंशत्	३८ अष्टत्रिंशत्
३९ नवत्रिंशत्	४० चत्वारिंशत्	४१ एकचत्वारिंशत्	४२ द्विचत्वारिंशत्
४३ त्रिचत्वारिंशत्	४४ चतुश्चत्वारिंशत्	४५ पञ्चचत्वारिंशत्	४६ षट्चत्वारिंशत्
४७ सप्तचत्वारिंशत्	४८ अष्टचत्वारिंशत्	४९ नवचत्वारिंशत्	५० पञ्चाशत्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२१.१४ *अधोलिखितशब्दानां तृतीयाविभक्तौ रूपाणि लिखत ।*

तद्, युष्मद्, अस्मद्, केशव, रमा, मुनि, भानु, पितृ, पत्र, बधू, सखि, राजन्, महत्, कमला, गुरु, नदी, भ्रातृ, नप्तृ, रिपु, मित्र, नक्षत्र, चमरी, भेक, वन, स्त्री, पुष्प, विधवा, कुसुम, शूकर ।

२१.१५ *लुङ्लकारसम्बद्धान्यधोलिखितधातुरूपाणि सस्वरं पठित्वा वाक्येषु प्रयोगं कुरुत ।*

अभूत्	अभूताम्	अभूवन्	अकृत	अकृषाताम्	अकृषत
अभूः	अभूतम्	अभूत	अकृथाः	अकृषाथाम्	अकृद्वम्-ध्वम्
अभूवम्	अभूव	अभूम	अकृषि	अकृष्वहि	अकृष्महि
अशयिष्ट	अशयिषाताम्	अशयिषत	अक्रैषीत्	अक्रैष्टाम्	अक्रैषुः
अशयिष्ठाः	अशयिषथाम्	अशयिध्वम्	अक्रैषीः	अक्रैष्टम्	अक्रैष्ट
अशयिषि	अशयिष्वहि	अशयिष्महि	अक्रैषम्	अक्रैष्व	अक्रैष्म
अवधीत्	अवधिष्टाम्	अवधिषुः	अक्रेष्ट	अक्रेषाताम्	अक्रेषत
अवधीः	अवधिष्टम्	अवधिष्ट	अक्रेष्ठाः	अक्रेषाथाम्	अक्रेढ्वम्
अवधिषम्	अवधिष्व	अवधिष्म	अक्रेषि	अक्रेष्वहि	अक्रेष्महि
अदात्	अदाताम्	अदुः	अवर्धिष्ट	अवर्धिषाताम्	अवर्धिषत
अदाः	अदातम्	अदात	अवर्धिष्ठाः	अवर्धिषाथाम्	अवर्धिद्वम्
अदाम्	अदाव	अदाम	अवर्धिषि	वर्धिष्वहि	अवर्धिष्महि
अदित	अदिषाताम्	अदिषत	अदेवीत्	अदेविष्टाम्	अदेविषुः
अदिथाः	अदिषाथाम्	अदिध्वम्	अदेवीः	अदेविष्टम्	अदेविष्ट
अदिषि	अदिष्वहि	अदिष्महि	अदेविषम्	अदेविष्व	अदेविष्म
अतौत्सीत्	अतौत्ताम्	अतौत्सुः	अजनि/अजनिष्ट	अजनिषाताम्	अजनिषत
अतौत्सीः	अतौत्तम्	अतौत्त	अजनिष्ठाः	अजनिषाथाम्	अजनिध्वम्
अतौत्सम्	अतौत्स्व	अतौत्स्म	अजनिषि	अजनिष्वहि	अजनिष्महि
अकार्षीत्	अकार्ष्टाम्	अकार्षुः	अरुधत्	अरुधताम्	अरुधन्
अकार्षीः	अकार्ष्टम्	अकार्ष्ट	अरुधः	अरुधतम्	अरुधत
अकार्षम्	अकार्ष्व	अकार्ष्म	अरुधम्	अरुधाव	अरुधाम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वाविंशः पाठः

संप्रदाने चतुर्थी

प्रथमपुरुषे	एकव.	सः	मह्यं धनं ददाति ।
	द्विव.	तौ	आवाभ्यां पुस्तके दत्तः।
	बहुव.	ते	अस्मभ्यं फलानि ददति ।
मध्यमपुरुषे	एकव.	त्वम्	तस्मै अन्नं ददासि ।
	द्विव.	युवाम्	ताभ्यां फले दत्थः ।
	बहुव.	यूयम्	तेभ्यः धनानि दत्थ ।
उत्तमपुरुषे	एकव.	अहम्	तुभ्यं फलं ददामि ।
	द्विव.	आवाम्	युवाभ्यां छत्रे दद्वः ।
	बहुव.	वयम्	युष्मभ्यम् उपानहौ दद्मः ।

२२.१ *अधोलिखितवाक्यानि गठत ।*

केशवः [१]मह्यं पुस्तकं ददाति । सा [२]पत्ये शेते । तौ पुत्राय गच्छतः। भक्तः [३]मुक्तये हरिं भजति । बालः दुग्धाय क्रन्दति । त्वं धनाय प्रयतसे । धनं सुखाय भवति । विद्या ज्ञानाय वर्तते । केशवः आभूषणाय सुवर्णम् आनयति । [४]तुभ्यं हितं वा सुखं भवतु । [५]शिशवे क्रीडनकं रोचते । गीतायै रामायणं रोचते । सः [६]मह्यं शतं धारयति । युवती [७]बालाय स्पृहयति । अहं धनवन्तं [८]तृणाय मन्ये । पिता पुत्राय[९] क्रुध्यति । गोविन्दः मह्यम् ईर्ष्यति । खलः सज्जनाय असूयति । सीता रावणाय अकुप्यत् । नागरिकाः [१०]देशोत्थानाय यतन्ते । सेवकः फलेभ्यः यान्ति । दिलीपः वनाय गाम् अमुञ्चत् । ईश्वराय[११] नमः अस्ति। तुभ्यं स्वस्ति भवतु । दानवेभ्यः दुर्गा अलम् । दैत्येभ्यः विष्णुः समर्थः अस्ति । रामः [१२]मह्यं श्लाघते । केशवः तुभ्यं शपते । त्वं कृष्णाय तिष्ठसि ।

१. कर्मणा यमभिप्रैति स संप्रदानम् । २. क्रियया यमभिप्रैति सोऽपि संप्रदानम् । ३. तादर्थ्ये चतुर्थी वाच्या। ४. हितयोगे च । ५. रुच्यर्थानां प्रियमाणः । ६. धारेरुत्तमर्णः । ७. स्पृहेरीप्सितः । ८. मन्यकर्मण्यनादरे विभाषाऽप्राणिषु। ९. क्रुधद्रुहेर्ष्याऽसूयार्थानां यं प्रति कोपः । १०. क्रियार्थोपपदस्य च कर्मणि स्थानिनः । ११. नमःस्वस्ति-स्वाहास्वधाऽलंवषट्योगाच्च । १२. श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२२.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. सा कस्मै शेते? २. भक्तः कस्मै हरिं भजति? ३. बालः कस्मै क्रन्दति? ४. अहं कस्मै प्रयते ? ५. धनं कस्मै भवति ? ६. विद्या कस्मै वर्तते ? ७. केशवः किमर्थं सुवर्णमानयति ? ८. कस्मै क्रीडनकं रोचते ? ९. रामायणं कस्यै रोचते? १०. सः कस्मै शतं धारयति ? ११. युवतिः कस्मै स्पृहयति? १२. त्वं कं तृणाय मन्यसे ? १३. पिता कस्मै क्रुध्यति ? १४. खलः कस्मै असूयति ? १५. नागरिकाः किमर्थं यतन्ते ? १६. सेवकाः केभ्यः यान्ति ? १७. कस्मै नमः अस्ति? १८. दुर्गा कस्मै अलम् ?

२२.३ *कोष्ठस्थशब्दाननुसृत्य रिक्तस्थानानि पूरयत ।*

१) अहं .... न स्पृहयामि । (धन)
२) सज्जनः .... चेष्टते । (परोपकार)
३) मादेकं .... रोचते । (बालक)
४) मूर्खः .... ईर्ष्यति । (युष्मद्)
५) सः दुर्जनः .... द्रुह्यति । (तद् , सज्जन)
६) पिता .... क्रुध्यति । (पुत्र)
७) कृष्णः .... शतं धारयति । (अस्मद्)
८) मुनिः .... ईश्वरं भजति । (मुक्ति)
९) नृपः .... धनम् अदात् । (ब्राह्मण)
१०) शिक्षाध्यक्षः .... पारितोषिकम् अयच्छत् । (छात्र)
११) त्वम् .... कस्मै ईर्ष्यसि (युष्मद्)
१२) इदम् .... देहि । (रुग्ण)
१३) भवान् .... नमस्करोतु । (तद्, प्राक्तन, मुनि)
१४) .... स्वस्ति भवतु । (ब्राह्मण)
१५) त्वम् .... तरलं कृशरं देहि । (तद्, रुग्ण)
१६) मल्लः .... प्रभवति । (मल्ल)
१७) ज्ञानं .... कल्पते । (सुख)

२२.४ *वाक्येषु प्रयोगं कुरुत ।*

खट्वायै । कुण्डलेभ्यः . भोजनाय । नमः । स्वस्ति । स्वाहा । स्वधा । अलम् । गवे । प्रजायै । वासाय । धनाय । यज्ञाय । युष्मभ्यम् । आनन्दाय ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्पृहयंति। ददाति । अर्पयति । क्रुध्यति । ईर्ष्यति । असूयति । श्लाघते । प्रवसति। ज्ञानाय । अकुप्यत् । दीयताम्। विद्यायै । स्पृहयन्ति । वितरन्ति ।

२२.५ *अशुद्धीः संशोधयत ।*

अहं त्वां न द्रुह्यामि । हरिं नमः। विष्णोः स्वस्ति। भिक्षुं भिक्षां देहि। याचकः धनं राज्ञः याचते । कृष्णः कंसम् अकुप्यत् । अहं त्वां स्पृहयामि । सः मां सहस्रं धारयति। मां मोदकं रोचते । भृत्याः स्वामिनं श्लाघन्ते । रामः पठनं विद्यालयं गच्छति । मां पुस्तकं दीयताम् । सः तं पुस्तकम् अर्पयति । ते दीनान् द्रव्यं ददति। दुर्योधनः पाण्डवान् अद्रुह्यत्। अस्मान् धनानि दीयन्ताम् । माम् अपूपः स्वदते । दैत्यस्य हरिः अलम् । तं द्रव्यं देहि । वनं गाम् अमुञ्चत् । सेवकाः फलं यान्ति ।

२२.६ *निम्नप्रश्नानामुत्तराणि कोष्ठस्थशब्दाननुसृत्य लिखत ।*

(सार्वनामिकदप्रयोगोऽत्रापेक्षितः)

१) रामः कस्मै श्लाघते ? (युष्मद्)
(स तुभ्यं श्लाघते ।)
२) श्यामौ कस्मै यतेते ? (धन)
३) रामाः किमर्थं गच्छन्ति ? (फल)
४) विधवा कस्मै असूयति ? (सती)
५) छात्राः किमर्थं गच्छन्ति ? (प्रठन)
६) रमा कस्मै प्रयोजनाय याति ? (स्नान)
७) त्वम् कस्मै ईर्ष्यसि ? (तद्)
८) उपदेशः कस्मै भवति ? (प्रकोप)
९) युवां किमर्थं पठथः ? (यशस्)
१०) यूयं कस्मै गच्छथ ? (क्रीडनक)
११) वयं कस्मै पुस्तकं [illegible] । (तत्, बुध)
१२) फलं कस्मै न रोचते ? (अस्मद्)
१३) सीता कस्मै अकुप्यत् ? (युष्मद्)
१४) सः किमर्थं धनम् अर्जयति । (सुख)

२२.७ *अधोलिखितशब्दानां चतुर्थीविभक्तौ रूपाणि लिखत ।*

तद्, युष्मद्, अस्मद्, केशव, रमा, मुनि, भानु, पितृ, पत्र, बधू, सखि, राजन्, महत्, कमला, गुरु, नदी, भ्रातृ, नप्तृ, रिपु, मित्र, नक्षत्र, चमरी, भेक, वन, स्त्री, पुष्प, विधवा, कुसुम, शूकर ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयोविंशः पाठः

अपादाने पञ्चमी

प्रथमपुरुषे	एकव.	सः	वृक्षात्	पतति ।
	द्विव.	तौ	वृक्षाभ्याम्	पततः ।
	बहुव.	ते	वृक्षेभ्यः	पतन्ति ।
मध्यमपुरुषे	एकव.	त्वम्	वृक्षात्	पतसि ।
	द्विव.	युवाम्	वृक्षाभ्याम्	पतथः ।
	बहुव.	यूयम्	वृक्षेभ्यः	पतथ ।
उत्तमपुरुषे	एकव.	अहम्	वृक्षात्	पतामि ।
	द्विव.	आवाम्	वृक्षाभ्याम्	पतावः ।
	बहुव.	वयम्	वृक्षेभ्यः	पतामः ।

२३.१ *अधोलिखितवाक्यानि पठत ।*

पत्राणि [१]वृक्षात् पतन्ति । केशवः अश्वात् अपतत् । मृगाः [२]व्याघ्रेभ्यः बिभ्यति। वयं सिंहेभ्यः त्रस्यामः । सैनिक! मां शत्रोः त्रायस्व । केशवः त्वां भल्लुकाद् रक्षति। ते नरकाद् बिभ्यति । छात्राः [३]अध्ययनाद् न विरमन्ति । पुण्यात्मानः धर्माद् न प्रमाद्यन्ति । नवोढाः [४]युवकेभ्यः लज्जन्ते । केशवः [५]पापात् पराजयते । विद्या नरं [६]पापाद् निवारयति । पिता पुत्रं व्यसनाद् निषेधति । [७]कामात् क्रोधः समुत्पद्यते। बीजेभ्यः अङ्कुराः समुत्पद्यन्ते। केशवः [८]उपाध्यायात् अधीते । छात्राः गुरोः पठन्ति। [९]हिमालयाद् नद्यः [illegible]न्ति । शिष्यः [१०]गुरोः अन्तर्धत्ते । [११]रामाद् अन्यः (भिन्नः/इतरः) मम प्रियः नास्ति । कृष्णाद् ऋते तव सखा नास्ति । केशवः रामाद् पूर्वदेशे वर्तते । माघात् उत्तरः फाल्गुनः अस्ति । भोजनात् पूर्वं हस्तौ पादौ च प्रक्षालय । उत्थानात् परतः शौचं कुरु । ग्रामात् प्राक्/प्रत्यक्/दक्षिणा विपिनं वर्तते। नगराद् वहिः गच्छ । चैत्रात् आरभ्य कार्यं कुरु । मार्गात्

---

१. ध्रुवमपायेऽपादानम् । २. भीत्रार्थानां भयहेतुः । ३. जुगुप्साविरामप्रमादार्थानामुपसङ्ख्यानम् । ४. ल्यब्लोपे कर्मण्यधिकरणे च । ५. पराजेरसोढः । ६. वारणार्थानामीप्सितः । ७. जनिकर्तुः प्रकृतिः । ८. आख्यातोपयोगे। ९. भुवः प्रभवः । १०. अन्तर्धौ येनादर्शनमिच्छति । ११. अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चमासाः सन्ति। [12]आमरणाद् हरिं पूजय । वयम् आमूलात् कथां शृणुमः। [13]धनाद् विद्या गरीयसी भवति। [14]श्यामात् पृथक् कार्यं न भवति । श्रमाद् विना धनं न प्राप्यते । बालाः [15]प्रासादात् प्रेक्षन्ते। वधूः श्वशुराद् जिह्रेति। देवाः स्वर्गाद् निरीक्षन्ते। केशवः [16]कृच्छात् कार्यं करोति। शिशुः दुःखाद् रोदिति। मम गृहं नगरस्य [17]दूरात् दूरेण दूरं वा विद्यते।

२३.२ *उपरितनवाक्यान्याश्रित्य प्रश्नानामुत्तराणि लिखत ।*
(कर्तरि सार्वनामिकपदप्रयोगः कार्यः)

१) पत्राणि कस्मात् पतन्ति ?
(तानि वृक्षात् पतन्ति ।)
२) केशवः कस्मात् अपतत् ?
३) मृगाः केभ्यः बिभ्यति ?
४) केशवः त्वां कस्माद् रक्षति ?
५) सैनिकः त्वां कस्माद् त्रायते ?
६) वयं कस्माद् बिभीमः ?
७) छात्राः कस्माद् न विरमन्ति ?
८) बालाः केभ्यः लज्जन्ते ?
९) विद्या नरं कस्माद् निवारयति ?
१०) पिता पुत्रं कस्माद् निषेधति ?
११) कस्मात् क्रोधः समुत्पद्यते ?
१२) अङ्कुराः केभ्यः प्रादुर्भवन्ति ?
१३) सरितः कस्मात् प्रभवन्ति ?
१४) कस्मात् अन्यः तव प्रियः नास्ति?
१५) भोजनात् पूर्वं किं करोषि ?
१६) विद्या कस्माद् गरीयसी अस्ति?
१७) आमूलात् किं शृणोषि ?
१८) कस्माद् विना धनं न भवति ?
१९) मार्गात् पश्चमासाः के सन्ति ?
२०) बालाः कस्मात् पश्यन्ति ?
२१) शिशुः कस्माद् रोदिति ?
२२) केशवः कथं कार्यं करोति ?
२३) वधूः कस्माद् जिह्रेति ?
२४) ज्ञानमार्गः कस्माद् श्रेष्ठः अस्ति?
२५) देवाः कुतः प्रेक्षन्ते ?
२६) कस्मात् पृथक् कार्यं न भवति?
२७) कुतः कार्यं प्रारभ्यते ?
२८) केशवः कस्मात् पूर्वदेशे वर्तते?

२३.३ *प्रकोष्ठस्थशब्दाननुसृत्य रिक्तस्थानानि पूरयत ।*

१) वानराः .... अवरोहन्ति (पर्वत) ।
२) फले .... अपतताम् (वृक्ष) ।
३) गावः .... बिभ्यति (सिंह) ।
४) आवां .... त्रस्यावः (भल्लूक) ।
५) सैनिकाः देशान् .... त्रायन्ते (वैरिन्) ।
६) रामः .... अवतरति (शिखर) ।

---

१२. आङ्मर्यादावचने । १३. पञ्चमी विभक्ते । १४. पृथग् विनानानाभिस्तृतीयान्यतरस्याम् । १५. ल्यब्लोपे कर्मण्यधिकरणे च । १६. करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य । १७. दूरान्तिकार्थेभ्यो द्वितीया च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७) वयं .... बिभीमः (नरक) ।

८) शिक्षकाः .... न विरमन्ति (शिक्षण) ।

९) वैशाखः .... उत्तरः वर्तते (चैत्र)

१०) त्वम् .... आरभ्य कार्यं करोषि (पौष) ।

११) रामौ .... परतः शौचं कुरुतः (शयन) ।

१२) ग्रामः .... प्राक् अस्ति (अरण्य) ।

१३) जन्मभूमिः .... गरीयसी विद्यते (स्वर्ग) ।

१४) नवोढा .... जिह्रेति (श्वसुर) ।

१५) धनं .... विना न भवति (परिश्रम) ।

१६) कार्यं .... पृथक् न जायते (सीता) ।

२३.४ *अधोलिखितपदानां वाक्येषु प्रयोगं कुरुत ।*

ग्रामात् । ताभ्याम् । तेभ्यः । तस्याः । त्वत् । मत् । युवाभ्याम् । आवाभ्याम्। युष्मभ्यम् । अस्मभ्यम् । हरेः । भानोः । नद्याः। सीतायाः। लताभ्यः । नीडात् । कृच्छात् । पितुः । मात्रोः । भ्रातृभ्यः । सर्वस्माद् । महतः । गच्छतः । हसन्त्याः। पयसः । राज्ञः । यूनः । भल्लुकाभ्याम् । पर्वताभ्याम् । शिखरेभ्यः । जलाशयात्। वलभ्याः । अस्मात् । आभ्याम् । एभ्यः । लुब्धकाद् । विनयात् । धनात् ।

२३.५ *कोष्ठस्थशब्दाननुसृत्य प्रश्नानामुत्तराणि लिखत ।*

१ वानराः	कस्माद्	पतन्ति ?	(वृक्ष)
(वानराः वृक्षात् पतन्ति ।)			
२ गावः	कस्माद्	बिभ्यति ?	(वृक)
३ यूयं	[illegible]	आगच्छथ ?	(ग्राम)
४ वयं	कस्माद्	त्रस्यामः	(व्याघ्र)
५ कार्तिकः	कस्मात्	उत्तरः अस्ति ?	(आश्विन)
६ त्वं	[illegible]	कार्यं करोषि ?	(चैत्र)
७ युवां	कस्माद्	अन्तर्धत्थः ?	(चौर)
८ युवतिः	कस्माद्	जिह्रेति ?	युष्मद्)
९ पिता पुत्रीं	कस्माद्	निवारयति	(कुप्रवृत्ति)
१० माता त्वां	कुतः	निषेधति ?	(दुर्जनसंसर्ग)
११ सीता	कस्मात्	गरीयसी अस्ति ?	(उमा)
१२ अध्ययनं	कस्मात्	पृथक् न भवति ?	(पुस्तक)
१३ यूयं	केभ्यः	त्रस्यथ ?	(सिंह)
१४ युवां	काभ्यां	बिभ्यथः ?	(भल्लूक)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१५ सादिनः	केभ्यः	अवतरन्ति ?	(अश्व)
१६ मृगाः	कस्मात्	अन्तर्दधति ?	(केशरिन्)
१७ शिक्षकाः	कस्माद्	न विरमन्ति ?	(शिक्षण)
१८ यूयं	कस्माद्	बिभीथ ?	(भ्रष्टाचार)
१९ नद्यः	कुतः	प्रवहन्ति ?	(तुषाराद्रि)

२३.६ *निम्नपदानि प्रयुज्य वाक्यानि रचयत ।*

५१ एकपञ्चाशत्	५२ द्विपञ्चाशत्	५३ त्रिपञ्चाशत्	५४ चतुःपञ्चाशत्	५५ पञ्चपञ्चाशत्
५६ षट्पञ्चाशत्	५७ सप्तपञ्चाशत्	५८ अष्टपञ्चाशत्	५९ नवपञ्चाशत्	६० षष्टिः
६१ एकषष्टिः	६२ द्विषष्टिः	६३ त्रिषष्टिः	६४ चतुष्षष्टिः	६५ पञ्चषष्टिः
६६ षट्षष्टिः	६७ सप्तषष्टिः	६८ अष्टषष्टिः	६९ नवषष्टिः	७० सप्ततिः
७१ एकसप्ततिः	७२ द्विसप्ततिः	७३ त्रिसप्ततिः	७४ चतुःसप्ततिः	७५ पञ्चसप्ततिः
७६ षट्सप्ततिः	७७ सप्तसप्ततिः	७८ अष्टसप्ततिः	७९ नवसप्ततिः	८० अशीतिः
८१ एकाशीतिः	८२ द्व्यशीतिः	८३ त्र्यशीतिः	८४ चतुरशीतिः	८५ पञ्चाशीतिः
८६ षडशीतिः	८७ सप्ताशीतिः	८८ अष्टाशीतिः	८९ नवाशीतिः	९० नवतिः
९१ एकनवतिः	९२ द्विनवतिः	९३ त्रिनवतिः	९४ चतुर्नवतिः	९५ पञ्चनवतिः
९६ षण्णवतिः	९७ सप्तनवतिः	९८ अष्टनवतिः	९९ नवनवतिः	[illegible] शतम्

२३.७ *अधोलिखितशब्दानां पञ्चमीविभक्तौ रूपाणि लिखत ।*

तद्, युष्मद्, अस्मद्, केशव, रमा, मुनि, भानु, पितृ, पत्र, बधू, सखि, राजन्, महत्, कमला, गुरु, नदी, भ्रातृ, नप्तृ, रिपु, मित्र, नक्षत्र, चमरी, भेक, वन, स्त्री, पुष्प, विधवा, कुसुम, शूकर ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विंशः पाठः

षष्ठी शेषे

—	एकव.	रामस्य	पुत्रः	गच्छति
प्रथमपुरुषे	द्विव.	रामस्य	पुत्रौ	गच्छतः
	बहुव.	रामस्य	पुत्राः	गच्छन्ति
	एकव.	मम	पुत्रः त्वम्	गच्छसि
मध्यमपुरुषे	द्विव.	आवयोः	पुत्रौ युवाम्	गच्छथः
	बहुव.	अस्माकम्	पुत्राः यूयम्	गच्छथ
	एकव.	तव पुत्रः	अहम्	गच्छामि
उत्तमपुरुषे	द्विव.	युवयोः पुत्रौ	आवाम्	गच्छावः
	बहुव.	युष्माकं पुत्राः	वयम्	गच्छामः

२४.१ अधोलिखितव्याक्यानि पठत ।

अयं [1]रामस्य पुत्रः वर्तते ? त्वं [2]विद्यायाः हेतोः विद्यापीठं गच्छसि । ते निवासस्य हेतोः गृहं यान्ति । सः [3]कस्य हेतोः (केन हेतुना) वसति ? इयं [4]कृष्णस्य कृतिः वर्तते। पयस[illegible]नेन शरीरं पुष्यति । इदं [5]छात्रस्य शयितं विद्यते। हरिः [6]अस्माकं सेवित[illegible] अस्ति । इदं तव कार्यम् विद्यते । कृष्णः [7]दिनस्य पञ्चकृत्वः खादति । [illegible]त्राः मासस्य द्विः पठन्ति । [8]पर्वतस्य उपरि हिमानी विद्यते। गिरेः उपरिष्टात् [illegible]ाः सन्ति । तेषां पुरः बालकाः क्रीडन्ति । प्रसादस्य उत्तरतः वृक्षाः सन्ति । [9]नगरस्य अन्तिकं [illegible] ग्रामस्य दूरं वनं विद्यते । [10]तव कुशलं [illegible] । [illegible]ष्णोः[11] तुल्यः केशवः नास्ति । विद्यायाः समं धनं न विद्यते । [illegible]नः [12]मातुः स्मरति । नगरस्य समीपे जलाशयः वर्तते । मूर्खाणां दोषाः वहवः सन्ति । कृष्णस्य कृते किमपि नास्ति । गुरोः समक्षं किं ब्रवीसि ? [13]हंसानां मध्ये वकः न शोभते । [14]रुदतः शिशोः माता अगच्छत् । रामः शतस्य दीव्यति ।

---

१. षष्ठी शेषे । २. षष्ठी हेतुप्रयोगे । ३. सर्वनाम्नस्तृतीया च । ४. कर्तृकर्मणोः कृति । ५. अधिकरणवाचिनश्च। ६. कृत्यानां कर्तरि वा । ७. कृत्वोऽर्थप्रयोगे कालेऽधिकरणे । ८. षष्ठ्यतसर्थप्रत्ययेन । ९. दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् । १०. चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः । ११. तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् । १२. अधीगर्थदयेषां कर्मणि । १३. यतश्च निर्धारणम् । १४. षष्ठी चानादरे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२४.२ *कोष्ठस्थशब्दाननुसृत्य प्रश्नानामुत्तराणि लिखत ।*

१	त्वं कस्य हेतोः विद्यालयं गच्छसि ?	(पठन)
२	इयं कस्य कृतिः वर्तते ?	(सीता)
३	एतानि केषां शयितानि विद्यन्ते ?	(छात्र)
४	विष्णुः केषां सेवितव्यः अस्ति ?	(मनुज)
५	इदं केषां कार्यम् अस्ति ?	(युष्मद्)
६	कस्य उपरि हिमं विलसति ?	(हिमवत्)
७	कस्य उत्तरतः ब्रह्मपुत्रः वहति ?	(हिमालय)
८	कयोः अन्तिके पुत्रौ निवसतः ?	(मातृ, पितृ)
९	केषां मध्ये मूढः न शोभते ?	(बुध)
१०	ते कस्य हेतोः वनं गच्छन्ति ?	(इन्धन)
११	त्वं कस्य समक्षं तिष्ठसि ?	(शिक्षक)
१२	केषां पुरः छात्राः वसन्ति ?	(गुरु)
१३	कस्य विश्वासः नास्ति ?	(शृङ्गिन्)
१४	नरः केषां श्रेष्ठः अस्ति ?	(प्राणिन्)
१५	केषां मध्ये रामः पटुः विद्यते ?	(छात्र)

२४.३ *कोष्ठस्थशब्दाननुसृत्य रिक्तस्थानं पूरयत ।*

१	इयं	रचना वर्तते	(किम्) ।
२	त्वं	हेतोः वनं गच्छसि	(काष्ठ) ।
३	इदं	शयितं विद्यते	(छात्र) ।
४	शिवः	सेवितव्यः अस्ति	(तद्) ।
५	रामः	पञ्चकृत्वः खादति	(दिवस) ।
६	वनं	दूरं विद्यते	(न[illegible]) ।
७	....	उत्तरतः [illegible]	(ग्राम[illegible])
८	देशसेवनम्	कर्तव्यं वर्तते	(सर्व) ।
९	....	उपरि वृक्षाः सन्ति	(शिखर) ।
१०	....	कुशलं भवतु	(युष्मद्)
११	....	कार्यं नास्ति	(अस्मद्)
१२	वयम्	अपराधं सहामहे	(तद्) ।
१३	....	पुत्राः आगच्छन्ति	(राजन्) ।
१४	....	कार्यं वर्तते	(अस्मद्) ।
१५	इदं पुस्तकं	नास्ति	(यष्मद्) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुर्विंशः पाठः

षष्ठी शेषे

प्रथमपुरुषे	एकव.	रामस्य	पुत्रः	गच्छति
	द्विव.	रामस्य	पुत्रौ	गच्छतः
	बहुव.	रामस्य	पुत्राः	गच्छन्ति
मध्यमपुरुषे	एकव.	मम	पुत्रः त्वम्	गच्छसि
	द्विव.	आवयोः	पुत्रौ युवाम्	गच्छथः
	बहुव.	अस्माकम्	पुत्राः यूयम्	गच्छथ
उत्तमपुरुषे	एकव.	तव पुत्रः	अहम्	गच्छामि
	द्विव.	युवयोः पुत्रौ	आवाम्	गच्छावः
	बहुव.	युष्माकं पुत्राः	वयम्	गच्छामः

२४.१ अधोलिखितव्याक्यानि पठत ।

अयं [१]रामस्य पुत्रः वर्तते ? त्वं [२]विद्यायाः हेतोः विद्यापीठं गच्छसि । ते निवासस्य हेतोः गृहं यान्ति । सः [३]कस्य हेतोः (केन हेतुना) वसति ? इयं [४]कृष्णस्य कृतिः वर्तते। पयस[illegible]नेन शरीरं पुष्यति । इदं [५]छात्रस्य शयितं विद्यते। हरिः [६]अस्माकं सेवित[illegible]अस्ति । इदं तव कार्यम् विद्यते । कृष्णः [७]दिनस्य पञ्चकृत्वः खादति । [illegible]त्राः मासस्य द्विः पठन्ति । [८]पर्वतस्य उपरि हिमानी विद्यते। गिरेः उपरिष्ठात् [illegible]ाः सन्ति । तेषां पुरः बालकाः क्रीडन्ति । प्रसादस्य उत्तरतः वृक्षाः सन्ति । [९]नगरस्य अन्तिकं [illegible] ग्रामस्य दूरं वनं विद्यते । [१०]तव कुशलं [illegible] । विष्णोः [११] तुल्यः केशवः नास्ति । विद्यायाः समं धनं न विद्यते । [illegible]ः [१२]मातुः स्मरति । नगरस्य समीपे जलाशयः वर्तते । मूर्खाणां दोषाः वहवः सन्ति । कृष्णस्य कृते किमपि नास्ति । गुरोः समक्षं किं ब्रवीसि ? [१३]हंसानां मध्ये वकः न शोभते । [१४]रुदतः शिशोः माता अगच्छत् । रामः शतस्य दीव्यति ।

---

१. षष्ठी शेषे । २. षष्ठी हेतुप्रयोगे । ३. सर्वनाम्नस्तृतीया च । ४. कर्तृकर्मणोः कृति । ५. अधिकरणवाचिनश्च। ६. कृत्यानां कर्तरि वा । ७. कृत्वोऽर्थप्रयोगे कालेऽधिकरणे । ८. षष्ठ्यतसर्थप्रत्ययेन । ९. दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् । १०. चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः । ११. तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् । १२. अधीगर्थदयेषां कर्मणि । १३. यतश्च निर्धारणम् । १४. षष्ठी चानादरे ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२४.२ *कोष्ठस्थशब्दाननुसृत्य प्रश्नानामुत्तराणि लिखत ।*

१ त्वं कस्य हेतोः विद्यालयं गच्छसि ? (पठन)
२ इयं कस्य कृतिः वर्तते ? (सीता)
३ एतानि केषां शयितानि विद्यन्ते ? (छात्र)
४ विष्णुः केषां सेवितव्यः अस्ति ? (मनुज)
५ इदं केषां कार्यम् अस्ति ? (युष्मद्)
६ कस्य उपरि हिमं विलसति ? (हिमवत्)
७ कस्य उत्तरतः ब्रह्मपुत्रः वहति ? (हिमालय)
८ कयोः अन्तिके पुत्रौ निवसतः ? (मातृ, पितृ)
९ केषां मध्ये मूढः न शोभते ? (बुध)
१० ते कस्य हेतोः वनं गच्छन्ति ? (इन्धन)
११ त्वं कस्य समक्षं तिष्ठसि ? (शिक्षक)
१२ केषां पुरः छात्राः वसन्ति ? (गुरु)
१३ कस्य विश्वासः नास्ति ? (शृङ्गिन्)
१४ नरः केषां श्रेष्ठः अस्ति ? (प्राणिन्)
१५ केषां मध्ये रामः पटुः विद्यते ? (छात्र)

२४.३ *कोष्ठस्थशब्दाननुसृत्य रिक्तस्थानं पूरयत ।*

१ इयं .... रचना वर्तते (किम्) ।
२ त्वं .... हेतोः वनं गच्छसि (काष्ठ) ।
३ इदं .... शयितं विद्यते (छात्र) ।
४ शिवः .... सेवितव्यः अस्ति (तद्) ।
५ रामः .... पञ्चकृत्वः खादति (दिवस) ।
६ वनं .... दूरं विद्यते (न[illegible]) ।
७ .... उत्तरतः [illegible] (ग्राम)
८ देशसेवनम् .... कर्तव्यं वर्तते (सर्व) ।
९ .... उपरि वृक्षाः सन्ति (शिखर) ।
१० .... कुशलं भवतु (युष्मद्)
११ .... कार्यं नास्ति (अस्मद्)
१२ वयम् .... अपराधं सहामहे (तद्) ।
१३ .... पुत्राः आगच्छन्ति (राजन्) ।
१४ .... कार्यं वर्तते (अस्मद्) ।
१५ इदं पुस्तकं .... नास्ति (यष्मद्) ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१६ .... धर्मे मतिः न विद्यते (तत्) ।

१७ लोके .... महत्त्वम् अस्ति (विद्या) ।

१८ त्वं .... साक्षी असि (विवाद) ।

१९ मम भ्राता .... वस्त्रं ददाति (रजक) ।

२४.४ *निम्नपदानां वाक्येषु प्रयोगं कुरुत ।*

देवस्य। कृष्णयोः। श्यामानाम्। रमायाः। सीतयोः। कमलानाम्। हरेः। कव्योः। सत्याः । नद्योः । सरिताम् । मातुः । पित्रोः । वधूनाम् । रात्रेः । शंभोः। ब्रह्मणः। हेतोः। हरितम् । कर्तव्यम् । पञ्चकृत्वः । दूरम् । उत्तरतः। दक्षिणतः। उपरि । तव। युवयोः । युष्माकम् । मम । आवयोः । अस्माकम् । तेषाम् । सर्वेषाम् । तस्याः। तयोः । तासाम् । अस्य । अनयोः । एषाम् । श्रेष्ठः । उत्तमः। अस्याः । आसाम्।

२४.५ *निम्नपदानि पठत, वाक्येषु प्रयोगञ्च कुरुत ।*

प्रथमः। द्वितीयः। तृतीयः । चतुर्थः । पञ्चमः । षष्ठः । सप्तमः । अष्टमः । नवमः। दशमः । एकादशः । द्वादशः । त्रयोदशः । चतुर्दशः । पञ्चदशः । षोडशः। सप्तदशः। अष्टादशः। एकोनविंशतितमः । विंशतितमः । एकविंशतितमः । त्रिंशत्तमः। चत्वारिंशत्तमः। पञ्चाशत्तमः । षष्टितमः । सप्ततितमः । अशीतितमः । नवतितमः। शततमः। सहस्रतमः । प्रथमा । प्रथमम् । एकादशी । विंशतितमी । विंशतितमम्।

२४.६ *निम्नपदानि प्रयुज्य वाक्यानि रचयत ।*

१००० सहस्रम्	१०००० अयुतम्	१००००० लक्षम्
१०००००० नियुतम्	१०००००० कोटिः	१००००००००० दशकोटिः
१००००००[illegible] अर्बुदम्	१०००००००००० [illegible]	१००००००००००० खर्बम्
[illegible]००००००००००० दशखर्बम्	१०००००००००००००० नीलम्	१०००००००००००००० दशनीलम्
१००००००००००००० दशपद्मम्		

२४.७ *अधोलिखितशब्दानां षष्ठीविभक्तौ रूपाणि लिखत ।*

तद्, युष्मद्, अस्मद्, केशव, रमा, मुनि, भानु, पितृ, पत्र, बधू, सखि, राजन्, महत्, कमला, गुरु, नदी, भ्रातृ, नप्तृ, रिपु, मित्र, नक्षत्र, चमरी, भेक, वन, स्त्री, पुष्प, विधवा, कुसुम, शूकर ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चविंशः पाठः

सप्तम्यधिकरणे च

प्रथमपुरुषे	एकव.	सिंहः	वने	गर्जति
	द्विव.	सिंहौ	वनयोः	गर्जतः
	बहुव.	सिंहाः	वनेषु	गर्जन्ति
मध्यमपुरुषे	एकव.	त्वम्	मार्गे	धावसि
	द्विव.	युवाम्	मार्गयोः	धावथः
	बहुव.	यूयम्	मार्गेषु	धावथ
उत्तमपुरुषे	एकव.	अहम्	गृहे	वसामि
	द्विव.	आवाम्	गृहयोः	वसावः
	बहुव.	वयम्	गृहेषु	वसामः

२५.१ *अधोलिखितवाक्यानि पठत ।*

तेषां [१]धर्मे मतिः विद्यते । वने सिंहाः वसन्ति । तिलेषु तैलं वर्तते । वर्षासु वृष्टिः भवति । गङ्गायां घोषः विद्यते । [२]चर्मणि द्वीपिनं हन्ति । दन्तयोः कुञ्जरं हन्ति। केशेषु चमरीं मारयति । [३]नृषु [illegible]णः श्रेष्ठः अस्ति । धावत्सु केशवः श्रेष्ठः विद्यते। छात्रेषु मैत्रः पटुः अस्ति । अयं [illegible]ः [४]व्याकरणे साधुः विद्यते । स द्यूते निपुणः अस्ति । [५]सूर्ये अस्तङ्गते रावणः अ[illegible]च्छत् । उदिते चन्द्रमसि [illegible]रकाः अदृश्यन्त । रुदति पुत्रे पिता अगच्छत् । असौ नि[illegible]याम्[६] उत्सुकः विद्यते [illegible]राजा [७]पृथिव्याम् ईश्वरः वर्तते । त्वं विवादे साक्षी असि ।

२५.२ ***कोष्ठस्थशब्दाननुसृत्य रिक्तस्था[illegible]***

१. मदोन्मत्ताः सिंहाः .... गर्जन्ति (वन) ।
२. अस्माकं मतिः .... वर्तते (विष्णु) ।
३. मम विश्वासः .... नास्ति (युष्मद्) ।
४. तैलानि .... वर्तन्ते (सर्षप) ।
५. सूर्यस्य आतपः .... वर्धते (ग्रीष्म) ।

१. आधारोऽधिकरणम् । २. निमित्तात्कर्मयोगे । ३. यतश्च निर्धारणम् । ४. साध्वसाधुप्रयोगे च । ५. यस्य च भावेन भावलक्षणम् । ६. प्रसितोत्सुकाभ्यां तृतीया च । ७. स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

६. .... भवनानि सन्ति (नगर) ।
७. .... व्याघ्रं घातयति (चर्म) ।
८. .... कुञ्जरं मारयति (दन्त) ।
९. नृपतिः ..... ईश्वरः वर्तते (पृथिवी) ।
१०. नृपत्वं ...... युज्यते (युष्मद्) ।
११. .... गृहीत्वा भृशम् आताडयत् (केश) ।
१२. गुरुः .... साधुः अस्ति । (अस्मद्) ।
१३. .... कालेषु रामः राजा अभूत् (गच्छत्) ।
१४. .... पश्यति सर्पाः मत्स्यान् अखादन् (वक) ।
१५. .... सवितरि वायसः प्रबुद्धः अभूत् (अस्तङ्गत)

२५.३ *समुचितपदानि प्रयुज्य प्रश्नानामुत्तराणि लिखत ।*

१. यूयं कुत्र वसथ ?
२. कस्मिन् तव मतिः विद्यते?
३. वृष्टिः कदा भवति ?
४. श्यामाः केषु कुशलाः सन्ति?
५. तैलं कुत्र वर्तते ?
६. वीराः केषु शरान् मुञ्चन्ति ?
७. त्वयि किं संभाव्यते ?
८. रात्री कदा भवति ?
९. कासु कृष्णा बहुक्षीरा विद्यते ?
१०. केषु कृष्णः चतुरः अस्ति ?
११. यूयं कुत्र पठथ ?
१२. हिमालयः कुत्र वर्तते ?
१३. कस्मिन् सति दिनं भव[illegible] ?
१४. खगाः रात्रौ कुत्र वसन्ति ?
१५. तारकाः कुत्र द्योतन्ते [illegible]
१६. विद्यर्थिनः कुत्र पठन्ति ?

२५.[illegible] *वाक्येषु प्रयोगं कुरु[illegible]*

त्वयि । रमा[illegible] । तस्याम् । मयि । पश्यति । गच्छत्सु । राज्ञि । सर्वस्मिन्। युवयोः । आव[illegible]ः । तस्मिन् । तयोः । तासु । तस्याम् । तेषु । एषु । आसु । हरौ। चन्द्रे। वैक[illegible] । अन्यो[illegible] [illegible] यस्मिन् । यस्याम् । कस्याम्। कस्मिन् ।

२५.५ [illegible]द्धाः संशोधयत ।

तव ऋते मम अन्यत् मित्रं नास्ति । उद्यानस्य परितः वृक्षाः सन्ति । प्रभुः निरपराधं भृत्यं क्रुध्यति । पिता पुत्रस्य प्रति सन्तुष्ट : न अभवत् । दरिद्रः सदैव धनं स्पृहयति । स व्याघ्रस्य बिभेति । भवान् वने अधिवसन्तं रामम् अवोचत् ।

२५.६ *अधोलिखितशब्दानां षष्ठीविभक्तौ रूपाणि लिखत ।*

तद्, युष्मद्, अस्मद्, केशव, रमा, मुनि, भानु, पितृ, पत्र, बधू, सखि, राजन्, महत्, कमला, गुरु, नदी, भ्रातृ, नप्तृ, रिपु, मित्र, नक्षत्र, चमरी, भेक, वन, स्त्री, पुष्प, विधवा, कुसुम, शूकर ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षड्विंशः पाठः

प्रेरणार्थकक्रियापदप्रयोगः

२६.१ *अधोलिखितवाक्यानि पठत ।*

१ रमेशः दोषं त्यजति
– गुरुः [१]रमेशेन दोषं त्याजयति ।

२ रामः मारीचं हन्ति ।
– सीता रामेण मारीचं घातयति ।

३ नृपः धनं ददाति ।
– मन्त्री नृपेण धनं दापयति ।

४ पिता क्रीडनकं क्रीणाति
– वालः पित्रा क्रीडनकं क्रापयति ।

५ पाण्डवाः वनं गच्छन्ति ।
– कौरवाः [२]पाण्डवान् वनं गमयन्ति ।

६ सुमन्त्रः रामं वनं नयति ।
– राजा सुमन्त्रेण रामं वनं [३]नाययति ।

७ वालः चन्द्रं पश्यति ।
– माता वालं चन्द्रं दर्शयति ।

८ नृपः गीतं शृणोति ।
– सा नृपं गीतं श्रावयति ।

९ केशवः गृहं प्रविशति ।
– श्यामः केशवं गृहं प्रवेशयति ।

१० सः वृक्षम् आरोहति ।
– कृष्णः तं वृक्षम् आरोहयति ।

११ नाविकः गङ्गाम् उत्तरति ।
– केशवः नाविकेन गङ्गाम् उत्तारयति ।

१२ निर्धनः भोजनं गृह्णाति ।
– भक्तः निर्धनं भोजनं ग्राहयति ।

१. प्रायेण अण्यन्तः कर्ता णौ तृतीयायां प्रयुज्यते । २. गतिबुद्धिप्रत्यवसानार्थशब्दकर्मकर्णीमणि कर्ता स णौ । ३. नीवह्योर्न ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१३ बालः नगरं प्राप्नोति ।
– पिता बालं नगरं प्रापयति ।

१४ सः शास्त्रं जानाति ।
– गुरुः तं शास्त्रं ज्ञापयति ।

१५ छात्रः पाठं पठति ।
– गुरुः छात्रं पाठं पाठयति ।

१६ शिशुः दुग्धं पिबति ।
– माता शिशुं दुग्धं पाययति ।

१७ कृष्णः अन्नं भुङ्क्ते ।
– यशोदा कृष्णम् अन्नं भोजयति ।

२६.२ *प्रेरणार्थकवाक्येषु परिवर्तनं कुरुत ।*

सः गृहं गच्छति । *(केशवः तं गृहं गमयति ।)* तौ श्वानं हतः । रमेशः फलं भुङ्क्ते। माता जलं पिबति । वयं पाठं पठामः । छात्रः शास्त्रम् अधीते । ते सूर्यं पश्यन्ति । आवां कथां शृणुवः । बालकाः कक्षायाम् प्रविशन्ति । वानराः तं वृक्षम् आरोहन्ति । यूयं नदीम् उत्तरथ । वयं धनं गृह्णीमः । पितरः नगरं प्राप्नुवन्ति । ते शास्त्राणि जानन्ति । भृत्यः भारं नयति। सेवकः कार्यं करोति । रामाः गृहम् अगच्छन् । वानरः फलम् अत्ति । मूर्खः सज्जनं तुदति । गोपालः व्रजं गाम् अवरुणद्धि । श्यामः कन्दुकेन क्रीडति । सेवकः कार्यं करोति । व्याघ्रः मृगान् हन्ति। चौराः द्रविणं हरन्ति ।

२६.[illegible] *सामान्यवाक्येषु परि[illegible]नं कुरुत ।*

कृष्णः केश[illegible] दोषं त्याजयति । उमेशः श्यामेन मृगं घातयति । मन्त्री राज्ञा धनं दापयति । [illegible]ता पुत्रेण पुस्तकं क्रापयति । श्यामः स्वपत्नीं वनं गमयति । त्वं मया केशवं [illegible]नं नाययति । [illegible]कं सूर्यं दर्शयति । एषा मां गीतं श्रावयति। [illegible] अस्मान् गृहं प्रवेशयति । तौ मां वृक्षं आरोहयतः । इमे अस्मान् नाविकेन [illegible]ङ्गाम् उत्तारयन्ति । ते निर्धनान् भोजनं ग्राहयन्ति । अहं त्वां नगरं प्रापयामि । गुरवः छात्रान् शास्त्राणि ज्ञापयन्ति । उमेशः मां पाठं पाठयति । जननी बालं दुग्धं पाययति। सीता अस्मान् अन्नं भोजयति ।

२६.४ *वाक्येषु प्रयोगं कुरुत ।*

पाठयति, वादयति, वाचयति, भाषयति, क्रापयति, नाययति, ग्राहयति, ज्ञापयति, पाचयति, भोजयति, उत्तारयति, आरोहयति, प्रवेशयति, श्रावयति, दर्शयति, गमयन्ति, क्रापयन्ति, दापयन्ति, घातयन्ति, त्याजयन्ति, हारयन्ति, विकासयन्ति, श्रावयन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तविंशः पाठः

वाक्यसंश्लेषणम्

२७.१ *वाक्यसंश्लेषणम्*

त्रिविधेषु वाक्येषु सामान्यवाक्यानां योजकादिसाहाय्येन सामान्यवाक्ये, संयुक्तवाक्ये, मिश्रवाक्ये च श्लेषणमेव वाक्यसंश्लेषणमिति निगद्यते । तच्च प्रत्ययान्तैरव्ययैर्विशेषणैः समस्तैश्च पदैः संपद्यते । क्रमेण यथोदाहरणानि –

१. क्त्वा–ल्यप्–तुमुन्–शतृ–शानजादिप्रत्ययान्तैः पदैः वाक्यानां संश्लेषणम् ।

विश्लिष्टवाक्यानि	संश्लिष्टवाक्यानि
१. केशवः दशवादनसमये कार्यालये गच्छति । २. तत्र स विविधानि कार्याणि संपादयति । ३. स जनान् तोषयति । ४. स चतुर्वादनसमये गृहं प्रत्यागच्छति।	केशवो दशवादनसमये कार्यालयं गत्वा विविधानि कार्याणि संपाद्य जनान् तोषयित्वा चतुर्वादनसमये गृहं प्रत्यागच्छति ।
१. कृष्णो धार्मिक आसीत् । २. स प्रतिदिनं देवालयं गच्छति स्म। ३. तत्र स पुण्यकार्याणि कृतवान्	धार्मिकः कृष्णः पुण्यकार्याणि विधा[illegible] प्रतिदिनं देवालयं गच्छति स्म [illegible]
१. राजीवश्चिकित्सकोऽस्ति । २. स रुग्णान् सेवते । ३. स धनमर्जयति । ४. ततः सुखेन जीवनं यापयति ।	[illegible]कित्सको राजीवो रुग्णान् सेव[illegible] मानो [illegible]नमर्जयन् सुखेन जीवन[illegible] यापयति [illegible]

२. यदि – च–चेत्–अपि–[illegible]प्रभृतिभिः सापेक्षा[illegible]पेक्षसंयोजकाव्ययपदैः वाक्यानां संश्लेषणम्

विश्लिष्टवाक्यानि	संश्लिष्टवाक्यानि
१. भ्राता प्रातर्भ्रमति । २. स दुग्धमानयति ।	भ्राता प्रातर्भ्रमति दुग्धञ्चानयति ।
१. त्वम् इष्टकैर्गृहं निर्मास्यसि । २. त्वं प्रस्तरैर्गृहं निर्मास्यसि ।	त्वमिष्टकैः प्रस्तरैर्वा गृहं निर्मास्यसि।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विश्लिष्टवाक्यानि	संश्लिष्टवाक्यानि
१. रामो वनं जगाम । २. सीतालक्ष्मणौ वनं जग्मतुः ।	रामो वनं जगाम तदनु सीतालक्ष्मणौ जग्मतुः ।
१. त्वं व्याकरणं सम्यक् पठिष्यसि । २. त्वं भाषायां नैपुण्यं प्राप्स्यसि ।	यदि त्वं व्याकरणं सम्यक् पठिष्यसि तर्हि भाषायां नैपुण्यं प्राप्स्यसि ।
१. केशवः पठति । २. रामः पठितुं शक्नोति ।	यथा केशवः पठति, तथैव रामोऽपि पठितुं शक्नोति ।

३. विशेषणपदैः, वाक्यसंश्लेषणं यथा –

विश्लिष्टानि वाक्यानि	संश्लिष्टानि वाक्यानि
१. वने पुष्पाणि विकसन्ति । २. तत्र शारदी शोभा प्रसरति ।	पुष्पिते वने शारदी शोभा प्रसरति ।
१. नारायणो मीमांसामधीते । २. स पदार्थान् समीक्षते ।	मीमांसको नारायणः पदार्थान् समीक्षते ।
१. जनाः ग्रामेषु तिष्ठन्ति । २. तान् लक्ष्यीकृत्य विकासयोजना विधातव्या ।	ग्रामेषु तिष्ठतो जनान् लक्ष्यीकृत्य विकासयोजना विधातव्या ।

४. [illegible]मस्तपदैर्वाक्यसंश्लेषणं यथा

विश्लिष्टवाक्यानि	संश्लिष्टवाक्यानि
१. वीरस्य गात्राणि रुधिरेण[illegible]णि सन्ति। २. स युद्धकलायां नि[illegible]ऽस्ति । ३. सोऽत्रैवागच्छति ।	रुधिरार्द्रगात्रो युद्धकलानिपुणो वीरोऽत्रैवागच्छति ।

२७.२ [illegible]वाक्यानि पठत ।

रामः गृहं आगच्छति । त्वं छात्रान् पाठयित्वा भोजनाय गच्छसि । ते देवान् समर्च्य नैवेद्यं भक्षयन्ति । रामं हरिं च पूजय । केशवः मातरमपि पितरमपि प्रणमति । रामः कृष्णः वा गच्छतु । एषः काव्यं लिखति, पठति च । त्वं कवितां लिखसि किं वा पठसि । रामः गतवान् उत अत्रैव तिष्ठति । पूर्वं कुसुमं विकसति ततः फलानि जायन्ते । शीघ्रम् आगच्छ नोचेत् अन्यः लभते । सः मम उपकारं न स्मरति प्रत्युत मह्यमेव द्रुह्यति । रावणः सीताम् अहरत्, अतः रामः रावणम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अघातयत्। सः यथेच्छं भक्षयति ततः एव रोगैः पीड्यते । अहं तस्मै हितं नोपदिशामि यत्सः न शृणोति । अहं पुनः आह्वयामि परन्तु सः न आगच्छति । गच्छसि चेद् गच्छ परं सावधानेन भवितव्यम् । इदं सुन्दरम् अस्ति किन्तु महार्घं विद्यते । शब्दः- द्विधा, यथा व्यक्तः अव्यक्तः च । यथा इच्छसि तथा कुरु । यद्यपि मया किमपि नोक्तम् तथापि सः कुपितवान् । श्यामः पाठं पठितुं गच्छति अहं च गच्छामि। यावत् शक्नोषि तावत् कुरु । त्वं गच्छसि चेत्तर्हि यथेच्छं गच्छ। छात्रैः सदा क्रीडनीयम्, एतत् न शोभते । अहं न आगच्छामि इति रामः अकथयत् । त्वं सम्यक् न पठसि, तेन गुरुः कुप्यति । यत् अतीव रक्तं तदेव वस्त्रं दत्तवान् । यः प्रथमां संख्यां लब्धवान् सः प्रहृष्टवान्। यत्र शीतम् अस्ति तत्र वाधा भवति । यदा सूर्यः उदेति तदा अन्धकारः नश्यति । यथा शीघ्रं भवति तथा कुरु। रामः शनैः शनैः गृहं प्रत्यागच्छति । अयं ममाग्रतः किमर्थं तिष्ठति । अहमचिरमेव समागच्छामि। अजस्रं परिश्रमं विधाय पठन्तश्छात्राः नूनमेव परीक्षायां साफल्यं लभन्ते । सूर्यं प्रतिदिनमुदेति । नद्यः परोपकाराय सततं वहन्ति । शुक्रं मङ्गलश्चान्तरा पृथ्वी विद्यते । जलमन्तरेण प्राणिनां जीवनं न रक्ष्यते । त्वमतीव दरिद्रोऽसि अतोऽहं तुभ्यं सुवर्णकङ्कणं दातुमिच्छामि । मम भ्राता पूर्वेद्युरत्रागतः । अपरेद्युः रामं हरिञ्च पूजयितुमितः मन्दिरं गमिष्यामः । अधिकं किं कथयामि - अधुना तव भाग्यं बलवद् विद्यते । वृक्षानधः प्रतिदिनं वानराः नृत्यन्ति । कार्यं कुरु अन्यथा पारिश्रमिकं न लभसे । अद्य ते देवान् समर्च्य झटिति गृहं यान्ति । अयं केवलं जल्पति । त्वं तत्र तूष्णीं तिष्ठ । यदि स तत्र नागच्छति तर्हि कथं कार्यं भवति । प्रातः नगरं परितः हंसाः भृशं नदन्ति । यदा गुरुः आगच्छति तदा छात्राः झटिति समुत्थाय प्रणमन्ति। खले कपोताः युगपत् पतन्ति । त्वं मृषा मा वद। यावदसौ कार्यं विधत्ते तावत् अहं अत्रैव तूष्णीं तिष्ठामि । अकस्माद् चौरः समागतः। ग्रामः इतः दूरं विद्यते । [illegible] बाला बहुधा व्यलपत् ।

२७.३ *संयुक्तवाक्येषु परिवर्तनं कुरुत ।*

यः पठति, सः परीक्षाम् उत्तरति । *(सः पठति परीक्षां च उत्तरति ।)* यथा रामः गतवान् तथैव गोपालः अपि गतवान् । यदि त्वं अग्रे भविष्यसि अहम् अपि अनुसरिष्यामि। यथा त्वं महिषीं क्रीणासि तथैव गामपि क्रीणासि । यद्यपि दूरम् आगतवान् अस्मि तथापि मनः तत्रैव धावति । यद्यपि रोगः शान्तः तथापि दुर्बलः अस्मि। शीघ्रं वदसि चेद् वद अन्यथा अन्यस्मै ददामि। गच्छ गच्छसि चेत् कान्त, तत्रैव स्याज्जनिर्मम । गुरुः यथैव प्राज्ञे विद्यां वितरति तथैव जडेऽपि वितरति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२७.४ *मिश्रवाक्येषु परिवर्तनं कुरुत ।*

पठन् रामः परीक्षायां साफल्यं लभते । *(यथा रामः पठति तथैव परीक्षायां साफल्यं लभते ।)* ते बालाः क्रीडनमिव पठनम् अपि कुर्वन्ति । तस्य गृहिणी प्रियवादिनी सुशीला च विद्यते । भवते नगरवासः रोचते वा विपिनवासः रोचते । सः सासूयः माम् प्रेक्षते। सः पितरौ देववत् पूजयति, गुरुम् अपि संमानयति अतः तं लोकः सत्पुरुषं वदति । रामः अपि क्रीडति, गोपालः अपि नाभ्यस्यति अतः तौ परीक्षां नोत्तरिष्यतः। मदीयां हितोक्तिं गृहाण अन्यथा पश्चात्तप्यसे। तदीयं कर्मकौशलं प्रशंसनीयं परं तम् आलस्यं प्रतिरुणद्धि। पूर्वं ध्वनिः उदेति ततः प्रतिध्वनिः प्रसरति। इदम् औषधं वातम् अनुलोमयति, कफं च क्षपयति, पित्तं च उद्रिक्तं शमयति ।

२७.५ *सरलवाक्ये परिवर्तनं कुरुत ।*

यः पठति स उत्तीर्णो भवति । *(पठन् स उत्तीर्णो भवति ।)* सः गच्छति, सा गच्छति, तौ च गच्छतः वयं गृहं गच्छामः, तदनु पाठं पठामः । अहम् किमपि न कथयामि यत् सः कुप्यति। श्यामः न वदति, अतः अहम् अपि न वदामि । सः पाठं पाठयति परं छात्राः न स्मरन्ति । त्वम् अग्रे भव अहमपि अनुसरिष्यामि । पूर्वं कुसुमम् उदेति ततः फलं भविष्यति । गोविन्दः पाठं श्रावयति अतः गुरुः प्रसीदति। वयं मुहुः तं सान्त्वयामः परं सः धैर्यं न धारयति । सः कार्ये सहायं न ददाति प्रत्युत व्याघातं करोति। पुत्र[illegible] मार्गे अपतत् अतः तं माता उत्थापयति स्म । पूर्वं रामः अगमत् तदनु गोपाल[illegible]गच्छत् ।

२[illegible].६ *अधोलिखितपदानि[illegible]युज्य वाक्यानि रचयत ।*

अकस्मात्[illegible] अग्रतः । अचिरम् । अजस्रम् । सततम् । अन्तरा । अन्तरेण । अतः। अतीव[illegible]त्र। अथ। अधिकम् । अद्य । अधः। अपरेद्युः। अधुना । अन्यत्र। अन्यथा [illegible]भितः । इतः । इत्थम्[illegible]म् । कदा । केवलम् । झटिति। तर्हि। ता[illegible]न् [illegible]कम् ।[illegible]कषा । नीचैः । परेद्युः । पूर्वेद्युः । पृथक् । प्रतिदिनं। [illegible]त्युत । प्रसह्य । प्राक् । प्रातः । प्रायः । बहुधा । भृशम् । मृषा। यदा । युगपत् । विना । वृथा । इव । तत्र । अत्र । उपरि । अधः । बहिः । अन्तः। अधुना । यदा। तदा । कदा । यतः ततः । कुतः । यथा । तथा । उच्चैः नीचैः मिथ्या । सत्यम् । इषत् । तूष्णीम् । किञ्चिद् । चिरम् । मुहुः । भूयोभूयः क्रमशः नोचेत् । प्रत्युत । झटिति । सम्यक् । स्पष्टम् । यद्यपि । तदनु । मन्दम् । शस्वत् । शनैः । सर्वदा। सहसा । साकम् । समीपम् । सम्यक् । सर्वत्र । सदा । स्वयम् । साक्षात् । किन्तु। परन्तु । अथवा । यदि । तर्हि । यावत् । तावत् । धिक् । हन्त । हा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टाविंशः पाठः

पञ्चतन्त्रपरिचयः

२८.१ *अधोलिखितपद्यानि पठत ।*

ब्रह्मा रुद्रः कुमारो हरिवरुणयमा वह्निरिन्द्रः कुवेरः
चन्द्रादित्यौ सरस्वत्युदधियुगनगा वायुरुर्वी भुजङ्गाः ।
सिद्धा नद्योऽश्विनौ श्रीर्दितिरदितिसुताः मातरश्चण्डिकाद्याः
वेदास्तीर्थानि यज्ञाः गणवसुमुनयः पान्तु नित्यं ग्रहाश्च ।।१।।
मनवे वाचस्पतये शुक्राय पाराशराय ससुताय ।
चाणक्याय च विदुषे नमोऽस्तु नयशास्त्रकर्तृभ्यः ।।२।।
सकलार्थशास्त्रसारं जगति समालोक्य विष्णुशर्मेदम् ।
तन्त्रैः पञ्चभिरेतच्चकार सुमनोहरं शास्त्रम् ।।३।।

२८.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. इमानि पद्यानि केन सन्ति प्रणीतानि ?
२. प्रथमपद्ये कर्तृपदानि कानि, किञ्च तेषां क्रियापदम् ?
३. नयशास्त्रप्रवर्तकाः के सन्ति ?
४. विष्णुशर्मा कीदृशं ग्रन्थं प्राणैषीत् ?
५. कस्मिन् छन्दसि रचितानि सन्तीमानि पद्यानि ?

२८.३ *विग्रहं प्रदर्श्य समासनामानि च लिखत ।*

हरिवरुणयमाः । चन्द्रादित्यौ । सरस्वत्युदधियुगनगाः । गणवसुमुनयः ।
ससुताय। नयशास्त्रकर्तृभ्यः । सकलार्थशास्त्रसारम् ।

२८.४ *प्रकृतिप्रत्ययविच्छेदं कुरुत ।*

उदधिः । भुजङ्गः । यज्ञः । कर्ता । समालोक्य । सुमनोहरः । शास्त्रम् ।

२८.५ *उपरितनपद्यान्तर्गतपदानां केवलं पर्यायपदानि लिखत ।*

२८.६ *लिङ्गनिर्देशं कुरुत ।*

सरस्वती । उदधिः । श्रीः । माता । तीर्थम् ।

२८.७ *उक्तपद्यानामन्वयं निर्दिशत ।*

२८.८ *उपरितनपद्यानां भावार्थं लिखत ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२८.९ *वाच्यपरिवर्तनं कुरुत ।*

१. चण्डिकाद्या मातरो युष्मान् पान्तु ।

२. विष्णुशर्मा सकलार्थशास्त्रसारं पञ्चतन्त्रमरचयत् ।

३. नयशास्त्रकर्तारो विष्णुशर्मणा प्रणम्यन्ते ।

४. असौ सकलार्थशास्त्राणि सम्यगालोचितवान् ।

२८.१० *वाक्यसंश्लेषणं कुरुत ।*

ब्रह्मा पातु । हरिवरुणौ पातः । वायवः पान्तु ।

२८.११ *वाक्यविश्लेषणं कुरुत ।*

विष्णुशर्मा ब्रह्मरुद्रादीन् देवान् मनुवृहस्पत्यादीन् नयशास्त्रकर्तॄन् च प्रणम्य सुमनोहरं सकलार्थशास्त्रसारं पञ्चभिस्तन्त्रैः समुल्लसितं पञ्चतन्त्रं नाम ग्रन्थरत्नमसृजत्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकोनत्रिंशः पाठः

कुपुत्रचिन्ता

२९.१ *निम्नगद्यभागं पठत ।*

तद्यथानुश्रूयते – अस्ति दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् । तत्र सकलार्थिद्रुमः प्रवरमुकुटमणिमरीचिमञ्जरीचर्चितचरणयुगलः सकलकलापारङ्गतोऽमरशक्तिर्नाम राजा बभूव । तस्य त्रयः पुत्राः परमदुर्मेधसो बहुशक्तिः, उग्रशक्तिः, अनन्तशक्तिश्चेति नामानो बभूवुः । अथ राजा शास्त्रविमुखान्, तानालोक्य सचिवानाहूय प्रोवाच– भोः, ज्ञातमेतद् भवद्भिर्यन्ममैते पुत्राः शास्त्रविमुखाः, विवेकरहिताश्च । तदेतान् पश्यतो मे महदपि राज्यं न सौख्यमावहति ।

२९.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. महिलारोप्यं नाम नगरं कुत्रावर्तत ?
२. अमरशक्तिः कीदृशो नृपतिरजायत ?
३. तस्य कति सुता आसन्, के च ते ?
४. राज्ञा सचिवाः किमर्थमाहूताः ?
५. अमरशक्तेः पुत्राः कीदृशा आसन् ?
६. महदपि राज्यं राज्ञः सौख्याय किमर्थं नाभवत् ?

२९.३ *उपरितनगद्यान्तर्गतपदानां केवलं पर्या[illegible]ानि लिखत ।*

२९.४ *सविग्रहं समासनामानि लिखत ।*

सकलार्थिद्रुमः । प्रवरमुकुटमणिमरीचिमञ्जरीचर्चितचरणयुगलः । सकलकलापारङ्गतः । अमरशक्तिः । परमदुर्मेधसः । बहुशक्तिः । उग्रशक्तिः । अनन्तशक्तिः । शास्त्रविमुखान् । विवेकरहिताः ।

२९.५ *प्रकृतिप्रत्ययविच्छेदं कुरुत ।*

दाक्षिणात्यम् । चर्चितः । आलोक्य । आहूय । ज्ञातम् । पश्यन् । राज्यम् । सौख्यम् ।

२९.६ *लिङ्गनिर्देशं कुरुत ।*

नगरम् । द्रुमः । मञ्जरी । चरणः । सौख्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

२९.७ *वाच्यपरिवर्तनं कुरुत ।*

१. दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरं मया विलोकितम् ।

२. तत्र सकलार्थिद्रुमोऽमरशक्तिनामा नृपो बभूव ।

३. स परमदुर्मेधसस्त्रीन् पुत्रानसूत ।

४. नृपेण स्वसुताः शास्त्रविमुखा विलोकिताः ।

५. ततः स सचिवानाहूय स्वचिन्तां प्रकटितवान् ।

२९.८ *वाक्यसंश्लेषणं कुरुत ।*

दाक्षिणात्ये महिलारोप्यं नाम नगरमस्ति । तत्र अमरशक्तिर्नाम नृपतिरवर्तत। स सकलार्थिनां कल्पद्रुम इवासीत् । स कलायामपि प्रणीणोऽविद्यत । मध्यम उग्रशक्तिरिति निगद्यते स्म । कनिष्ठश्च जना अनन्तशक्तिं कथयन्ति स्म । एते सर्वेऽपि परमदुर्मेधसोऽवर्तन्त।

२९.९ *वाक्यविश्लेषणं कुरुत ।*

दाक्षिणात्ये जनपदे निवसन् कोऽप्यमरशक्तिनामा नरपतिः स्वसुतान् शास्त्रविमुखान् परमदुर्मेधसो विलोक्य सचिवानाहूय स्वचिन्तां प्राकटयत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिंशः पाठः

असत्पुत्रनिन्दा

३०.१ *निम्नपद्यानि पठत ।*

अजातमृतमूर्खेभ्यो मृताजातौ सुतौ वरम् ।
यतस्तौ स्वल्पदुःखाय यावज्जीवं जडो दहेत् ।।१।।
वरं गर्भस्त्रावो वरमृतुषु नैवाभिगमनम्
वरं जातः प्रेतो वरमपि च कन्यैव जनिता ।
वरं वन्ध्या भार्या वरमपि च गर्भेषु वसतिः
न चाविद्वान् रूपद्रविणगुणयुक्तोऽपि तनयः ।।२।।
किं तया क्रियते धेन्वा या न सूते न दुग्धदा ।
कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्मिकः ।।३।।
वरमिह वा सुतमरणं मा मूर्खत्वं कुलप्रसूतस्य ।
येन विबुधजनमध्ये जारज इव लज्जते मनुष्यः ।।४।।
गुणिगणगणनारम्भे न पतति कठिनी ससंभ्रमाद्यस्य ।
तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी भवति ।।५।।

३०.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. पुत्राः कतिविधाः, तेषु कतमोऽधमः ? किञ्च तस्य कारणम् ?
२. मूर्खतनयोत्पत्यपेक्षया काः का अवस्था भवन्ति समीचीनाः ?
३. कुपुत्रेण पिता विदुषामग्रे क इव लज्जते ?
४. कीदृशस्य पुत्रस्य न किञ्चित् प्रयोजनम्, कश्चात्र दृष्टान्तः ?
५. कीदृशी माता पुत्रवती न गण्यते ?

३०.३ *उक्तपद्यानामन्वयं लिखत ।*

३०.४ *उपरितनपद्यान्तर्गतपदानां पर्यायपदानि निर्दिशत ।*

३०.५ *विग्रहं प्रदर्श्य समासनामानि च लिखत ।*

अजातमृतमूर्खेभ्यः । मृताजातौ । स्वल्पदुःखाय । गर्भस्त्रावः । रूपद्रविण-गुणयुक्तः । दुग्धदा । विबुधजनमध्ये । जारजः। गुणिगणगणनारम्भे । ससंभ्रमा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३०.६ ***प्रकृतिप्रत्ययविच्छेदं कुरुत ।***

मृतः । जातः । मूर्खत्वम् । मरणम् । विद्वान् । भक्तिमान् । प्रेतः । युक्तः। दुग्धदा ।

३०.७ ***वाच्यपरिवर्तनं कुरुत ।***

१. अजातमृतमूर्खेष्वाद्यौ सुतौ स्वल्पमेव दुःखं दत्तः, जडस्तु यावज्जीवं दहति।
२. रूपद्रविणगुणयुक्तोऽप्यविद्वान् पुत्रः पित्रोः सुखाय न भवति ।
३. कुपुत्रेण मनुष्यः सभायां जारज इव लज्जते ।

३०.८ ***वाक्यसंश्लेषणं कुरुत ।***

तया धेन्वा किं भवति ? सा दुग्धमपि न ददाति । सा वत्समपि न सूते । जातेन तेन पुत्रेण किं प्रयोजनम् ? स विद्वान् नास्ति । स धर्मात्मा च न विद्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकत्रिंशः पाठः

पुत्राणां प्रबोधोपायः

३१.१ *निम्नलिखितमनुच्छेदं पठत ।*

तदेतेषां यथा बुद्धिप्रकाशो भवति तथा कोप्युपायोऽनुष्ठीयताम् । अत्र च मद्दत्तां वृत्तिं भुञ्जानानां पण्डितानां पञ्चशती तिष्ठति । ततो यथा मम मनोरथाः सिद्धिं यान्ति तथाऽनष्ठीयताम् । तत्रैकः प्रोवाच– देव द्वादशभिर्वर्षैर्व्याकरणं श्रूयते, ततो धर्मशास्त्राणि मन्वादीनि, अर्थशास्त्राणि चाणक्यादीनि, कामशास्त्राणि वात्स्यायनादीनि। ततः प्रतिबोधनं भवति । अथ तन्मध्यतः सुमतिर्नाम सचिवः प्राह– अशास्वतोऽयं जीवितव्यो विषयः । प्रभूतकालज्ञेयानि शब्दशास्त्राणि । तत्संक्षेपमात्रं शास्त्रं किञ्चिदेतेषां बोधनार्थं चिन्त्यतामिति ।

अनन्तपारं किल शब्दशास्त्रं स्वल्पं तथायुर्बहवश्च विघ्नाः ।
सारं ततो ग्राह्यमपास्य फल्गु हंसैर्यथा क्षीरमिवाम्बुमध्यात् ।।

तदत्रास्ति विष्णुशर्मा नाम ब्राह्मणः सकलशास्त्रपारङ्गमश्छात्रसंसदि लब्धकीर्तिः । तस्मै समर्पयतु एतान् । स नूनं द्राक् प्रबुद्धान् करिष्यति । स राजा तदाकर्ण्य विष्णुशर्माणमाहूय प्रोवाच - भो भगवन् मदनुग्रहार्थमेतानर्थशास्त्रं प्रति द्राग्यथानन्यसदृशान् विदधासि तथा कुरु। तदाऽहं त्वां शासनशतेन योजयिष्यामि।

३१.२ *निम्नप्रश्नानामुत्तराणि लिखत*

क) केषां बुद्धिप्रकाशाय चिन्तितोऽस्त्ययमुपायः ?
ख) प्रतिबोधनाय कोऽस्त्यध्ययनक्रमः ?
ग) धर्मार्थकामशास्त्राणां प्रवर्तकाः के सन्ति ?
घ) प्रभूतकालज्ञेयानां शास्त्राणां कोऽस्ति ग्रहणोपायः ?
ङ) विष्णुशर्माणमाहूय राज्ञा किं निवेदितम् ?

३१.३ *उक्तानुच्छेदान्तर्गतपदानां पर्यायपदानि लिखत ।*

३१.४ *विग्रहान् प्रदर्श्य समासनामानि च लिखत ।*

बुद्धिप्रकाशः । अशास्वतः। प्रभूतकालज्ञेयानि । अनन्तपारम् । शब्दशास्त्रम्। सकलशास्त्रपारङ्गतः । छात्रसंसदि । लब्धकीर्तिः । मदनुग्रहार्थम् । अनन्यसदृशान्। शासनशतेन ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३१.५ *प्रकृतिप्रत्ययविच्छेदं कुरुत ।*

दत्तम् । वृत्तिम् । भुञ्जानः । बोधनम् । ततः । व्याकरणम् । जीवितव्यः । ग्राह्यम् । प्रबुद्धः । आकार्य । आहूय । शासनम् ।

३१.६ *लिङ्गनिर्देशं कुरुत ।*

बुद्धिः, मनोरथः, धर्मशास्त्रम्, व्याकरणम्, आयुः ।

३१.७ *उक्तानुच्छेदस्य स्वकीयैः शब्दैः सरलार्थं लिखत ।*

३१.८ *वाच्यपरिवर्तनं कुरुत ।*

क) कोऽप्युपायोऽनुष्ठीयताम् ।

ख) अत्र मद्दत्तां वृत्तिं भुञ्जानाः पण्डिता वसन्ति ।

ग) विष्णुशर्मा नाम लब्धकीर्तिर्ब्राह्मणस्तान् प्रबुद्धान् करिष्यति ।

३१.९ *वाक्यसंश्लेषणं कुरुत ।*

विष्णुशर्मा नाम ब्राह्मणो विद्यते । स च छात्रसंसदि लब्धकीर्तिरस्ति । असौ सकलशास्त्रेषु निष्णातो वर्तते । अयं शास्त्रविमुखान् राजपुत्रान् द्राक् शास्त्रं प्रत्यनन्यसदृशान् विधातुं शक्नोति ।

३१.१० *वाक्येषु प्रयोगं कुरुत ।*

यथा, तथा, अत्र, अथ, ततः, द्राक्, प्रति, आहूय, तदा ।

३१.११ *सन्धिविच्छेदं कुरुत ।*

तदेतेषाम् । कोऽपि । अप्युपायः । मद्दत्ताम् । तथानुष्ठीयताम् । तत्रैकः । प्रोवाच । प्राह । ...शास्वतोऽयम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वात्रिंशः पाठः

पञ्चतन्त्रप्रयोजनम्

३२.१ *निम्नलिखितानुच्छेदं पठत ।*

अथ विष्णुशर्मा तं राजानमूचे- देव, श्रूयतां मे तथ्यवचनम् । नाहं विद्याविक्रयं शासनशतेनापि करोमि । पुनरेतान्तव पुत्रान् मासषट्केन यदि नीतिशास्त्रज्ञान् न करोमि ततः स्वनामत्यागं करोमि । किं बहुना, श्रूयतामेष सिंहनादः । नाहमर्थलिप्सुर्ब्रवीमि । व्यावृतसर्वेन्द्रियार्थस्य ममाशीतिवर्षस्य न किञ्चिदर्थेन प्रयोजनम् । किन्तु त्वत्प्रार्थनासिद्ध्यर्थं सरस्वतीविनोदं करिष्यामि । तल्लिख्यतामद्यतनो दिवसः । यद्यहं षड्मासाभ्यन्तरे तव पुत्रान् नयशास्त्रं प्रत्यनन्यसदृशान् न करिष्यामि ततो नार्हति देवो देवमार्गम् सन्दर्शयितुम् । अथासौ राजा तां ब्राह्मणस्यासंभाव्यां प्रतिज्ञां श्रुत्वा ससचिवः प्रहृष्टो विस्मयान्वितस्तस्मै सादरं तान्कुमारान्समर्प्य परां निर्वृत्तिमाजगाम। विष्णुशर्मणापि तानादाय तदर्थं मित्रभेदमित्रप्राप्तिकाकोलूकीयलब्धप्रणाशापरीक्षितकारकाणीति पञ्चतन्त्राणि रचयित्वा पाठितास्ते राजपुत्राः । तेऽपि तान्यधीत्य मासषट्केन यथोक्ताः संवृत्ताः । ततः प्रभृत्येतत् पञ्चतन्त्रकं नाम नीतिशास्त्रं बालावबोधनार्थं भूतले प्रवृत्तम्- किं बहुना -

अधीते य इदं नित्यं नीतिशास्त्रं शृणोति च ।
न पराभवमाप्नोति शक्रादपि कदाचन ।।

३२.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) विष्णुशर्मणा नृपतिः किमुक्तः ?
ख) सरस्वतीविनोदस्य कोऽभि[illegible] ?
ग) ब्राह्मणस्यासंभाव्या प्रतिज्ञा काऽऽसीत् ?
घ) राजा केन हेतुना परमानन्दमावाप ?
ङ) राज्ञः प्रार्थनां पूरयितुं विष्णुशर्मणा किं विहितम् ?
च) पञ्चतन्त्रम् किमर्थं कुतश्च भूतले प्रवृत्तम् ?
छ) पञ्चन्त्रस्याध्ययनेन को लाभः ?

३२.३ *उपरितनगद्यान्तर्गतपदानां पर्यायपदानि लिखत ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३२.४ ***विग्रहं प्रदर्श्य समासनामानि च निर्दिशत ।***

तथ्यवचनम् । विद्याविक्रयम् । शासनशतेन । मासषट्केन । नीतिशास्त्रज्ञान् । स्वनामत्यागम् । सिंहनादः । अर्थलिप्सुः । अशीतिवर्षस्य । व्यापृत्तसर्वेन्द्रियार्थस्य । त्वत्प्रार्थनासिद्ध्यर्थम् । षड्माषाभ्यन्तरे । अनन्यसदृशान् । ससचिवः । विस्मयान्वितः । मित्रभेद-मित्रप्राप्ति-कालोलूकीयलब्धप्रणाशापरीक्षितकारकाणि । राजपुत्राः । पञ्चतन्त्रम् ।

३२.५ ***प्रकृतिप्रत्यय विच्छेदं कुरुत ।***

वचनम् । विक्रयः । शास्त्रज्ञः । त्यागः । समर्प्य । सन्दर्शयितुम् । निर्वृत्तिम् । आदाय । लब्धः । रचयित्वा । पाठिताः । अधीत्य । संवृत्ताः । प्रवृत्तम् ।

३२.६ ***लिङ्गनिर्देशं कुरुत***

तत् । वचनम् । त्यागः । प्रार्थना । सिद्धिः । प्रतिज्ञा । शास्त्रम् । मार्गः । इन्द्रियम् । नीतिः ।

३२.७ ***उक्तानुच्छेदस्य स्वकीयैः शब्दैः सरलार्थं लिखत ।***

३२.८ ***वाच्यपरिवर्तनं कुरुत***

क) तव पुत्रान् मासषट्केन नीतिशास्त्रज्ञान् करोमि ।

ख) य इदं नीतिशास्त्रं शृणोति स शक्रादपि पराभवं नाप्नोति ।

ग) विष्णुशर्मणापि पञ्चतन्त्रं प्रणीय राजपुत्राः पाठिताः ।

३२.९ ***वाक्यसंश्लेषणं कुरुत ।***

विष्णुशर्माऽमरशक्तेः सभापण्डित आसीत् । अमरशक्तिश्च महिलारोप्यनगरे वसति स्म । तस्य त्रयः पुत्रा आसन् । ते च परमदुर्मेधसः शास्त्रविमुखाः सञ्जाताः । राजा च तान् शास्त्रबुद्धान् विधातुं विष्णुशर्माणमादिशत् । तेन च पञ्चतन्त्रं निर्माय राजापुत्राः पाठिताः । ततश्च नीतिशास्त्रमिदं भूतले प्रवृत्तम् ।

३२.१० ***वाक्यविश्लेषणं कुरुत ।***

[illegible]ासौ राजा तां ब्राह्मणस्यासंभवां प्रतिज्ञां श्रुत्वा ससचिवः प्रहृष्टो विस्मयान्वितस्तस्मै सादरं तान्कुमारान् समर्प्य परां निर्वृत्तिमाजगाम ।

३२.११ ***स्वकीयवाक्येषु प्रयोगं कुरुत ।***

श्रूयताम् । करिष्यामि । अर्हति । श्रुत्वा । आजगाम । रचयित्वा । अधीत्य । समर्प्य । अधीते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रयस्त्रिंशः पाठः

अर्थस्य महत्त्वम्

३३.१ *निम्नपाठं पठत ।*

अथातः प्रारभ्यते मित्रभेदो नाम प्रथमं तन्त्रम् । यस्यायमादिः श्लोकः –

वर्धमानो महान् स्नेहः सिंहगोवृषयोर्वने ।
पिशुनेनातिलुब्धेन जम्बुकेन विनाशितः ।।१।।

तद्यथानुश्रूयते – अस्ति दाक्षिणात्ये महिलारोप्यं नाम नगरम् । तत्र धर्मोपार्जितभूरिविभवो वर्धमानको नाम वणिक्पुत्रो बभूव । तस्य कदाचिद् रात्रौ शय्यारूढस्य चिन्ता समुत्पन्ना । तत्प्रभूतेऽपि वित्तेऽर्थोपायाश्चिन्तनीयाः कर्तव्याश्चेति। उक्तञ्च–

न हि तद् विद्यते किञ्चिद् यदर्थेन न सिध्यति ।
यत्नेन मतिमांस्तस्मादर्थमेकं प्रसाधयेत् ।।२।।
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमांल्लोके यस्यार्थाः स च पण्डितः ।।३।।
न सा विद्या न तद्दानं न तच्छिल्पं न सा कला ।
न तत्स्थैर्यं हि धनिनां याचकैर्यन्न गीयते ।।४।।
इह लोके हि धनिनां परोऽपि स्वजनायते ।
स्वजनोऽपि दरिद्राणां सर्वथा दुर्जनायते ।।५।।
अर्थेभ्योऽपि हि वृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः ।
प्रवर्तन्ते क्रियाः सर्वाः पर्वतेभ्य इवापगाः ।।६।।
पूज्यते यदपूज्योऽपि यद्गम्योऽपि गम्यते
वन्द्यते यदवन्द्योऽपि स प्रभावो धनस्य च
अशनादिन्द्रियाणीव स्युः कार्याण्यखिलान्यपि ।
एतस्मात् कारणाद् वित्तं सर्वसाधनमुच्यते ।।८।।
अर्थार्थी जीवलोकोऽयं श्मशानमपि सेवते ।
त्यक्त्वा जनयितारं स्वं निःश्वं गच्छति दूरतः ।।९।।
गतवयसामपि पुंसां येषामर्था भवन्ति ते तरुणाः ।
अर्थेन तु ये हीना वृद्धास्ते यौवनेऽपि स्युः ।।१०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३३.२ *निम्नप्रश्नानामुत्तराणि लिखत*

क) मित्रभेदस्य कोऽस्ति प्रथमः श्लोकः ? कश्च विषयोऽस्ति तत्र वर्णितः?

ख) वणिक्पुत्रः कीदृशः, स च कुत्र वसति स्म ?

ग) शय्यारूढस्य वर्धमानकस्य मनसि का चिन्ता समुदिता ?

घ) अर्थोपार्जनस्य किं कारणम् ?

ङ) धनस्य किं वैशिष्ट्यम् ?

३३.३ *उपरितनगद्यपद्यान्तर्गतपदानां पर्यायपदानि निर्दिशत ।*

३३.४ *उक्तपद्यानामन्वयं प्रदर्शयत ।*

३३.५ *विग्रहं प्रदर्श्य समासनामानि लिखत ।*

धर्मोपार्जितभूरिविभवः । वणिक्पुत्रः । शय्यारूढः । अर्थोपायाः । अपूज्यः। अगम्यः । अवन्द्यः । सर्वसाधनम् । अर्थार्थी । जीवलोकः । गतवयसाम् ।

३३.६ *स्वकीयैर्वाक्यैर्धनस्य महत्त्वं वर्णयत ।*

३३.७ *प्रकृतिप्रत्ययविच्छेदं कुरुत*

वर्धमानः । लुब्धः । विनाशितः । उपार्जितः । आरूढः । समुत्पन्नाः। चिन्तनीयाः । कर्तव्याः । मतिमान् । बान्धवाः । स्थैर्यम् । धनी । अपूज्यः। अगम्यः । अवन्द्यः । साधनम् । त्यक्त्वा । जनयितारम् । हीनाः ।

३३.८ *वाच्यपरिवर्तनं कुरुत ।*

क) वर्धमानो महान् स्नेहः सिंहगोवृषयोर्वने ।
पिशुनेनातिलुब्धेन जम्बुकेन विनाशितः ॥

ख) न त[illegible]र्यं हि धनिनां याचकैर्यत्र गीयते ।

ग) [illegible]र्थार्थी जीवलो[illegible]श्मशानमपि सेवते ।
त्यक्त्वा जनयितारं स्वं निःस्वं गच्छति दूरतः ।

३३.९ *वाक्यसंश्लेषणं कुरुत*

दाक्षिणात्ये महिलारोप्यं नाम नगरमस्ति । तत्रैको वणिग् वसति स्म। तस्य नाम वर्धमानक आसीत् । स सुप्तः । तस्य मनसि चिन्ता समुदिता । प्रभूतेऽपि वित्ते अर्थार्जनोपायाश्चिन्तनीया इति चिन्ताया विषयोऽवर्तत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुस्त्रिंशः पाठः

वाणिज्यमहत्त्वम्

३४.१ *निम्नलिखितगद्यपद्यभागं पठत ।*

स चार्थः पुरुषाणां षड्भिरूपायैर्भवति – भिक्षया, नृपसेवया, कृषिकर्मणा, विद्योपार्जनेन, व्यवहारेण, वणिक्कर्मणा वा । सर्वेषामपि तेषां वाणिज्येनातिरस्कृतोऽर्थलाभः स्यात् । उक्तञ्च यतः –

कृता भिक्षाऽनेकैर्वितरति नृपो नोचितमहो
कृषिः क्लिष्टा विद्या गुरुविनयवृत्याऽतिविषमा ।
कुसीदाद्दारिद्र्यं परकरगतग्रन्थिशमना –
न्न मन्ये वाणिज्यात्किमपि परमं वर्तनमिह ।।
उपायानाञ्च सर्वेषामुपायः पण्यसंग्रहः ।
धनार्थे शस्यते ह्येकस्तदन्यः संशयात्मकः ।।

तच्च वाणिज्यं सप्तविधमर्थागमाय स्यात् । तद्यथा- गान्धिकव्यवहारः, निक्षेपप्रवेशः, गौष्ठिककर्म, परिचितग्राहकागमः, मिथ्याक्रयकथनम्, कूटतुलामानम्, देशान्तराद् भाण्डानयनञ्चेति । उक्तञ्च –

पण्यानां गान्धिकं पण्यं किमन्यैः काञ्चनादिभिः ।
यत्रैकेन च यत् क्रीतं तच्छतेन प्रदीयते ।।
निक्षेपे पतिते हर्म्ये श्रेष्ठी स्तौति स्वदेवताम् ।
निक्षेपी म्रियते तुभ्यं प्रदास्याम्युपयाचितम् ।।
गोष्ठिककर्मनियुक्तः श्रेष्ठी चिन्तयति चेतसा हृष्टः ।
वसुधा वसुसंपूर्णा मयाऽद्य लब्धा किमन्येन ।।
परिचितमागच्छन्तं ग्राहकमुत्कण्ठया विलोक्यासौ ।
हृष्यति तद्धनलुब्धो यद्वत्पुत्रेण जातेन ।।
पूर्णापूर्णे माने परिचितजनवञ्चनं तथा नित्यम् ।
मिथ्याक्रयस्य कथनं प्रकृतिरियं स्यात्किरातानाम् ।।
द्विगुणं त्रिगुणं वित्तं भाण्डक्रयविचक्षणाः ।
प्राप्नुवन्त्युद्यमाल्लोका दूरदेशान्तरं गताः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३४.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) अर्थोपार्जनस्योपायाः कति, के च ते, कश्च तेषूत्तमोपायः ?

ख) अर्थोपार्जनस्य संशयात्मका उपायाः कति, के च ते ?

ग) वाणिज्यं कतिविधम् ? कानि च तानि ? किञ्च तेषां लक्षणम् ?

घ) किरातानां प्रकृतिः कीदृशी ?

ङ) गान्धिकव्यवहार–गौष्ठिककर्म–निक्षेपप्रवेशाणां के सन्ति दोषाः ?

च) परिचितग्राहकागम–मिथ्याक्रयकथन–कूटतुलामानानां के दोषा विद्यन्ते?

३४.३ *उक्तगद्यपद्यान्तर्गतपदानां पर्यायपदानि लिखत ।*

३४.४ *उपरितनपद्यानामन्वयं प्रदर्शयत ।*

३४.५ *उपर्युल्लिखितगद्यपद्यभागस्य स्वकीयवाक्यैः सरलार्थमुल्लिखत ।*

३४.६ *विग्रहं प्रदर्श्य समासनामानि निर्दिशत ।*

नृपसेवया । कृषिकर्मणा । विद्योपार्जनेन । वणिक्कर्मणा । अर्थलाभः। पण्यसंग्रहः। सप्तविधम्। अर्थागमाय। गान्धिकव्यवहारः। निक्षेपप्रवेशः। गौष्ठिक-कर्म। परिचितग्राहकागमः। मिथ्याक्रयकथनम्। कूटतुलामानम्। भाण्डानयनम्। स्वदेवताम्। गौष्ठिककर्मनियुक्तः। वसुसंपूर्णा। तद्धनलुब्धः। पूर्णापूर्णे। परिचित-जनवञ्चनम्। द्विगुणम्। त्रिगुणम्। भाण्डक्रयविचक्षणाः। दूरदेशान्तरम्।

३४.७ *प्रकृतिप्रत्ययविच्छेदं कुरुत ।*

तिरस्कृतः । लाभः । वाणिज्यम् । दारिद्र्यम् । वर्तनम् । पण्यम् । क्रीतम्। निक्षेपी । पतितः । याचितम् । लब्धा । आगच्छन्तम् । ग्राहकम्। परिचितम् । कथनम् । वञ्चनम् । नियुक्तः । गतः ।

३४.८ *वाच्यपरिवर्तनं कुरुत*

क) गौष्ठिककर्मनियुक्तः श्रेष्ठी चिन्तयति चेतसा हृष्टः ।
[illegible]धा वसुसंपूर्णा मयाद्य लब्धा किमन्येन ॥

ख) द्विगुणं त्रिगुणं वित्तं भाण्डक्रयविचक्षणाः ।
प्राप्नुवन्त्युद्यमाल्लोका दूरदेशान्तरं गताः ॥

ग) परिचितमागच्छन्तं ग्राहकमुत्कण्ठया विलोक्यासौ ।
हृष्यति तद्धनलुब्धो यद्वत्पुत्रेण जातेन ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चत्रिंशः पाठः

रक्ष्यते दैवरक्षितः

३५.१ *निम्नानुच्छेदं पठत*

इत्येवं संधार्य वर्धमानो मथुरागामीनि भाण्डान्यादाय शुभायां तिथौ गुरुजनानुज्ञातः सुरथाधिरूढः प्रस्थितः । तस्य च मङ्गलवृषभौ सञ्जीवकनन्दकनामानौ गृहोत्पन्नौ धुर्वोढारौ स्थितौ । तयोरेकः सञ्जीवकाभिधानो यमुनाकच्छमवतीर्णः सन्पङ्कपूरमासाद्य कलितचरणो युगभङ्गं विधाय निषसाद । अथ तं तदवस्थमालोक्य वर्धमानः परं विषादमगमत् । तदर्थञ्च स्नेहार्द्रहृदयस्त्रिरात्रं प्रयाणभङ्गमकरोत् । अथ तं विषण्णमालोक्य सार्थैरभिहितम्– भो श्रेष्ठिन् ! किमेवं वृषभस्य कृते सिंहव्याघ्रसमाकुले बह्वपायेऽस्मिन् वने समस्तसार्थस्त्वया सन्देहे नियोजितः । उक्तञ्च –

> न स्वल्पस्य कृते भूरि नाशयेन्मतिमान्नरः ।
> एतदेवात्र पाण्डित्यं यत्स्वल्पाद् भूरिरक्षणम् ।।१।।

अथासौ तदवधार्य सञ्जीवकस्य रक्षापुरुषान्निरूप्याशेषसार्थं नीत्वा प्रस्थितः। अथ रक्षापुरुषा अपि बह्वपायं तद्वनं विदित्वा सञ्जीवकं परित्यज्य पृष्ठतो गत्वाऽन्येद्युस्तं सार्थवाहं मिथ्याऽऽहुः– स्वामिन्, मृतोऽसौ सञ्जीवकः । अस्माभिस्तु सार्थवाहस्याभीष्ट इति मत्वा वह्निना संस्कृतः । तच्छुत्वा सार्थवाहः कृतज्ञतया स्नेहार्द्रहृदयस्तस्यौर्ध्वदेहिकक्रिया वृषोत्सर्गादिकाः सर्वाश्चकार । सञ्जीवकोऽप्यायुःशेषतया यमुनासलिलमिश्रैः शिशिरतरवातैराप्यायितशरीरः कथञ्चिदप्युत्थाय यमुनातटमुपपेदे । तत्र मरकतसदृशानि बालतृणाग्राणि भक्षयन् कतिपयैरहोभिर्हरवृषभ इव पीनः ककुद्मान् बलवांश्च संवृत्तः प्रत्यहं वल्मीकशिखराग्राणि शृङ्गाभ्यां विदारयन् गर्जमान अस्ति । साधु चेदमुच्यते–

> अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति ।
> जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे विनश्यति ।

३५.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) वर्धमानः किं कृत्वा प्रस्थितवान् ?

ख) सञ्जीवकः कथं निषसाद ?

ग) वर्धमानेन किमर्थं त्रिरात्रं प्रयाणभङ्गो विहितः ?

घ) पाण्डित्यस्य किं लक्षणम् ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ङ) रक्षापुरुषाः किमर्थं सञ्जीवकं परित्यज्य सार्थवाहनिकटं याताः ? ततश्च तैः किमुक्तम् ?

च) सञ्जीवकस्य दशा च कीदृशी सञ्जाता ?

३५.३ *उपरितनगद्यपद्यान्तर्गतपदानां पर्यायपदानि लिखत ।*

३५.४ *विग्रहं प्रदर्श्य समासनामानि समुल्लिखत ।*

मुधरागामीनि । गुरुजनानुज्ञातः । सुरथाधिरूढः । मङ्गलवृषभौ । सञ्जीवक-नन्दकनामानौ । गृहोत्पन्नौ । सञ्जीवकाभिधानः । यमुनाकच्छम् । कलितचरणः । युगभङ्गम् । तदवस्थम् । स्नेहार्द्रहृदयः । त्रिरात्रम् । प्रयाणभङ्गम् । सिंहव्याघ्रसमाकुले । बह्वपाये । समस्तसार्थः । रक्षापुरुषान् । और्ध्वदेहिकक्रियाः । वृषोत्सर्गादिकाः । आयुःशेषतया । यमुनासलिलमिश्रैः । शिशिरतरवातैः । आप्यायितशरीरः । मरकत-सदृशानि । बालतृणाग्राणि । हरवृषभः । ककुद्मान् । प्रत्यहम् । वल्मीकशिखराग्राणि ।

३५.५ *प्रकृतिप्रत्ययविच्छेदं कुरुत*

अनुज्ञातः । संधार्य, अधिरूढः । प्रस्थितः । अवतीर्णः । वर्धमानः । विषण्णः । नीत्वा । विदित्वा । परित्यज्य । गत्वा । श्रुत्वा । विदारयन् । गर्जमानः । उत्थाय । भक्षयन् । ककुद्मान् । बलवान् । अवधार्य । रक्षितम् । विसर्जितः ।

३५.६ *वाच्यपरिवर्तनं कुरुत*

क) वर्धमानः परं विषादमगच्छत् ।

ख) ततोऽसौ स्नेहार्द्रहृदयस्त्रिरात्रं प्रयाणभङ्गमकरोत् ।

ग) सञ्जीवकोऽपि यमुनासलिलमिश्रैः शिशिरतरवातैराप्यायितशरीरः यमुनातटं प्राप्तवान् ।

घ) बालतृणाग्राणि भक्षयन्नसौ हरवृषभ इव पीनः ककुद्मान् पर्वतशिखराणि विदारयन्नगर्जत् ।

ङ) दैवेनारक्षितं वस्तु गृहे कृतप्रयत्नो न कोऽपि त्रातुं क्षमते ।

३५.७ *वाक्यसंश्लेषणं कुरुत*

वर्धमानो रथमारूढः । स च भाण्डानि गृहीत्वा मथुरां गन्तुकाम आसीत् । गुरुजनस्याज्ञामादायासौ शुभायां तिथौ प्रस्थितः ।

३५.८ *वाक्यविश्लेषणं कुरुत*

भो श्रेष्ठिन्, किमेवं वृषभस्य कृते सिंहव्याघ्रसमाकुले बह्वपायेऽस्मिन् वने समस्तसार्थस्त्वया सन्देहे नियोजितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षट्त्रिंशः पाठः

चतुर्मण्डलावस्थानम्

३६.१ *निम्नानुच्छेदं पठत ।*

अथ कदाचित्पिङ्गलको नाम सिंहः सर्वमृगपरिवृतः पिपासाकुल उदकपानार्थं यमुनातटमवतीर्णः सञ्जीवकस्य गम्भीरतरारावं दूरादेवाशृणोत् । तच्छुत्वातीव व्याकुलहृदयः ससाध्वसमाकारं प्रच्छाद्य वटतले चतुर्मण्डलावस्थानेनावस्थितः । चतुर्मण्डलावस्थानन्त्विदम्– सिंहः, सिंहानुयायिनः, काकरवाः, किंवृत्ता इति । अथ तस्य करटकदमनकनामानौ द्वौ शृगालौ मन्त्रिपुत्रौ भ्रष्टाधिकारौ सदानुयायिनावास्ताम् । तौ च परस्परं मन्त्रयतः । तत्र दमनकोऽब्रवीत् – भद्र, करटक, अयं तावदस्मत्स्वामी पिङ्गलक उदकग्रहणार्थं यमुनाकच्छमवतीर्य स्थितः । स किन्निमित्तं पिपासाकुलोऽपि निवृत्य व्यूहरचनां विधाय दौर्मनस्येनाभिभूतोऽत्र वटतले स्थितः। करटक आह – भद्र, किमावयोरनेन व्यापारेण । उक्तञ्च यतः –

अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति ।
स एव निधनं याति कीलोत्पाटीव वानरः ।।

३६.२ *निम्नप्रश्नानामुत्तराणि लिखत*

क) पिङ्गलकः किमर्थं यमुनातटमवतीर्णः ? तत्र च तेन किं श्रुतम् ?
ख) सिंहस्य चतुर्मण्डलावस्थानस्य कारणं किमस्ति ?
ग) चतुर्मण्डलावस्थानस्य कोऽभिप्रायः ?
घ) सिंहस्य मन्त्रिपुत्रौ कीदृशावास्ताम् ?
ङ) अव्यापारेषु व्यापारं कुर्वतो नरस्य का दशा भवति ?

३६.३ *उक्तानुच्छेदान्तर्गतपदानां पर्यायपदानि लिखत ।*

३६.४ *विग्रहं प्रदर्श्य समासनामानि चोल्लिखत ।*

सर्वमृगपरिवृतः । पिपासाकुलः । उदकपानार्थम् । यमुनातटम् । गम्भीरतरारावम् । व्याकुलहृदयः । ससाध्वसम् । चतुर्मण्डलावस्थानेन । मन्त्रिपुत्रौ । भ्रष्टाधिकारौ। अस्मत्स्वामी । उदकग्रहणार्थम् । यमुनाकच्छम्। व्यूहरचनाम् । वटतले ।

३६.५ *प्रकृति-प्रत्ययविच्छेदं कुरुत ।*

परिवृतः । अवतीर्णः । उदकपानम् । ग्रहणम् । अवतीर्य । दौर्मनस्यम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अवस्थानम् । श्रुत्वा । प्रच्छाद्य । स्थितः ।

३६.६ *वाच्यपरिवर्तनं कुरुत ।*

क) कदाचित् पिङ्गलक उदकपानार्थमवतीर्णः सञ्जीवकस्य गम्भीरतरारावं रावमशृणोत् ।

ख) अव्यापारेषु यो नरो व्यापारं कर्तुमीप्सति स कीलोत्पाटी वानर इव निधनं प्राप्नोति ।

३६.७ *वाक्यसंश्लेषणं कुरुत ।*

यमुनातटे सिहो वसति स्म । तस्य नाभ पिङ्गलक आसीत् । स कदाचित् गम्भीरतरारावमशृणोत् । तेन तस्य हृदयं व्याकुलमभूत् । ततः स चतुर्मण्डलावस्थानं विधाय वटतले मौनमवस्थितः ।

३६.८ *वाक्यविश्लेषणं कुरुत ।*

अथ कदाचित् पिङ्गलको नाम सिंहः सर्वमृगपरिवृतः पिपासाकुल उदकपानार्थं यमुनातटमवतीर्णः सञ्जीवकस्य गम्भीरतरारावमशृणोत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तत्रिंशः पाठः

अव्यापारेषु व्यापारः

३७.१ *निम्नाङ्कितगद्यपद्यभागं पठत ।*

कस्मिंश्चिन्नगराभ्याशे केनापि वणिक्पुत्रेण तरुखण्डमध्ये देवतायतनं कर्तुमारब्धम् । तत्र च ये कर्मकराः स्थापत्यादयस्ते मध्याह्नवेलायामाहारार्थं नगरमध्ये गच्छन्ति स्म । अथ कदाचित्तत्रानुषङ्गिकं वानरयूथमितश्चेतश्च भ्रमदागतम् । तत्रैकस्य कस्यचिच्छिल्पिनोऽर्धस्पाटिताञ्जनवृक्षदारुमयस्तम्भः खदिरकीलकेन मध्यनिहितेन तिष्ठति स्म । एतस्मिन्नन्तरे ते वानरास्तरुशिखरप्रासादशृङ्गदारुपर्यन्तेषु यथेच्छया क्रीडितुं प्रारब्धाः । एकश्च तेषां प्रत्यासन्नमृत्युश्चापल्यात्तस्मिन्नर्धस्फाटितस्तम्भ उपविश्य पाणिभ्यां कीलकं संगृह्य यावदुत्पाटयितुमारेभे तावत्तस्य स्तम्भगतवृषणस्य स्वस्थानाच्चलितकीलकेन यद्वृत्तन्तत्प्रागेव निवेदितम् । अतोऽहं ब्रवीमि- अव्यापारेषु इति। आवयोर्भक्षितशेष आहारोऽस्त्येव, तत्किमनेन व्यापारेण । दमनक आह- तत् किं भवानाहारार्थी केवलमेव, तन्नयुक्तम् । उक्तञ्च -

सुहृदामुपकारकारणाद् द्विषतामप्यपकारकारणात् ।
नृपसंश्रय इष्यते बुधैः जठरं को न बिभर्ति केवलम् ।।१।।
यस्मिन् जीवति जीवन्ति बहवः सोऽत्र जीवतु ।
वयांसि किं न कुर्वन्ति चञ्च्वा स्वोदरपूरणम् ।।२।।
यज्जीव्यते क्षणमपि प्रथितं मनुष्यैः
विज्ञानशौर्यविभवार्यगुणैः समेतम् ।
तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः
काकोऽपि जीवति चिराय बलिञ्च भुङ्क्ते ।।३।।
यो नात्मना न च परेण च बन्धुवर्गे
दीने दयां न कुरुते न च मर्त्यवर्गे ।
किं तस्य जीवितफलं हि मनुष्यलोके
काकोऽपि जीवति चिराय बलिञ्च भुङ्क्ते ।।४।।

३७.२ *निम्नप्रश्नानामुत्तराणि लिखत*

क) वणिक्पुत्रेण कुत्र देवभवनं निर्मातुं प्रारब्धम् ?
ख) तत्रत्याः स्थापत्यादयो मध्याह्ने कुत्र गच्छन्ति स्म ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग) वानरयूथं किमर्थं तत्रागतम्, तेन च किं कर्तुं प्रारब्धम् ?

घ) तत्रैकस्य शिल्पिनो दारुमयः स्तम्भः कीदृश आसीत् ?

ङ) अतिचापल्यात् वानरस्य का दशा सञ्जाता ?

च) अनया कथया का शिक्षा लभ्यते ?

३७.३ उपरितनगद्यपद्यान्तर्गतपदानां पर्यायपदानि निर्दिशत ।

३७.४ विग्रहं प्रदर्श्य समासनामानि च लिखत ।

नगराभ्यासे । तरुखण्डमध्ये । वणिक्पुत्रेण । देवतायतनम् । कर्मकराः । मध्याह्नवेलायाम् । आहारार्थम् । नगरमध्ये । वानरयूथम् । अर्धस्फाटितदारुमयः । खदिरकीलकेन । मध्यनिहितेन । तरुशिखरप्रासादशृङ्गदारुपर्यन्तेषु । प्रत्यासन्नमृत्युः । अर्धस्पाटितस्तम्भः । स्तम्भगतवृषणस्य । चलितकीलकेन । आहारार्थी । उपकारकारणात् । अपकारकारणात् । नृपसंश्रयः । स्वोदरपूरणम् । विज्ञानशौर्य-विभवगुणैः मर्त्यवर्गो । जीवितफलम् । मनुष्यलोके ।

३७.५ कमपि कथानकं प्रकल्प्य स्वल्पां कथामेकां रचयत ।

३७.६ कीलोत्पाटिवानरकथायाः समीक्षां कुरुत ।

३७.७ उपरितनपद्यानामन्वयं प्रदर्शयत ।

३७.८ प्रकृतिप्रत्ययविच्छेदं कुरुत ।

कर्तुम् । आरब्धम् । शिल्पी । कर्मकराः । क्रीडितुम् । निहितेन । उपविश्य । संगृह्य । उत्पाटयितुम् । प्रत्यासन्नः । निवेदितः । भक्षितः । तज्ज्ञाः । जीवितम् ।

३७.९ वाक्यसंश्लेषणं कुरुत ।

एकस्मिन् नगरे कोऽपि वणिक्पुत्रो वसति स्म । तत्र तेन मन्दिरं निर्मातुं प्रारब्धम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टत्रिंशः पाठः

नीतिपद्यानि

३८.१ *निम्नपद्यानि पठत ।*

सुपूरा स्यात्कुनदिका सुपूरो मूषिकाञ्जलिः ।
सुसन्तुष्टः कापुरुषः स्वल्पकेनापि तुष्यति ।।१।।
किन्तेन जातु जातेन मातुर्यौवनहारिणा ।
आरोहति न यः स्वस्य वंशस्याग्रे ध्वजो यथा ।।२।।
परिवर्तिनि संसारे मृतः को वा न जायते ।
जातस्तु गण्यते सोऽत्र यः स्फुरेच्च श्रियाधिकः ।।३।।
जातस्य नदीतीरे तस्यापि तृणस्य जन्मसाफल्यम् ।
यत्सलिलमज्जनाकुलजनहस्तावलम्बनं भवति ।।४।।
स्तिमितोन्नतसञ्चारा जनसन्तापहारिणः ।
जायन्ते विरला लोके जलदा इव सज्जनाः ।।५।।
निरतिशयं गरिमाणं तेन जनन्याः स्मरन्ति विद्वांसः ।
यत्कमपि वहति गर्भं महतामपि यो गुरुर्भवति ।।६।।
अप्रटितशक्तिः शक्तोऽपि जनस्तिरस्क्रियां लभते ।
निवसन्नन्तर्दारुणि लङ्घ्यो वह्निर्न तु ज्वलितः ।।७।।

करटक आह – आवां तावदप्रधानौ । तत्किमावयोर्व्यापारेण । उक्तञ्च –

अपृष्टोऽत्राप्रधानो यो ब्रूते राज्ञः पुरः कुधीः ।
न केवलमसम्मानं लभते च विडम्बनम् ।।८।।
वचस्तत्र प्रयोक्तव्यं यत्रोक्तं लभते फलम् ।
स्थायी भवति चात्यन्तं रागः शुक्लपटे यथा ।।९।।
अप्रधानः प्रधानः स्यात्सेवेत यदि पार्थिवम् ।
प्रधानोऽप्यप्रधानः स्याद्यदि सेवाविवर्जितः ।।१०।।
आसन्नमेव नृपतिर्भजते मनुष्यम्
विद्याविहीनमकुलीनमसंस्कृतं वा ।
प्रायेण भूमिपतयः प्रमदाः लताश्च
यत्पार्श्वतो भवति तत्परिवेष्टयन्ति ।।११।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

३८.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) कीदृशः पुरुषः स्वल्पकेन तुष्यति, कश्चात्र दृष्टान्तः ?

ख) कीदृशेन पुत्रेण किमपि प्रयोजनं नास्ति ?

ग) किंविधः पुरुषो लोके जातः कथ्यते ?

घ) नदीतीरे जातस्य तृणस्य जन्म कथं साफल्यं भजते ?

ङ) कीदृशाः सज्जनाः जलदाश्च लोके विरला जायन्ते ?

च) शक्तोऽपि कीदृशो जनस्तिरस्क्रियां लभते, कश्चात्र दृष्टान्तः ?

छ) कोऽसम्मानं विडम्बनञ्च प्राप्नोति ?

ज) वचसः प्रयोगः कुत्र फलदो भवति, कश्चात्र दृष्टान्तः ?

झ) प्रधानस्याप्रधानत्वेऽप्रधानस्य प्रधानत्वे च को हेतुः ?

ञ) भूमिपतयः प्रमदाः लताश्च प्रायेण किं कुर्वन्ति ?

ट) कीदृशः पुरुषः प्रायशो नृपप्रियो भवति ?

३८.३ *उक्तपद्यानामन्वयं प्रदर्शयत ।*

३८.४ *उपरितनपद्यान्तर्गतपदानां पर्यायपदानि लिखत ।*

३८.५ *सविग्रहं समासनामानि निर्दिशत ।*

कुनदिका । मूषिकाञ्जलिः । कापुरुषः । यौवनहारिणा । नदीतीरे । जन्मसाफल्यम् । सलिलमज्जनाकुलजनहस्तावलम्बनम् । स्तिमितोन्नतसञ्चाराः । जनसन्तापहारिणः । अप्रकटितशक्तिः । जलदाः । अपृष्टः । अप्रधानः । असंमानम् । विद्याविहीनम् । अकुलीनम् । असंस्कृतम् ।

३८.६ *उक्तपद्यानां सरलार्थं लिखत ।*

३८.७ *वाच्यपरिवर्तनं कुरुत ।*

क) अपृष्टोऽत्राप्रधानो यो ब्रूते राज्ञः पुरः कुधीः ।
न केवलमसम्मानं लभते च विडम्बनम् ॥

ख) अप्रटितशक्तिः शक्तोऽपि जनस्तिरस्क्रियां लभते ।

३८.८ *वाक्यसंश्लेषणं कुरुत ।*

सुपूरा स्यात्कुनदिका सुपूरो मूषिकाञ्जलिः ।
ससन्तुष्टः कापुरुषः स्वल्पकेनापि तुष्यति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊनचत्वारिंशः पाठः

अनुक्तमप्यूहति पण्डितो जनः

३९.१ *निम्नपाठं पठत ।*

कोपप्रसादवस्तूनि ये विचिन्वन्ति सेवकाः ।
आरोहन्ति शनैः पश्चाद्धुन्वन्तमपि पार्थिवम् ।।१।।
विद्यावतां महेच्छानां शिल्पविक्रमशालिनाम् ।
सेवावृत्तिविदाञ्चैव नाश्रयः पार्थिवं विना ।।२।।
ये जात्यादिमहोत्साहान्नरेन्द्रान्नोपयान्ति च ।
तेषामामरणं भिक्षा प्रायश्चित्तं विनिर्मितम् ।।३।।
सर्पान् व्याघ्रान् गजान् सिंहान् दृष्ट्वोपायैर्वशीकृतान् ।
राजेति कीयती मात्रा धीमतामप्रमादिनाम् ।।४।।
राजानमेव संश्रित्य विद्वान् याति परां गतिम् ।
विना मलयमन्यत्र चन्दनं न प्ररोहति ।।५।।
धवलान्यातपत्राणि वाजिनश्च मनोरमाः ।
सदा मत्ताश्च मातङ्गाः प्रसन्ने सति भूपतौ ।।६।।

करटक आह –अथ भवान् किं कर्तुमनाः ? सोऽब्रवीत् – अद्यास्मत्स्वामी पिङ्गलको भीतो भीतपरिवारश्च वर्तते । तदेनं गत्वा भयकारणं विज्ञाय सन्धिविग्रह-यानासनसंश्रयद्वैधीभावानामेकतमेन संविधास्ये । करटक आह– कथं वेत्ति भवान् यद्भयाविष्टोऽयं स्वामी। सोऽब्रवीत् – ज्ञेयं किमत्र । उक्तञ्च –

उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति चोदिताः ।
अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः ।

३९.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) कीदृशा जनाः नृपे प्रतिकूलेऽपि शनैरुच्चपदं लभन्ते ?
ख) केषां पार्थिवं विनाऽऽश्रयो नास्ति ?
ग) जात्याद्यभिमानवतां प्रायश्चित्तं किं वर्तते ?
घ) कमाश्रित्य विद्वान् परां गतिं प्राप्नोति, कश्चात्र दृष्टान्तः ?
ङ) भूपतौ प्रसन्ने कानि वस्तूनि समुपलभ्यन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च) दमनकः किं कर्तुमिच्छति ?

छ) पशुपण्डितयोः को भेदः ?

३१.३ *उपरितनपद्यानामन्वयं प्रदर्शयत ।*

३१.४ *उक्तपद्यगद्यान्तर्गतपदानां पर्यायपदानि लिखत ।*

३१.५ *सविग्रहं समासनामानि लिखत ।*

कोपप्रसादवस्तूनि । महेच्छानाम् । शिल्पविक्रमशालिनाम् । सेवावृत्तिविदाम्। जात्यादिमहोत्साहात् । आमरणम् । भीतपरिवारः । भयकारणम् । सन्धिविग्रह-यानासनसंश्रयद्वैधीभावानाम् । भयाविष्टः । परेङ्गितज्ञानफला ।

३१.६ *उक्तगद्यपद्यभागस्य स्वकीयैर्वाक्यैः सरलार्थं लिखत ।*

३१.७ *प्रकृतिप्रत्ययविच्छेदं कुरुत ।*

सेवकाः । पार्थिवः । आमरणम् । गतिः । कारणम् । भीतः । उक्तः । प्रमादी। धीमताम् । पण्डितः ।

३१.८ *वाच्यपरिवर्तनं कुरुत ।*

क) उदीरितोऽर्थः पशुनापि गृह्यते ।

ख) हयाश्च नागाश्च चोदिता वहन्ति ।

ग) पण्डितो जनोऽनुक्तमप्यूहति ।

घ) प्रसन्ने भूपतौ संपदो लभ्यन्ते ।

ङ) मलयं विनाऽन्यत्र चन्दनं न प्ररोहति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चत्वारिंशः पाठः

नीतिपद्यानि

४०.१ *निम्नलिखितगद्यपद्यभागं पठत ।*

आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च ।
नेत्रवक्त्रविकारैश्च लक्ष्यतेऽन्तर्गतं मनः ।।१।।
सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ।।२।।
यो न वेत्ति गुणान् यस्य न तं सेवेत पण्डितः ।
न हि तस्मात् फलं किञ्चित्सुकृष्टादूषरादिव ।।३।।

करटक आह – भवान् तत्र गत्वा किं तावत्प्रथमं वक्ष्यति, तदुच्यताम् । दमनक आह –

उत्तरादुत्तरं वाक्यं वदतां संप्रजायते ।
सुवृष्टिगुणसंपन्नाद्बीजाद्बीजमिवापरम् ।।४।।
अपायसन्दर्शनजां विपत्तिमुपायसन्दर्शनजाञ्च सिद्धिम् ।
मेधाविनो नीतिगुणप्रयुक्तां पुरःस्फुरन्तीमिव वर्णयन्ति ।।५।।
एकेषां वाचि शुकवदन्येषां हृदि मूकवत् ।
हृदि वाचि तथान्येषां वल्गु वल्गन्ति सूक्तयः ।।६।।

न चाहमप्राप्तकालं वक्ष्ये । आकर्णितं मया नीतिसारं पितुः पूर्वमुत्सङ्गं हि निषेवता ।

अप्राप्तकालं वचनं बृहस्पतिरपि ब्रुवन् ।
लभते बह्ववज्ञानमपमानञ्च पुष्कलम् ।।

४०.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) अन्तर्गतं मनः कथं ज्ञायते ?
ख) सुवर्णपुष्पां पृथ्वीं के चिन्वन्ति ?
ग) कं न सेवेत, कश्चात्र दृष्टान्तः ?
घ) मेधाविनो भाविनीं विपत्तिं सिद्धिञ्च कथं वर्णयन्ति
ङ) सूक्तयः कथं वल्गन्ति ?
च) अप्राप्तकालं ब्रुवता जनेन किं लभ्यते ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४०.३ *उक्तपद्यानामन्वयं प्रदर्शयत ।*

४०.४ *उपरितनपद्यान्तर्गतपदानां पर्यायपदानि लिखत ।*

४०.५ *सविग्रहं समासनामानि लिखत ।*

नेत्रवक्त्रविकारैः । सुवर्णपुष्पाम् । कृतविद्यः । सुवृष्टिगुणसंपन्नात् । अपाय-सन्दर्शनजाम् । नीतिगुणप्रयुक्ताम् । अप्राप्तकालम् । बह्ववज्ञानम् ।

४०.६ *उक्तपद्यानां सरलार्थं लिखत ।*

४०.७ *वाच्यपरिवर्तनं कुरुत ।*

क) अप्राप्तकालं वचनं बृहस्पतिरपि ब्रुवन् ।
लभते वह्ववज्ञानमपमानञ्च पुष्कलम् ॥

ख) सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।

४०.८ *उक्तपाठे प्रयुक्तानि कर्मपदानि करणपदानि चान्विष्य लिखत ।*

४०.९ *निम्नपद्यस्याशयं विस्तारयत ।*

योन वेत्ति गुणान् यस्य न तं सेवेत पण्डितः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकचत्वारिंशः पाठः

तृणेन कार्यं भवतीश्वराणाम्

४१.१ *निम्नपद्यानि सम्यक् पठत*

करटक आह –

दुराराध्या हि राजानः पर्वता इव सर्वदा ।
व्यालाकीर्णाः सुविषमाः कठिना दुष्टसेविताः ।।१।।
भोगिनः कञ्चुकाविष्टाः कुटिलाः क्रूरचेष्टिताः ।
सुदुष्टा मन्त्रसाध्याश्च राजानः पन्नगा इव ।।२।।
द्विजिह्वाः क्रूरकर्माणोऽनिष्टाश्छिद्रानुसारिणः ।
दूरतोऽपि हि पश्यन्ति राजानो भुजगा इव ।।३।।

दमनक आह – सत्यमेतत्, किन्तु –

यस्य यस्य हि यो भावस्तेन तेन समाचरेत् ।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ।।४।।
सरुषि नृपे स्तुतिवचनं तदभिमते प्रेम तद्विषि द्वेषः ।
तद्दानस्य च शंसाऽमन्त्रतन्त्रं वशीकरणम् ।।५।।

करटक आह– यद्येवमभिमतन्तर्हि शिवास्ते पन्थानः सन्तु । यथाभिलषितमनुष्ठीयताम् । सोऽपि प्रणम्य पिङ्गलकाभिमुखं प्रतस्थे । अथागच्छन्तं दमनकमवलोक्य पिङ्गलको द्वाःस्थमब्रवीत्– अपसार्यतां वेत्रलता, तत्प्रवेश्यतां द्वितीय–मण्डलभागी। स आह– यथावादीद्भवान् । अथोपसृत्य दमनको निर्दिष्ट आसने पिङ्गलकं प्रणम्य प्राप्तानुज्ञ उपविष्टः। स तु तस्य नखकुलिशालङ्कृतं दक्षिणपाणिमुपरि दत्त्वा मानपुरःसरमुवाच– अपि शिवं भवतः ? कस्माच्चिराद् दृष्टोऽसि ? दमनक आह– न किञ्चिद् देवपादानामस्माभिः प्रयोजनम्। परं भवतां प्राप्तकाले वक्तव्यम्। यत उत्तममध्यमाधमैः सर्वैरपि राज्ञां प्रयोजनम् । उक्तञ्च–

दन्तस्य निष्कोषणकेन नित्यं कर्णस्य कण्डूयनकेन वापि ।
तृणेन कार्यं भवतीश्वराणां किमङ्गवाग्घस्तवता नरेण ।।

४१.२ *निम्नप्रश्नानामुत्तराणि लिखत*

क) राजानः क इव दुराराध्या भवन्ति ?
ख) नृपतयः पन्नगैः कथं साम्यं भजन्ते ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग) राजभुजगयोः किम् सादृश्यम् ?
घ) नृपं वशीकर्तुमालम्बनीयः कोऽस्त्युपायः ?
ङ) आगच्छन्तं दमनकं विलोक्य पिङ्गलकेन किमुक्तम् ?
च) सर्वेषामेव प्रयोजनं कस्य कृते भवति ?

४१.३ *उक्तपद्यानामन्वयं लिखत ।*

४१.४ *उपरितनगद्यपद्यान्तर्गतपदानां पर्यायपदानि निर्दिशत ।*

४१.५ *सविग्रहं समासनामान्युल्लिखत ।*

दुराराध्याः। व्यालाकीर्णाः । दुष्टसेविताः । कञ्चुकाविष्टाः । क्रूरचेष्टिताः । मन्त्रसाध्या। द्विजिह्वा । क्रूरकर्माणः । अनिष्टाः । छिद्रानुसारिणः । सरुषि । पिङ्गलका–भिमुखम् । द्वाःस्थम् । वेत्रलता । प्राप्तानुज्ञः । नखकुलिशालङ्कृतम् । दक्षिणपाणिम्।मानपुरःसरम् । उत्तमाधममध्यमैः ।

४१.६ *उक्तपद्यानां सरलार्थं निर्दिशत ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विचत्वारिंशः पाठः

उत्साहः परिहीयते

४२.१ *निम्नगद्यपद्यभागं पठत ।*

तथा वयं देवपादानामन्वयागता भृत्या आपत्स्वपि पृष्टगामिनो यद्यपि स्वमधिकारं न लभामहे तथापि देवपादानामेतद् युक्तं न भवति । उक्तञ्च –

स्थानेष्वेव प्रयोक्तव्या भृत्याश्चाभरणानि च ।
नहि चूडामणिः पादे प्रभवामीति बध्यते ।।१।।

यच्चाविवेकितया राजा भृत्यानुत्तमपदयोग्यान् हीनाधमस्थाने नियोजयति न ते तत्र तिष्ठन्ति । स भूपतेर्दोषो न तेषाम् । उक्तञ्च –

कनकभूषणसंग्रहणोचितो यदि मणिस्त्रिपुणि प्रतिबध्यते ।
न स विरौति न चापि स शोभते भवति योजयितुर्वचनीयता ।।२।।

यच्च स्वाम्येवं वदति– चिराद्दृश्यते, इति तदपि श्रूयताम् –

सव्यदक्षिणयोर्यत्र विशेषो नास्ति हस्तयोः ।
कस्तत्र क्षणमप्यार्यो विद्यमानगतिर्वसेत् ।।३।।
परीक्षका यत्र न सन्ति देशे नार्घन्ति रत्नानि समुद्रजानि ।
आभीरदेशे किल चन्द्रकान्तं त्रिभिर्वराटैर्विपणन्ति गोपाः ।।४।।
लोहिताख्यस्य च मणेः पद्मरागस्य चान्तरम् ।
यत्र नास्ति कथं तत्र क्रियते रत्नविक्रयः ।।५।।
निर्विशेषं यदा स्वामी समं भृत्येषु वर्तते ।
तत्रोद्यमसमर्थानामुत्साहः परिहीयते ।।६।।

तथा शृगालोऽयमिति मन्यमानेन ममोपरि स्वामिना यद्यवज्ञा क्रियते तदप्ययुक्तम्, यतः –

कौशेयं कृमिजं सुवर्णमुपलाद् दूर्वाऽपि गोरोमतः
पङ्कात्तामरसं शशाङ्क उदधेरिन्दीवरं गोमयात् ।
काष्ठादग्निरहेः फणादपि मणिर्गोपित्ततो रोचना
प्राकाश्यं स्वगुणोदयेन गुणिनो गच्छन्ति किं जन्मना ।।७।।
किं भक्तेनासमर्थेन किं शक्तेनापकारिणा ।
भक्तं शक्तञ्च मां राजन् नावज्ञातुं त्वमर्हसि ।।८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४२.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) केनाधिकारो न लब्धः ?

ख) भृत्यानामाभरणानाञ्च प्रयोगः कुत्र समुचितः ?

ग) योजयितुर्वचनीयतायाः को दृष्टान्तः ?

घ) आर्यः कदा विद्यमानगतिर्न भवति ?

ङ) उद्यमिनामुत्साहः कदा परिहीयते ?

च) गुणिनः केन प्राकाश्यमाप्नुवन्ति ?

ज) कस्यावज्ञा नोचिता ?

४२.३ *उपरितनपद्यानामन्वयं निर्दिशत ।*

४२.४ *उक्तगद्यपद्यभागयोः प्रयुक्तानां पदानां पर्यायपदानि निर्दिशत ।*

४२.५ *सविग्रहं समासनामानि लिखत ।*

देवपादानाम् । पृष्टगामिनः । अविवेकितया । उत्तमपदयोग्यान् । अधमस्थाने। कनकभूषणसंग्रहणोचितः । सव्यदक्षिणयोः । विद्यमानगतिः। समुद्रजानि । आभीर-देशे । लोहिताख्यस्य । पद्मरागस्य । उद्यमसमर्थानाम्। कृमिजम् । स्वगुणोदयेन ।

४२.६ *उक्तकथांशस्य सरलार्थं लिखत ।*

४२.७ *उक्तपाठेषु प्रयुक्तानां कर्तृवाच्यानां कर्मवाच्यानाञ्च वाक्यानां निर्देशं कुरुत।*

४२.८ *प्रकृतिप्रत्ययविच्छेदं कुरुत ।*

स्थानम् । प्रयोक्तव्यः । हीनः । उचितः । गतिः । विद्यमानः । अवज्ञातुम् । अपकारी । शक्तः । पित्ततः । युक्तम् । गुणी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिचत्वारिंशः पाठः

षट्कर्णं वर्जयेत्सुधीः

४३.१ *निम्नकथांशं पठत ।*

पिङ्गलक आह - भवत्वेवम् । असमर्थः समर्थो वा चिरन्तनस्त्वमस्माकं मन्त्रिपुत्रः। तद्विश्रब्धं ब्रूहि यत्किञ्चिद्वक्तुकामः । दमनक आह- देव, विज्ञाप्यं किञ्चिदस्ति । पिङ्गलक आह - तन्निवेदयाभिप्रेतम् । सोऽब्रवीत् -

अपि स्वल्पतरं कार्यं यद् भवेत्पृथिवीपतेः ।
तन्न वाच्यं सभामध्ये प्रोवाचेदं बृहस्पतिः ।।१।।

तदेकान्ते मद्विज्ञाप्यमाकर्णयन्तु देवपादाः । यतः

षट्कर्णो भिद्यते मन्त्रश्चतुष्कर्णो स्थिरो भवेत् ।
तस्मात् सर्वप्रयत्नेन षट्कर्णं वर्जयेत्सुधीः ।।२।।

अथ पिङ्गलाभिप्रायज्ञा व्याघ्रद्वीपिवृकपुरःसराः सर्वेऽपि तद्वचः समाकर्ण्य संसदि तत्क्षणादेव दूरीभूताः । ततश्च दमनक आह- उदकग्रहणार्थं प्रवृत्तस्य स्वामिनः किमिह निवृत्यावस्थानम् । पिङ्गलक आह- (सविलक्षस्मितम्) न किञ्चिदपि । सोऽब्रवीत्- देव यद्यनाख्येयं तत्तिष्ठतु । उक्तञ्च -

दारेषु किञ्चिद् स्वजनेषु किञ्चिद्
गोप्यं वयस्येषु सुतेषु किञ्चित् ।
युक्तं न वा युक्तमिदं विचिन्त्य
वदेद्विपश्चिन्महतोऽनुरोधात् ।।३।।

तच्छ्रुत्वा पिङ्गलकश्चिन्तयामास - योग्योऽयं दृश्यते । तत्कथयाम्येतस्याग्र आत्मनोऽभिप्रायम् -

सुहृदि निरन्तरचित्ते गुणवति भृत्येऽनुवर्तिनि कलत्रे ।
स्वामिनि सौहृदयुक्ते निवेद्य दुःखं सुखी भवति ।।४।।

४३.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) सभामध्ये वाच्यं किं न भवति ?
ख) कीदृशो मन्त्रो भिद्यते, कीदृशश्च स्थिरः ?
ग) व्याघ्रद्वीपिवृकादयः किमर्थं दूरीभूताः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

घ) एकान्ते दमनकेन सिंहः किमुक्तः ?

ङ) गोप्यो विषयः केषु भवति प्रकाशनार्हः ?

च) दुःखं कस्मै निवेद्य पुरुषः सुखी जायते ?

४३.३ *उक्तकथांशान्तर्गतपदानां पर्यायपदानि लिखत ।*

४३.४ *सविग्रहं समासनामानि लिखत ।*

असमर्थः । मन्त्रिपुत्रः । वक्तुकामः । पृथिवीपतेः । सभामध्ये । षट्कर्णः । चतुष्कर्णः । सर्वप्रयत्नेन । पिङ्गलाभिप्रायज्ञाः । व्याघ्रद्वीपिवृकपुरःसराः । दूरीभूताः । सविलक्षस्मितम् । स्वजनेषु । निरन्तरचित्ते । सौहृदयुक्ते ।

४३.५ *प्रकृतिप्रत्ययविच्छेदं कुरुत ।*

विज्ञाप्यम् । अभिप्रेतम् । स्वल्पतरम् । कार्यम् । वाच्यम् । समाकर्ण्य । ग्रहणम् । अभिप्रायज्ञाः । अवस्थानम् । सौहृदम् । निवेद्य । सुखी । श्रुत्वा । अनुवर्ती । गोप्यम् ।

४३.६ *उपरितनकथान्तर्गतपद्यानामन्वयं लिखत ।*

४३.७ *वाच्यपरिवर्तनं कुरुत ।*

तच्छ्रुत्वा पिङ्गलकश्चिन्तयामास- योग्योऽयं दृश्यते । तत्कथयाम्येतस्याग्र आत्मनोऽभिप्रायम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुश्चत्वारिंशः पाठः

भिद्यते वाग्भिरातुरः

४४.१ *निम्नकथांशं पठत ।*

भो दमनक, शृणोषि शब्दं दूरान्महान्तम् । सोऽब्रवीत्- स्वामिन् शृणोमि। ततः किम् ? पिङ्गलक आह- भद्र, अहमस्माद् वनाद् गन्तुमिच्छामि । दमनक आह- कस्मात् ? पिङ्गलक आह - यतोऽद्यास्मद्वने किमप्यपूर्वं सत्त्वं प्रविष्टम्, यस्यायं महाशब्दः श्रूयते । तस्य च शब्दानुरूपेण पराक्रमेण भाव्यम् । दमनक आह - यच्छब्दमात्रादपि भयमुपगतः स्वामीति, तदप्ययुक्तम् । उक्तञ्च -

अम्भसा भिद्यते सेतुस्तथा मन्त्रोऽप्यरक्षितः ।
पैशुन्याद् भिद्यते स्नेहो भिद्यते वाग्भिरातुरः ।।१।।

तन्न युक्तं स्वामिनः पूर्वोपार्जितं वनं त्यक्तुम् । यतो भेरी-वेणु-वीणा-मृदङ्ग-ताल-पटह-शङ्ख-काहलादिभेदेन शब्दा अनेकविधा भवन्ति । तन्न केवलाच्छब्द-मात्रादपि भेतव्यम् । उक्तञ्च -

अत्युत्कटे च रौद्रे च शत्रौ प्राप्ते न हीयते ।
धैर्यं यस्य महीनाथो न स याति पराभवम् ।।२।।
दर्शितभयेऽपि धातरि धैर्यध्वंसो भवेन्न धीराणाम् ।
शोषितसरसि निदाघे नितरामेवोद्धतः सिन्धुः ।।३।।
यस्य न विपदि विषादः संपदि हर्षो रणे न भीरुत्वम् ।
तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम् ।।४।।
शक्तिकैवल्यनम्रस्य निःसारत्वाल्लघीयसः ।
जन्मिनो मानहीनस्य तृणस्य च समा गतिः ।।५।।
अन्यप्रतापमासाद्य यो दृढत्वं न गच्छति ।
जतुजाभरणस्येव रूपेणापि हि तस्य किम् ।।६।।
पूर्वमेव मया ज्ञातं पूर्णमेतद्धि मेदसा ।
अनुप्रविश्य विज्ञातं यावच्चर्म च दारु च ।।७।।

४४.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) दमनकेन कीदृशः शब्दः श्रुतः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ख) शब्दं निशम्य पिङ्गलकेन किं विचारितम् ?
ग) सेतुस्नेहातुराः कैर्भिद्यन्ते ?
घ) कीदृशो नृपः पराभवं न याति ?
ङ) कस्मिन् सत्यपि धीराणां धैर्यनाशो न भवति, कश्चात्र दृष्टान्तः ?
च) जननी विरलमेव कीदृशं सुतं जनयति ?
छ) कीदृशो जनस्तृणेन साम्यं भजते ?
ज) कः जतुजाभरणेन तुल्यः ?
झ) दमनकः किमर्थं भयाकुलः सञ्जातः ?

४४.३ *उक्तपद्यानामन्वयं निर्दिशत ।*

४४.४ *उपरितनगद्यपद्यान्तर्गतपदानां पर्यायपदानि लिखत ।*

४४.५ *सविग्रहं समासनामानि समुल्लिखत ।*

अस्मद्वने । महाशब्दः । अपूर्वः । शब्दानुरूपेण । अरक्षितः । पूर्वोपार्जितम्। भेरीवेणु-वीणामृदङ्गताल-पटह-काहलादिभेदेन । महीनाथः। धैर्यध्वंसः । शोषितसरसि। भुवनत्रयतिलकम् । शान्तिकैवल्यनम्रस्य ।

४४.६ *कमपि कथानकमादाय सुन्दरं संवादं रचयत ।*

४४.७ *प्रकृतिप्रत्ययविच्छेदं कुरुत ।*

गन्तुम् । रक्षितः । पैशुन्यम् । उपार्जितम् । त्यक्तुम् । भेतव्यम् । उद्धतः। निःसारत्वात् । लघीयान् । जन्मिनः । हीनः । अनुप्रविश्य । विज्ञातम् ।

४४.८ *वाच्यपरिवर्तनं कुरुत ।*

क) सोऽब्रवीत् - स्वामिन्, शृणोमि ।
ख) यतोऽद्यास्मद्वने किमप्यपूर्वं सत्त्वं प्रविशति यस्याऽयं महाशब्दः श्रूयते ।

४४.९ *सप्तमीवभक्त्यन्तानि पदान्यन्विष्य लिखत ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चचत्वारिंशः पाठः

शब्दमात्रान्न भेतव्यम्

४५.१ *निम्नकथाभागं पठत ।*

पिङ्गलक आह– कथमेतत्? सोऽब्रवीत्– कश्चिद्गोमायुर्नाम शृगालः क्षुत्क्षामकण्ठः, इतस्ततः परिभ्रमन् वने सैन्यद्वयसंग्रामभूमिमपश्यत् । तस्याञ्च दुन्दुभेः पतितस्य वायुवशाद् वल्लीशाखाग्रैर्हन्यमानस्य शब्दमशृणोत् । अथ क्षुभितहृदयश्चिन्तयामास– अहो हनिष्येऽहम्। तद्यावन्नास्य प्रोच्चारितशब्दस्य दृष्टिगोचरे गच्छामि, तावदन्यतो व्रजामि । अथवा नैतद्युज्यते सहसैव । उक्तञ्च –

भये वा यदि वा हर्षे संप्राप्ते यो विमर्शयत् ।
कृत्यं न कुरुते वेगान्न स सन्तापमाप्नुयात् ।।१।।

तत्तावत् जानामि– कस्यायं शब्दः । धैर्यमवलम्ब्य विमर्शयन्यावन्मन्दं मन्दं गच्छति तावद् दुन्दुभिमपश्यत् । स च तं परिज्ञाय समीपं गत्वा स्वयमेव कौतुकादताडयत् । भूयश्च हर्षादचिन्तयत्– अहो चिरादेतदस्माकं महद्भाजनमापतितम् । तन्नूनं प्रभूतमांसमेदोऽसृग्भिः परिपूरितं भविष्यति । ततः परुषचर्मावगुण्ठितं तत्कथमपि विदार्यैकदेशे छिद्रं कृत्वा संहृष्टमना मध्ये प्रविष्टः । परं चर्मविदारणतो दंष्ट्राभङ्गः समजनि । ततः निराशीभूतस्तद्दारुशेषमवलोक्य श्लोकमेनमपठत्– पूर्वमेव मया ज्ञातमिति । ततो शब्दमात्राद् न भेतव्यम् । पिङ्गलक आह– 'भोः पश्यायं मम सर्वोऽपि परिग्रहो भयव्याकुलितमनाः पलायितुमिच्छति । तत्कथमहं धैर्यावष्टम्भं करोमि । सोऽब्रवीत्– नैषामेष दोषः, यतः स्वामिसदृशा एव भवन्ति भृत्याः । उक्तञ्च–

अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च ।
पुरुषविशेषं प्राप्ताः भवन्त्ययोग्याश्च योग्याश्च ।।

४५.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) गोमायुः कीदृश आसीत्, स च किमपश्यत्?
ख) गोमायुः किमर्थं भीतः ? ततश्च तेन किं कृतम्?
ग) शृगालः किमर्थं हर्षमुपगतः ? ततः किञ्च तेन चिन्तितम्?
घ) दुन्दुभिः किमर्थं गोमायुना विदारितः, कथञ्च तस्य दंष्ट्राभङ्गः सञ्जातः?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ङ) अश्वादयः कथं योग्या अयोग्याश्च जायन्ते ?

च) अनेन पाठेन का शिक्षा लभ्यते ?

४५.३ *उपरितनपाठान्तर्गतपदानां पर्यायपदानि लिखत ।*

४५.४ *सविग्रहं समासनामानि निर्दिशत ।*

क्षुत्क्षामकण्ठः । सैन्यद्वयसंग्रामभूमिम् । वल्लीशाखाग्रैः । क्षुभितहृदयः । प्रोच्चारितशब्दस्य । प्रभूतमांसमेदोऽसृग्भिः । परुषचर्मावगुण्ठितम् । संहृष्टमनाः। चर्मविदारणतः। दंष्ट्राभङ्गः । तद्दारुशेषम् । भयव्याकुलितमनाः। स्वामिसदृशाः । अयोग्याः ।

४५.५ *कामपि घटनामवलम्ब्य कथामेकां रचयत ।*

४५.६ *प्रकृतिप्रत्ययविच्छेदं कुरुत ।*

परिभ्रमन् । हन्यमानः । विनष्टः । सन्तापः । परिज्ञाय । विदार्य । अवगुण्ठितम्। शब्दमात्राद् । परिग्रहः । योग्यः ।

४५.७ *वाच्यपरिवर्तनं कुरुत ।*

कश्चिद् गोमायुनामा शृगालः क्षुत्क्षामकण्ठः, इतस्ततः परिभ्रमन् वने सैन्यद्वयसङ्ग्रामभूमिमपश्यत् ।

४५.८ *सम्बन्धबोधकषष्ठ्यन्तपदानि कर्तृपदानि चान्विष्य लिखत ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षट्चत्वारिंशः पाठः

विश्वासादेव वध्यन्ते बलवन्तोऽपि दुर्बलैः

४६.१ *निम्नपाठं पठत ।*

तत्पौरुषावष्टम्भं कृत्वा त्वं तावदत्रैव प्रतिपालय, यावदहमेतच्छब्दस्वरूपं ज्ञात्वाऽऽगच्छामि । ततः पश्चाद् यथोचितं कार्यम् । पिङ्गलक आह– किं भवान् तत्र गन्तुमुत्सहते। स आह– किं स्वाम्यादेशात्सद्भृत्यस्य कृत्याकृत्यमस्ति ? पिङ्गलक आह– भद्र, यथैवं तद् गच्छ । शिवास्ते पन्थानः सन्तु । दमनकोऽपि तं प्रणम्य संजीवकशब्दानुसारी प्रतस्थे । अथ दमनके गते भयव्याकुलमनाः पिङ्गलकश्चिन्तयामास– अहो न शोभनं कृतं मया, यत्तस्य विश्वासं गत्वाऽऽत्माभिप्रायो निवेदितः । कदाचिद् दमनकोऽयमुभयवेतनो भूत्वा ममोपरि दुष्टबुद्धिः स्याद् भ्रष्टाधिकारत्वात् । उक्तञ्च –

ये भवन्ति महीपस्य संमानितविमानिताः ।
यतन्ते तस्य नाशाय कुलीना अपि सर्वदा ।।१।।
न वध्यन्ते ह्यविश्वस्ता बलिभिर्दुबला अपि ।
विश्वस्तास्त्वेव वध्यन्ते बलवन्तोऽपि दुर्बलम् ।।२।।
बृहस्पतेरपि प्राज्ञो न विश्वासे व्रजेद् रिपोः ।
राज्यलाभोद्यतो वृत्रः शक्रेण शपथैर्हतः ।।३।।
य इच्छेदात्मनो वृद्धिमायुष्यञ्च सुखानि च ।
शपथैः सन्धितस्यापि न विश्वासे व्रजेद् रिपोः ।।४।।
न विश्वासं विना शत्रुर्देवानामपि सिध्यति ।
विश्वासात्त्रिदशेन्द्रेण दितेर्गर्भो विदारितः ।।५।।

४६.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) दमनकः कुत्र प्रस्थितवान् ?
ख) पिङ्गलकः किमर्थं भयव्याकुलः सञ्जातः ?
ग) संमानितविमानितानां चरित्रं कीदृशं भवति ?
घ) आत्मनः वृद्धिमायुष्यञ्च कामयता जनेन किं न कर्तव्यम् ?
ङ) वृत्रः कथं हतः ?
च) इन्द्रेण दितेः गर्भः कथं विदारितः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४६.३ *उक्त पाठान्तर्गतपदानां पयार्यपदानि लिखत ।*

४६.४ *सविग्रहं समासनामानि निर्दिशत ।*

पौरुषावष्टम्भम् । सद्भृत्यस्य । कृत्याकृत्यम् । सञ्जीवकशब्दानुसारी । स्वाम्यादेशात् । भयव्याकुलमनाः । उभयवेतनः । दुष्टबुद्धिः । भ्रष्टाधिकारः। संमानितविमानिताः । अविश्वस्ताः । भ्रष्टाधिकारः । सुखान्विताः । राज्यलाभः । त्रिदशेन्द्रेण ।

४६.५ *प्रकृतिप्रत्ययविच्छेदं कुरुत ।*

कृत्वा । ज्ञात्वा । गन्तुम् । प्रणम्य । शोभनम् । निवेदितः । बुद्धिः। कुलीनः। वृद्धिः । उद्यतः । विदारितः ।

४६.६ *वाच्यपरिवर्तनं कुरुत ।*

क) न वध्यन्ते ह्यविश्वस्ता बलिभिर्दुर्बला अपि ।
विश्वस्तास्त्वेव वध्यन्ते बलवन्तोऽपि दुर्बलैः ।

ख) विश्वासात् त्रिदशेन्द्रेण दितेर्गर्भो विदारितः ।

४६.७ *अव्ययपदान्यन्विष्य लिखत ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तचत्वारिंशः पाठः

सदैवापद्गतो राजा भोग्यो भवति मन्त्रिणाम्

४७.१ *निम्नकथाभागं पठत ।*

एवं संप्रधार्य स्थानान्तरं गत्वा दमनकमार्गमवलोकयन्नेकाकी तस्थौ । दमनकोऽपि सञ्जीवकसकाशं गत्वा वृषभोऽयमिति परिज्ञाय हृष्टमनाः व्यचिन्तयत्– अहो! शोभनमापतितम् । अनेनैतस्य सन्धिविग्रहद्वारेण मम पिङ्गलको वश्यो भविष्यति। उक्तञ्च –

न कौलीन्यान्न सौहार्दान्नृपो वाक्ये प्रवर्तते ।
मन्त्रिणां यावदभ्येति व्यसनं शोकमेव च ।।१।।
सदैवापद्गतो राजा भोग्यो भवति मन्त्रिणाम् ।
अत एव हि वाञ्छन्ति मन्त्रिणः सापदं नृपम् ।।२।।
यथा नेच्छति नीरोगः कदाचित्सुचिकित्सकम् ।
तथापद्रहितो राजा सचिवं नाभिवाञ्छति ।।३।।

एवं विचिन्तयन् पिङ्गलकाभिमुखः प्रतस्थे । पिङ्गलकोऽपि तमायान्तं प्रेक्ष्य स्वाकारं रक्षयन्यथापूर्वमेवावस्थितः । दमनकोऽपि पिङ्गलकसकाशं गत्वा प्रणम्योपविष्टः । पिङ्गलक आह– किं दृष्टं भवता तत्सत्त्वम् ? दमनक आह– दृष्टं स्वामिप्रसादात् । पिङ्गलक आह– अपि सत्यम् ? दमनक आह– किं स्वामिपादाना–मग्रेऽसत्यं विज्ञाप्यते ? उक्तञ्च –

अपि स्वल्पमसत्यं यः पुरो वदति भूभुजाम् ।
देवानाञ्च विनश्येत स द्रुतं सुमहानपि ।।४।।

पिङ्गलक आह – सत्यं दृष्टं भविष्यति भवता । न दीनोपरि महान्तः कुप्यन्तीति न त्वं तेन निपातितः । यतः –

तृणानि नोन्मूलयति प्रभञ्जनो
मृदूनि नीचैः प्रणतानि सर्वतः ।
स्वभाव एवोन्नतचेतसामयं
महान् महत्स्वेव करोति विक्रमम् ।।५।।
गण्डस्थलेषु मदवारिषु बद्धराग-
मत्तभ्रमद्भ्रमरपादतलाहतोऽपि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कोपं न गच्छति नितान्तबलोऽपि नाग-
स्तुल्ये बले तु बलवान् परिकोपमेति ।।६।।

४७.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) दमनकेन वृषभं विलोक्य किं विचारितम् ?

ख) कीदृग् राजा मन्त्रिणां भवति भोग्यः ?

ग) कीदृग् नृपं सचिवं नेच्छति, कश्चात्र दृष्टान्तः ?

घ) उन्नतचेतसां स्वभावः कीदृशः ?

ङ) बलवान् कस्मिन् परिकोपमेति, कश्चात्र दृष्टान्तः ?

४७.३ *उक्तपाठान्तर्गतपदानां पर्यायपदानि लिखत ।*

४७.४ *सविग्रहं समासनामानि निर्दिशत ।*

दमनकमार्गम् । सञ्जीवकसकाशम् । हृष्टमनाः । सन्धिविग्रहद्वारेण। आपद्गतः। नीरोगः । आपद्रहितः । पिङ्गलकाभिमुखः । पिङ्गलसकाशम्। स्वामिप्रसादात् । उन्नतचेतसाम् । गण्डस्थलेषु । मदवारिषु । बद्धरागः । मत्तभ्रमद्भ्रमरपादतलाहतः। नितान्तबलः ।

४७.५ *प्रकृतिप्रत्ययविच्छेदं कुरुत ।*

संप्रधार्य । गत्वा । अवलोकयन् । परिज्ञाय । कौलीन्यात् । दृष्टः । सौहार्दम्। भोग्यः । अवस्थितः । उपविष्टः । दृष्टः । बद्धः ।

४७.६ *वाच्यपरिवर्तनं कुरुत ।*

यथा नेच्छति नीरोगः कदाचित्सुचिकित्सकम् ।
तथापद्रहितो राजा सचिवं नाभिवाञ्छति ।।

४७.७ *विशेषणपदानि संगृह्य निर्दिशत ।*

४७.८ *उक्तपाठान्तर्गतपद्यानामन्वयं लिखत ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टचत्वारिंशः पाठः

कार्यं संसिद्धिमभ्येति यथा बुद्ध्या प्रसाधितम्

४८.१ *निम्नलिखित कथाभागं पठत ।*

दमनक आह – अस्त्वेवं स महात्मा, वयं कृपणाः, तथापि स्वामी यदि कथयति ततो भृत्यत्वे नियोजयामि । पिङ्गलक आह– (सोच्छ्वासम्) किं भवान् शक्नोत्येवं कर्तुम् ? दमनक आह – किमसाध्यं बुद्धेरस्ति ? उक्तञ्च –

न तच्छस्त्रैर्न नागेन्द्रैर्न हयैर्न पदातिभिः ।
कार्यं संसिद्धिमभ्येति यथा बुद्ध्या प्रसाधितम् ।।१।।

पिङ्गलक आह – यद्येवं तर्ह्यमात्यपदेऽध्यारोपितस्त्वम् । अद्यप्रभृति प्रसाद–निग्रहादिकं त्वयैव कार्यमिति निश्चयः । अथ दमनकः सत्वरं गत्वा साक्षेपं तमिदमाह– एहि, एहीतो दुष्टवृषभः । स्वामी पिङ्गलकस्त्वामाकारयति । किं निःशङ्को भूत्वा मुहुर्मुहुर्नदसि वृथा । तच्छ्रुत्वा सञ्जीवकोऽब्रवीत्– भद्र, कोऽयं पिङ्गलकः ? दमनक आह– किं स्वामिनं पिङ्गलकमपि न जानासि ? तत्क्षणं प्रतिपालय, फलेनैव ज्ञास्यसि। नन्वयं सर्वमृगपरिवृतो वटतले स्वामी पिङ्गलकनामा सिंहस्तिष्ठति। तच्छ्रुत्वा गतायुषमिवात्मानं मन्यमानः सञ्जीवकः परं विषादमगमत् । आह च – देव, भवान्, साधुसमाचारो वचनपटुश्च दृश्यते । तद्यदि मामवश्यं तत्र नयसि तदभयप्रदानेन स्वामिनः सकाशात्प्रसादः कारयितव्यः । दमनक आह – भोः सत्यमभिहितं भवता। नीतिरेषा । यतः –

पर्यन्तो लभ्यते भूमेः समुद्रस्य गिरेरपि ।
न कथञ्चिन्महीपस्य चित्तान्तः केनचित्क्वचित् ।।२।।

४८.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) दमनकः किमर्थं सोच्छ्वासोऽभवत् ?
ख) बुद्ध्या किं सिध्यति ?
ग) पिङ्गलकेन गोमायुः कस्मिन् पदेऽध्यारोपितः ?
घ) सञ्जीवकः किमर्थं विषादमगमत् ?
ङ) कस्य चित्तान्तो न लभ्यते ?

४८.३ *उपरितनपाठान्तर्गतपदानां पर्यायपदानि लिखत ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४८.४ *सविग्रहं समासनामानि लिखत ।*

प्रसादनिग्रहादिकम् । असाध्यम् । अमात्यपदे । साक्षेपम् । दुष्टवृषभः । निश्शङ्कः । सर्वमृगपरिवृतः । गतायुषम् । साधुसमाचारः । वचनपटुः । अभयप्रदानेन । महीपस्य ।

४८.५ *वाच्यपरिवर्तनं कुरुत ।*

क) यदि स्वामी कथयति तदा भृत्यत्वे नियोजयामि ।

ख) स्वामी पिङ्गलकस्त्वामाकारयति ।

ग) किं त्वं स्वामिनं पिङ्गलकमपि न जानासि, क्षणं प्रतिपालय ।

घ) नन्वयं सर्वमृगपरिवृतो वटतले स्वामी पिङ्गलकनामा सिंहस्तिष्ठति ।

ङ) भोः, सत्यभिहितं भवता ।

४८.६ *वाक्यविश्लेषणं कुरुत ।*

अस्त्वेवं स महात्मा, वयं कृपणास्तथापि स्वामी यदि कथयति ततो भृत्यवे नियोजयामि ।

४८.७ *वाक्यसंश्लेषणं कुरुत*

क) स महात्मा अस्ति । वयं कृपणाः स्मः ।

ख) शस्त्रैः कार्यं न सिध्यति । बुद्ध्या कार्यं सिध्यति ।

ग) एवमस्ति । अमात्यपदेऽध्यारोपितः ।

४८.८ *प्रकृतिप्रत्ययविच्छेदं कुरुत ।*

श्रुत्वा । महीपः । अध्यारोपितः । कर्तुम् । भृत्यत्वे । संसिद्धिः । अभिहितम् ।

४८.९ *वाक्येषु प्रयोगं कुरुत ।*

सोच्छ्वासम् । सत्वरम् । साक्षेपम् । मुहुर्मुहुः । तल्क्षणम् । यदि । तथापि । यद्यपि ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊनपञ्चाशः पाठः

कर्मणि व्यज्यते प्रज्ञा

४९.१ *निम्नकथाभागं पठत ।*

तत्त्वमत्रैव तिष्ठ, यावदहं तं समये दृष्ट्वा ततः पश्चात्त्वामानयामि । तथाऽनुष्ठिते दमनकः पिङ्गलसकाशं गत्वेदमाह– 'स्वामिन् न तत्प्राकृतं सत्त्वम् । स हि भगवतो महेश्वरस्य वाहनभूतो वृषभः । मया पृष्ट इदमूचे – महेश्वरेण परितुष्टेन कालिन्दीपरिसरे शष्पाग्राणि भक्षयितुं समादिष्टः, किं बहुना । मम प्रदत्तं भगवता क्रीडार्थं वनमिदम्। पिङ्गलक आह – (सभयम्) सत्यं ज्ञातं मयाधुना । न देवताप्रसादं विना शष्पभोजिनो व्यालाकीर्ण एवंविधे वने निःशङ्काः नदन्तो भ्रमन्ति । ततस्त्वया किमभिहितम् ? दमनक आह– स्वामिन्, एतदभिहितं मया यदेतद्वनं चण्डिकावाहनभूतस्य मत्स्वामिनः पिङ्गलकनाम्नः सिंहस्य विषयीभूतम् । तद्भवानभ्यागतः प्रियोऽतिथिः । तत्तस्य सकाशं गत्वा भ्रातृरतेहेनैकत्र भक्षणपानविहरणक्रियाभिरेकस्थानाश्रयेण कालो नेयः। ततस्तेनापि सर्वमेतत्प्रतिपन्नम् । उक्तञ्च सहर्षम्– स्वामिनः सकाशादभयदक्षिणा दापयितव्या, इति तदत्र स्वामी प्रमाणम् । तच्छ्रुत्वा पिङ्गलक आह– साधु सुमते, साधु । मन्त्रिश्रोत्रिय, साधु । मम हृदयेन सह संमन्त्र्य भवतेदमभिहितम्, तद्दत्ता मया तस्याभयदक्षिणा, परं सोऽपि मदर्थेऽभयदक्षिणां याचयित्वा द्रुततरमानीयताम्। अथ साधु चेदमुच्यते –

अन्तः सारैरकुटिलैरच्छिद्रैः सुपरीक्षितैः ।
मन्त्रिभिर्धार्यते राज्यं सुस्तम्भैरिव मन्दिरम् ।।१।।
मन्त्रिणां भिन्नसन्धाने भिषजां सान्निपातिके ।
कर्मणि व्यज्यते प्रज्ञा स्वस्थे को वा न पण्डितः ।।२।।

दमनकोऽपि तं प्रणम्य सञ्जीवकसकाशं प्रस्थितः सहर्षमचिन्तयत् – अहो प्रसादसंमुखो नः स्वामी वचनवशगश्च संवृत्तः । उक्तञ्च –

अमृतं शिशिरे वह्निरमृतं प्रियदर्शनम् ।
अमृतं राजसंमानममृतं क्षीरभोजनम् ।।३।।

अथ सञ्जीकसकाशमासाद्य सप्रश्रयमुवाच – भो मित्र, प्रार्थितोऽसौ मया

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भवदर्थे स्वाम्यभयप्रदानम् । तद् विश्रब्धं गम्यतामिति । परं त्वया राजप्रसादमासाद्य मया सह समयधर्मेण वर्तितव्यम्, न गर्वमासाद्य स्वप्रभुतया विचरणीयम् । अहमपि तव सङ्केतेन निखिलराज्यधुरममात्यपदवीमाश्रित्योद्धरिष्यामि । एवं कृते द्वयोरप्यावयो राज्यलक्ष्मीर्भोग्या भविष्यति ।

आखेटकस्य धर्मेण विभवाः स्युर्वशे नृणाम् ।
नृप्रजाः प्रेरयत्येको हन्त्यन्योऽत्र मृगानिव ।।४।।
यो न पूजयते गर्वादुत्तमाधममध्यमान् ।
भूपसंमानमान्योऽपि भ्रश्यते दन्तिलो यथा ।।५।।

४९.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) दमनकेन पिङ्गलकस्य पुरो वृषभपरिचयः कथं प्रस्तुतः ? किं स तथाविध एवावर्तत ?

ख) दमनकाद् वृषभं शिववाहनं निशम्य पिङ्गलकेन किं विचारितम् ?

ग) दमनकेन सिंहं पुरः कीदृक्प्रस्ताव उपस्थापितः ? किञ्च स प्रस्तावः पिङ्गलेन स्वीकृतः ? स्वीकृतश्चेत्तर्हि सिंहस्य प्रस्तावः क आसीत्?

घ) कीदृग्भिर्मन्त्रिभिः, राज्यं धार्यते, कश्चात्र दृष्टान्तः ?

ङ) मन्त्रिभिषजौ कदापेक्षेते ?

च) दमनकः किमर्थं स्वं धन्यं मेने ?

छ) अमृतं किं किमस्ति ?

ज) दमनकेन सञ्जीवकः किमुक्तः ?

झ) विभवा नृणां वश्याः कथं भवन्ति ?

ञ) कीदृशो भूपो दन्तिल इव भ्रश्यते ?

४९.३ *उपरितनपाठान्तर्गतपदानां पर्यायपदानि निर्दिशत ।*

४९.४ *सविग्रहं समासनामानि लिखत ।*

महेश्वरस्य । कालिन्दीपरिसरे । शष्पाग्राणि । शष्पभोजिनः । व्यालाकीर्णः। निःशङ्काः । चण्डिकावाहनभूतस्य । मत्स्वामिनः । पिङ्गलकनाम्नः। भ्रातृरतेहेन । भक्षणपानविहरणक्रियाभिः । एकस्थानाश्रयेण । अभयदक्षिणा । अन्तःसारैः । अकुटिलैः। अछिद्रैः । प्रसादसंमुखः । वचनवशगः । अभयप्रदानम् । समयधर्मेण। स्वप्रभुतया। राज्यधुरम् । अमात्यपदवीम् । राज्यलक्ष्मीः । भूपसंमानमान्यः राजप्रासादम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

४९.५ कमप्येकमैतिहासिककथानकमादाय संवादं रचयत ।

४९.६ परवञ्चनकुशलस्य शृगालस्य चरित्रं कल्पयित्वा कथामेकां लिखत।

४९.७ कथायामस्यां घटनायाश्चरित्रस्योभयोर्वा प्राधान्यम् ? प्रकाशयत ।

४९.८ वाच्यपरिवर्तनं कुरुत ।

क) देवताप्रसादं विना शष्पभोजिनो व्यालाकीर्णे वने निःशङ्का नदन्तो न भ्रमन्ति।
ख) भवतेदमभिहितं यद् दत्ता मयाऽभयदक्षिणा ।
ग) अन्तः सारैरकुटिलैरछिद्रैः सुपरीक्षितैर्मन्त्रिभिः, राज्यं सुस्तम्भैर्मन्दिरमिव धार्यते।
घ) प्रार्थितोऽसौ मया स्वाम्यर्थेऽभयप्रदानम् ।
ङ) त्वया राजप्रासादमासाद्य समयधर्मेण वर्तितव्यम् ।

४९.९ कर्मपदानि करणपदानि चान्विष्य लिखत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चाशः पाठः

दुर्लभः कार्यकर्ता

५०.१ *निम्नकथाभागं पठत ।*

सञ्जीवक आह – कथमेतत् ? दमनक आह – अस्त्यत्र धरातले वर्धमानं नाम नगरम् । तत्र दन्तिलो नाम नानाभाण्डपतिः सकलपुरनायकः प्रतिवसति स्म। तेन पुरकार्यं नृपकार्यञ्च कुर्वता तुष्टिं नीता तत्पुरवासिनो लोका नृपतिश्च । किं बहुना। न कोऽपि तादृक् केनापि चतुरो दृष्टो नापि श्रुतो वेति । अथवा साधु चेदमुच्यते –

नरपतिहितकर्ता द्वेष्यतां याति लोके
जनपदहितकर्ता त्यज्यते पार्थिवेन्द्रैः ।
इति महति विरोधे वर्तमाने समाने
नृपतिजनपदानां दुर्लभः कार्यकर्ता ।।१।।

अथैवं गच्छति काले दन्तिलस्य कदाचिद्विवाहः संप्रवृत्तः । तत्र तेन सर्वे पुरवासिनो राजसन्निधिलोकाश्च संमानपुरःसरमामन्त्र्य भोजिताः, वस्त्रादिभिः सत्कृताश्च। ततो विवाहानन्तरं राजा सान्तःपुरः स्वगृहमानीयाभ्यर्चितः । अथ तस्य नृपतेर्गृहसंमार्जनकर्ता गोरम्भो नाम राजसेवको गृहायातोऽपि तेनानुचिस्थान उपविष्टोऽवज्ञयाऽर्धचन्द्रं दत्त्वा निःसारितः । सोऽपि ततः प्रभृति निःश्वसन्नपमानान्न रात्रावपि शेते । कथं मया तस्य भाण्डपतेः राजप्रसादहानिः कर्तव्या इति चिन्तयन्नास्ते। अथवा किमनेन वृथा शरीरशोषणेन । न किञ्चिन्मया तस्यापकर्तुं शक्यमिति । अथवा साध्विदमुच्यते–

यो ह्यपकर्तुमशक्तः कुप्यति किमसौ नरोऽत्र निर्लज्जः ।
उत्पतितोऽपि हि चणकः शक्तः किं भ्राष्ट्रकं भङ्क्तुम् ।।२।।

५०.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) दन्तिलः कुत्र वसति स्म, कथञ्च तेन पौराः, भूपतिश्च तुष्टिं नीताः ?

ख) कीदृशः कार्यकर्ता दुर्लभः ?

ग) स्वविवाहे दन्तिलेन के संमानिताः ?

घ) तेन नृपतिश्च किं कृत्वाऽभ्यर्चितः ?

ङ) गोरम्भस्य कः परिचयः ? स च दन्तिलेन किमर्थं निःसारितः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च) गोरम्भः किमर्थं चिन्तितः ?

छ) अपकर्तुमशक्तः पुरुषः किं करोति, कश्चात्र दृष्टान्तः ?

५०.३ *उपरितनवाक्यान्तर्गतपदानां पर्यायपदानि लिखत ।*

५०.४ *सविग्रहं समासनामानि समुल्लिखत ।*

धरातले । नानाभाण्डपतिः । सकलपुरनायकः। पुरकार्यम् । नृपकार्यम्। तत्पुरवासिनः । नरपतिहितकर्ता । जनपदहितकर्ता । पार्थिवेन्द्रैः । नृपतिजन-पदानाम्। राजसन्निधिलोकाः । संमानपुरःसरम् । विवाहानन्तरम् । सान्तःपुरः। गृहसंमार्जनकर्ता। राजसेवकः । गृहायातः । अनुचितस्थाने । भाण्डपतेः। राजप्रसादहानिः । शरीरशोषणेन। निर्लज्जः ।

५०.५ *प्रकृतिप्रत्ययविच्छेदं कुरुत ।*

गच्छन् । संप्रवृत्तः । निवासी । सत्कृतः । आनीय । अर्चितः । कर्ता । सेवकः । आयातः । उपविष्टः । दत्त्वा । निःसारितः । निःश्वसन् । हानिः। कर्तव्यम्। चिन्तयन् । शोषणम् । अपकर्तुम् । शक्यम् .। उत्पतितः। शक्तः । भङ्क्तुम् । कुर्वन् । नीतः । दृष्टः । वर्तमानः । आमन्त्र्य ।

५०.६ *वाच्यपरिवर्तनं कुरुत ।*

क) तेन पुरकार्यं नृपकार्यञ्च कुर्वता तुष्टिं नीता तत्पुरवासिनो लोका नृपतिश्च ।

ख) न कोऽपि तादृक् केनापि चतुरो दृष्टो नापि श्रुतो वा ।

ग) ततस्तेन राजा स्वगृहमानीयाभ्यर्चितः ।

घ) न किञ्चिन्मया तस्यापकर्तुं शक्यते ।

५०.७ *वाक्यसंश्लेषणं कुरुत ।*

अत्र धरातले वर्धमानं नाम नगरं विद्यते । तत्र भाण्डपतिः वसति । तस्य नाम दन्तिलोऽस्ति । स च सकलपुरनायको वर्तते । असौ नृपकार्यं पुरकार्यञ्च सम्यक् कृतवान् । तेन तत्पुरमधिवसन्तो लोकाः नृपतिश्च तुष्टिं प्राप्तवन्तः ।

५०.८ *वाक्यविश्लेषणं कुरुत ।*

गच्छति काले यदा दन्तिलस्य विवाहः संप्रवृत्तस्तदा तेन यथा पुरवासिनो लोकाः समाहूय भोजितास्तथैव राजसन्निधिजनाः संमानपुरःसरमामन्त्र्य सभोजनं वस्त्रादिभिः सत्कृताः, येन ते शुभाशीर्वचनैर्भूयोभूयस्तं प्राशंसन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकपञ्चाशः पाठः

राजा मित्रं केन दृष्टं श्रुतं वा

५१.१ *निम्नलिखित कथाभागं पठत ।*

अथ कदाचित्प्रत्यूषे योगनिद्रां गतस्य राज्ञः शय्यान्ते मार्जनं कुर्वन्निदमाह- अहो, दन्तिलस्य महद्दृप्तत्वम् यद्राजमहिषीं काङ्क्षति । तच्छ्रुत्वा राजा ससंभ्रममुत्थाय तमुवाच- भो, भो गोरम्भ, सत्यमेतद्, यत्त्वया जल्पितम् । किं देवी दन्तिलेन काङ्क्ष्यते? गोरम्भः प्राह- देव, रात्रीजागरणेन द्यूतासक्तस्य मे बलान्निद्रा समायाता, तन्न वेद्मि किं मयाऽभिहितम् । राजा सेर्ष्यं स्वगतम् - एष तावदस्मद्गृहेऽप्रतिहत-गतिस्तथा दन्तिलोऽपि । तत्कदाचिदित्थं भविष्यति । तदुक्तम् -

यद्वाञ्छति दिवा मर्त्यो वीक्षते वा करोति वा ।
तत्स्वप्नेऽपि तदभ्यासाद् ब्रूते वाथ करोति वा ।।१।।
शुभं वा यदि वा पापं यन्नृणां हृदि संस्थितम् ।
सुगूढमपि तज्ज्ञेयं स्वप्नवाक्यात्तथा मदात् ।।२।।

एवं स राजा बहुविधं विलप्य तत्प्रभृति दन्तिलस्य प्रसादपराङ्मुखः सञ्जातः। राजद्वारप्रवेशोऽपि तस्य निवारितः । दन्तिलोऽप्यकस्मादेव प्रसादपराङ्मुखमवनीपति-मवलोक्य चिन्तयामास । साधु चेदमुच्यते-

कोऽर्थान् प्राप्य न गर्वितो विषयिणः कस्यापदोऽस्तं गताः
स्त्रीभिः कस्य न खण्डितं भुवि मनः को नाम राज्ञां प्रियः ।
कः कालस्य न गोचरान्तरगतः कोऽर्थी गतो गौरवं
को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ।।३।।

५१.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) प्रत्युषे गोरम्भेण किमुक्तम् ?
ख) गोरम्भस्य वाक्यं निशम्य राज्ञो मनसि का चिन्ता समुदिता ?
ग) स्वप्ने मानवः किं पश्यति ?
घ) दन्तिलस्य कृते राजद्वारप्रवेशः किमर्थं निषिद्धः ?
ङ) अवनीपतिं प्रसादपराङ्मुखं विलोक्य दन्तिलेन किं चिन्तितम् ?

५१.३ *उक्तपाठान्तर्गतपदानां पर्यायपदानि लिखत ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५१.४ *विग्रहं प्रदर्श्य समासनामानि निर्दिशत ।*

योगनिद्राम् । शय्यान्ते । महद्दृप्तत्वम् । राजमहिषीम् । ससंभ्रमम्। रात्रीजागरणेन् । द्यूतासक्तस्य । सेर्ष्यम् । अस्मद्गृहे । अप्रतिहतगतिः । बहुविधम् । प्रसादपराङ्मुखः । राजद्वारप्रवेशः । अवनीपतिम् । दुर्जनवागुरासु। मद्यपे । तत्त्वचिन्ता।

५१.५ *प्रकृतिप्रत्ययविच्छेदं कुरुत ।*

कुर्वन् । दृप्तत्वम् । श्रुत्वा । उत्थाय । जल्पितम् । जागरणम् । दन्तिलः । आसक्तः । आयाता । प्रतिहतः । दृष्टाः । स्वप्नः । सञ्जातः। अवलोक्य । गर्वितः। प्रियः । यातः । क्षान्तिः । दृष्टम् । शान्तिः। मद्यपः। श्रुतम् ।

५१.६ *वाच्यपरिवर्तनं कुरुत ।*

क) दन्तिलोऽप्यकस्मादेव प्रसादपराङ्मुखमवनीपतिमवालोकयदचिन्तयच्च ।

ख) यद्वाञ्छति दिवा मर्त्यो वीक्षते वा करोति वा ।
तत्स्वप्नेऽपि तदभ्यासाद् ब्रूते वाथ करोति वा ॥

ग) राजा मित्रं केन दृष्टं श्रुतं वा ।

५१.७ *वाक्यसंश्लेषणं कुरुत ।*

गोरंभः रात्रौ जागरितवान् । स तदा द्युतक्रीडायामासक्त आसीत् । अतः स निद्रावशंगतः । तदा स किमथयत् । स न ज्ञातवान् ।

५१.८ *वाक्यविश्लेषणं कुरुत ।*

दिवा मर्त्यो, यद् वाञ्छति, वीक्षते वा करोति, तदभ्यासात् स्वप्नेऽपि तद्ब्रूते करोति च ।

५१.९ *अस्य पाठस्य स्वकीयैर्वाक्यैः सरलार्थं लिखत ।*

५१.१० *नामपदानि विशेषणपदानि क्रियापदानि चान्विष्य तेषां विभक्तीनामुल्लेखञ्च कुरुत ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्विपञ्चाशः पाठः

अहो ! सुसदृशी चेष्टास्तुलाकोटेः खलस्य च

५२.१ *निम्नकथांशं पठत ।*

अपरं मयाऽस्य भूपतेरथवान्यस्यापि कस्यचिद्राजसंबन्धिनः स्वप्नेऽपि नानिष्टं कृतम्। तत्किमेतत्पराङ्मुखो मां प्रति भूपतिः? एवं तं दन्तिलं कदाचिद् राजद्वारे विष्कम्भितं विलोक्य संमार्जनकर्ता गोरम्भो विहस्य द्वारपालानिदमुचे- भो भो, द्वारपालाः, राजप्रसादाधिष्ठितोऽयं दन्तिलः स्वयं निग्रहानुग्रहकर्ता च । तदनेन निवारितेन यथाहं तथा यूयमप्यर्धचन्द्रभाजिनो भविष्यथ । तच्छ्रुत्वा दन्तिलश्चिन्तया-मास-नूनमिदमस्य गोरम्भस्य चेष्टितम् । अथवा साध्विदमुच्यते -

अकुलीनोऽपि मूर्खोऽपि भूपालं योऽत्र सेवते ।
अपि संमानहीनोऽपि स सर्वत्र प्रपूज्यते ।।१।।

एवं स बहुविधं विलप्य विलक्षमनाः सोद्वेगो गतप्रभावः स्वगृहं गत्वा निशामुखे गोरम्भमाहूय वस्त्रयुगलेन संमान्येदमुवाच - भद्र, मया त्वं न रागवशान्निः-सारितः । यतस्त्वं मान्यजनानामग्रतोऽनुचितस्थाने समुपविष्टो दृष्ट इत्यपमानितः । तत्क्षम्यताम् । सोऽपि स्वर्गराज्योपमं तद्वस्त्रयुगलमासाद्य परं परितोषं गत्वा तमुवाच-भो श्रेष्ठिन्, क्षान्तं मया ते तत् । तदस्य संमानस्य कृते पश्य मे बुद्धिप्रभावं राजप्रसादञ्च। एवमुक्त्वा सपरितोषं निष्क्रान्तः । साधु चेदमुच्यते -

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् ।
अहो सुसदृशी चेष्टा तुलायष्टेः खलस्य च ।।२।।

ततश्चानेद्युः स गोरम्भो राजकुले गत्वा योगनिद्रां गतस्य भूपतेः संमार्जनक्रियां कुर्वन्निदमाह- 'अहो अविवेकोऽस्मद्भूपतेः यत् पुरीषोत्सर्गं कुर्वन् चिर्भटीभक्षणं करोति । तच्छ्रुत्वा राजा सविस्मयं तमुवाच - रे रे गोरम्भ, किमप्रस्तुतं लपसि ? गृहकर्मकरं मत्वाऽहं त्वां न व्यापादयामि । किं त्वया कदाचिदेवं कर्म समाचरन् दृष्टः ? सोऽब्रवीत्- देव, द्यूतासक्तस्य रात्रिजागरणेन संमार्जनं कुर्वाणस्य मम बलान्निद्रा समायाता । तयाधिष्ठितेन मया किञ्चिज्जल्पितम्, तन्न वेद्मि । तत्प्रसादं करोतु स्वामी निद्रापरवशस्य। एवं श्रुत्वा राजा चिन्तितवान्- 'यन्मया जन्मान्तरे पुरीषोत्सर्गं कुर्वता कदापि चिर्भटिका न भक्षिता तद्यथायं व्यतिकरोऽसंभाव्यो ममानेन मूढेन व्याहृतस्तथा दन्तिलस्यापीति निश्चयः । तन्मया न युक्तं कृतं यत्स

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वराकः संमानेन वियोजितः । न तादृक्पुरुषाणामीदृशं चेष्टितं संभाव्यते । तदभावे न राजकृत्यानि पौरकृत्यानि च सर्वाणि शिथिलतां व्रजन्ति। एवमनेकधा विमृश्य दन्तिलं समाहूय निजाङ्गवस्त्राभरणादिभिः संयोज्य स्वाधिकारे नियोजयामास । अतोऽहं ब्रमीमि - यो न पूजयते गर्वात् इति ।

५२.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) दन्तिलेन गोरम्भकारणादेव राजाविमुखोऽभवदिति कथं ज्ञातम् ?
ख) गोरम्भेन दन्तिलं विलोक्य किमुक्तम् ?
ग) गोरम्भस्यापमानस्य कारणं किमासीत् ?
घ) दन्तिलेन गोरम्भमाहूय कथं परितोषित ?
ङ) परितुष्टो दन्तिलः किमादाय निर्गतः ?
च) खलतुलायष्ट्योः किं साम्यं विद्यते ?
छ) गोरम्भकेन राजप्रासादं प्राप्य किमुक्तम् ?
ज) गोरम्भकस्य वचनं निशम्य राज्ञा किमभिहितम् ?
झ) दन्तिलः कथं निरपराधः सञ्जातः ? स च कथं स्वाधिकारे नियोजितः।

५२.३ *उपरितनपाठान्तर्गतपदानां पर्यायपदानि लिखत ।*

५२.४ *सविग्रहं समासनामानि निर्दिशत ।*

पराङ्मुखः। राजद्वारे । राजप्रसादाधिष्ठितः । निग्रहानुग्रहकर्ता । अर्धचन्द्रभाजिनः । अकुलीनः । संमानहीनः । विलक्षमनाः । सोद्वेगः । गतप्रभावः। वस्त्रयुगलेन । अनुचितस्थाने । स्वर्गराज्योपमम् । सपरितोषम्। संमार्जनक्रियाम् । अविवेकः । पुरीषोत्सर्गम् । चिर्भटीभक्षणम् । गृहकर्मकरम्। द्यूतासक्तस्य । निद्रापरवशस्य । राजकृत्यानि । पौरकृत्यानि । निजाङ्गवस्त्राभरणादिभिः । स्वाधिकारे।

५२.५ *प्रकृतिप्रत्ययविभागं कुरुत ।*

विष्कम्भितम् । विलोक्य । संमार्जनम् । कुर्वाणः । अधिष्ठितः । जागरणम्। श्रुत्वा । चिन्तितवान् । भक्षितः । संभाव्यः । व्याहृतः । शिथिलताम् । विमृश्य । समाहूय । व्यतिकरः । समाचरन् । मत्वा । उक्त्वा । अपमानितः । निवारितः । विलप्य । चेष्टितम् । बुद्धिः । आहूय। विहस्य ।

५२.६ *वाच्यपरिवर्तनं कुरुत ।*

क) अकुलीनोऽपि मूर्खोऽपि योऽत्र भूपालं सेवते स संमानहीनोऽपि सर्वत्र प्रयुज्यते।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ख) तदनेन निवारितेन यथाऽहं तथा यूयमप्यर्धचन्द्रभाजिनो भविष्यथ ।

ग) तदस्य संमानस्य कृते पश्य मे बुद्धिप्रभावं राजप्रसादञ्च ।

घ) अहं गृहकर्मकरं त्वां न व्यापादयामि ।

ङ) मया जन्मान्तरे पुरीषोत्सर्गं कुर्वता न कदापि चिर्भटिका भक्षिता।

५२.७ *वाक्यसंश्लेषणं कुरुत ।*

भोः, भो द्वारपालाः, एष दन्तिलोऽस्ति । स राजप्रसादे तिष्ठति । असौ निग्रहं करोति, अनुग्रहञ्च विधातुं समर्थः । अयं माम्, युष्मान् च निष्काशयति । वयं दूरं यास्यामः ।

५२.८ *वाक्यविश्लेषणं कुरुत ।*

एवं स बहुविधं विलप्य सोद्वेगो गतप्रभावः स्वगृहं गत्वा निशामुखे गोरम्भमाहूय वस्त्रयुगलेन संमान्य 'मया त्वं रागवशान्न निःसारितः किन्तु मान्यजनानामग्रेऽनुचितस्थाने समुपवेशादपमानितः, क्षम्यतामित्याह ।

५२.९ *दन्तिलस्य गोरम्भस्य च चरित्रं चित्रयत ।*

५२.१० *दन्तिलगोरम्भयोः कथामिमां संक्षिप्य लिखत ।*

५२.११ *दन्तिलगोरम्भकथया का शिक्षा लभ्यते ? स्फुटं प्रकाशयत ।*

५२.१२ *कमप्युच्चवर्गसंबद्धं कथानकं प्रकल्प्य कथामेकां रचयत ।*

५२.१३ *अभ्यागतेन सह कुशलप्रश्नादिना संबद्धं स्वल्पं संवादं लिखत ।*

५२.१४ *अव्ययपदानि सर्वनामपदानि चान्विष्य दर्शयत ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्रिपञ्चाशः पाठः

सत्सङ्गतिफलम्

५३.१ *निम्नलिखितकथाभागं पठत ।*

सञ्जीवक आह– एवमेवैतत् । यद्भवताभिहितं तन्मया कर्तव्यम्। एवमभिहिते दमनकस्तमादाय पिङ्गलकसकाशमगमत् । आह च– देव, एष मयानीतः स सञ्जीवकः। अधुना देव प्रमाणम् । सञ्जीवकोऽपि तं सादरं प्रणम्याग्रतः सविनयं स्थितः । पिङ्गलकोऽपि तस्य पीनायतककुद्मतो नखकुलिशालङ्कृतं दक्षिणपाणि- मुपरि दत्त्वा मानपुरःसरमुवाच – अपि शिवं भवतः ? कुतस्त्वमस्मिन् वने विजने समागतोऽसि ? तेनाप्यात्मवृतान्तः कथितः। यथा वर्धमानेन सह वियोगः सञ्जातस्तथा सर्वं निवेदितम् । तच्छ्रुत्वा पिङ्गलकः सादरतरं तमुवाच – वयस्य, न भेतव्यम् । मद्भुजपञ्जरपरिरक्षितेन यथेच्छं त्वयाऽधुना वर्तितव्यम् । अन्यच्च मत्समीपवर्तिना भाव्यम् । यतः बह्वपायं रौद्रसत्त्वनिषेवितं वनं गुरूणामपि सत्त्वानामसेव्यम्, कुतः शष्पभोजिनाम् । एवमुक्त्वा सकलमृगपरिवृतो यमुनाकच्छमवतीर्योदकग्रहणं कृत्वा स्वेच्छया तदेव वनं प्रविष्टः। ततश्च करटकदमनकनिक्षिप्तराज्यभारः सञ्जीवकेन सह सुभाषितगोष्ठीमनुभवन्नास्ते । सञ्जीवकेनापि, अनेकशास्त्रावगाहनादुत्पन्न- बुद्धिप्रागल्भ्येन स्तोकैरेवाहोभिर्मूढमतिः पिङ्गलको धीमांस्तथा कृतो यथारण्यधर्माद् वियोज्य ग्राम्यधर्मेषु नियोजितः । किं बहुना, प्रत्यहं पिङ्गलकसञ्जीवकावेव केवलं रहसि मन्त्रयतः । शेषः सर्वोऽपि मृगजनो दूरीभूतस्तिष्ठति । करटकदमनकावपि प्रवेशं न लभेते । अन्यच्च सिंहपराक्रमाभावात् सर्वोऽपि मृगजनस्तौ च शृगालौ क्षुधाव्याधिबाधिता एकां दिशमाश्रित्य स्थिताः ।

५३.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

क) दमनकः किं कृत्वा सञ्जीवकमादाय पिङ्गलकसकाशमगच्छत् ?
ख) पिङ्गलकस्य दक्षिणः करः कीदृश आसीत् ?
ग) किं विधाय पिङ्गलको वनं प्रविष्टः ?
घ) पिङ्गलकेन राज्यभारः कस्मै प्रदत्तः ?
ङ) पिङ्गलकः कथं ग्राम्यधर्मे प्रवृत्तः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५३.३ *उक्तपाठान्तर्गतपदानां पर्यायपदानि लिखत ।*

५३.४ *सविग्रहं समासनामानि लिखत ।*

सविनयम् । पीनायतककुद्मतः । नखकुलिशालङ्कृतम् । दक्षिणपाणिम् । मानपुरःसरम् । आत्मवृतान्तः । मद्भुजपञ्जरपरिरक्षितेन । मत्समीपवर्तिना । बह्वपायम् । रौद्रसत्त्वसेवितम् । सकलमृगपरिवृतः । यमुनाकच्छम् । करटकदमनकनिक्षिप्त-राज्यभारः । अनेकशास्त्रावगाहनाद् । उत्पन्नबुद्धिप्रागल्भ्येन । मूढमतिः । अरण्यधर्मात् । ग्राम्यधर्मेषु । प्रत्यहम् । पिङ्गलकसञ्जीवकौ । करटकदमनकौ । सिंहपराक्रमाभावात् । क्षुधाव्याधिबाधिता । शष्पभोजिनम् ।

५३.५ *प्रकृतिप्रत्ययविच्छेदं कुरुत ।*

कर्तव्यम् । आदाय । अभिहितम् । प्रणम्य । अग्रतः । वियोगः । श्रुत्वा । सञ्जातः । वर्तितव्यम् । भेतव्यम् । सेव्यम् । उक्त्वा । धीमान् । आश्रित्य । स्थितः ।

५३.६ *वाच्यपरिवर्तनं कुरुत ।*

क) मद्भुजपरिरक्षितेन त्वयाऽधुना स्थीयताम् ।

ख) यद् भवताऽभिहितन्तदहं करोमि ।

ग) प्रत्यहं पिङ्गलकसञ्जीवकावेव रहसि मन्त्रयतः ।

घ) सोऽप्यात्मवृतान्तमकथयत् ।

ङ) एवमुक्त्वा पिङ्गलकः सकलमृगपरिवृतो यमुनातटमवातरत् ।

५३.७ *कर्मवाच्यानि वाक्यान्यन्विष्य कर्तृवाच्ये परिवर्तनं कुरुत ।*

५३.८ *स्वकीयवाक्येषु प्रयोगं कुरुत ।*

कर्तव्यम् । भेतव्यम् । वर्तितव्यम् । असेव्यम् । आदाय । प्रणम्य । दत्त्वा । भाव्यम् । वियोज्य । आश्रित्य ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

चतुष्पञ्चाशः पाठः

निबन्धपरिचयः

५४.१ *निबन्धस्वरूपम्*

निबध्नातीति व्युत्पत्या निबन्धशब्दो निष्पद्यते । निवध्यते इति, निःशेषेण बन्ध इत्याद्यर्थेऽपि निपूर्वकाद् बध्धातोर्घञि निबन्धशब्दस्य निष्पत्तिः । एवमेव प्रबध्नातीति व्युत्पत्या प्रबन्धशब्दोऽपि निष्पद्यते । पुरा प्रबन्धशब्दः ताडपत्रग्रथन-विशिष्टग्रन्थादौ प्रयुज्यते स्म परमधुना निबन्धप्रबन्धशब्दौ पर्यायभूतौ साहित्ये प्रचलितं गद्ये निवद्धं विचारप्रधानं भावात्मकं वा रचनाविशेषं बोधयतः ।

५४.२ *आधुनिकनिबन्धपरम्परा*

आधुनिक निबन्धस्य प्रारम्भः प्रथमं फ्रान्सदेशेऽजायत । तत्र मोतेञ्नामा गद्यलेखकः सरलान् विनोदप्रधानान् लघुगद्यलेखान् प्राणैषीत् । ततस्तेन तथाविधान् लेखान् सङ्कलय्य 'एस्सेज्' इति नाम्ना निबन्धसङ्ग्रहः प्रकाशितः । तस्य प्रचारः समग्र एव यूरोपदेशे समजायत। उत्तमपुरुषशैल्यां प्रणीतास्तस्य निबन्धाः प्रायेणात्मविचाराभिव्यक्तिप्रधानाः सन्ति । ततस्तत्रत्यो गद्यलेखको वेकनः विषय-प्रधानान् निबन्धानसृजत् । रिचर्डस्टीलप्रभृतिभिर्विद्वद्भिनिबन्धप्रकारोऽयं परिस्कृतः। अधुना निबन्धरचनायाः परिपाटीयं सर्वास्वपि भाषासु प्रचलिता विद्यते । संस्कृत-भाषायामाधुनिकशिक्षाप्रभाविता विद्वांसो भारते आङ्लशासनकाले निबन्धान् विरच्य सारस्वतीसुषमादिपत्रिकासु प्रकाशितवन्तः। तैः संस्कृतशिक्षापाठ्यक्रमेऽपि निबन्ध-विषयो निर्धारितः । इत्थं क्रमेण संस्कृतभाषायामपि निबन्धा लिखिताः, प्रकाशिताश्च।

५४.३ *निबन्धलक्षणम्*

आधुनिकनिबन्धस्य नैकमस्ति लक्षणम्, बहुभिर्विद्वद्भिर्नैकेधा परिभाषितोऽयं विषयः। तेषां सारोऽस्ति यत् -

'यत्किमपि विषयमवलम्ब्य नातिसरलेन नातिकठिनेन प्रवहणशीलेनार्थ-गभीरेण सुसङ्घटितेन गद्येन वर्णनमथवा भावात्मकशैल्या तस्मिन् विषये निजभावनाया विचारस्य वाऽभिव्यञ्जनमेव निबन्धलक्षणम् ।

५४.४ *निबन्धभेदाः*

प्रथमं निबन्धा द्विविधाः – विषयिप्रधानाः विषयप्रधानाश्च । तत्राद्ये निबन्धकारः कमपि विषयं निमित्तीकृत्य विषयिणः (स्वस्यैव) विचारान् प्रस्तौति । अत्र विषयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

केवलं तटस्थो भवति । केवलं निबन्धकारः तत्संबद्धान् स्वविचारानेवाभिव्यनक्ति। पुनरयं द्विविधः भावप्रधानः, विचारप्रधानश्च । तत्र भावप्रधाने निबन्धे निबन्धकारस्य कल्पनासंवलिता रागात्मकाः हार्दिका भावा अभिव्यज्यन्ते । द्वितीयप्रकारके निबन्धे च निबन्धकारस्य विश्लेषणात्मकाश्चिन्तनप्रधानाः विचाराः समुद्घाट्यन्ते । विषयप्रधाना निबन्धाः द्विविधाः सन्ति–वर्णनात्मकाः, विवरणात्मकाश्च । यत्र विषयाः साक्षाद् विलोकिता इव प्रत्यक्षतया वर्ण्यन्ते ते निबन्धा वर्णनात्मका इति कथ्यन्ते। यत्र च विषया अप्रत्यक्षतया विवरणरूपेण प्रस्तूयन्ते ते निबन्धाः 'विवरणात्मकाः' इति निगद्यन्ते । वर्गीकरणेऽस्मिन्नरूचिं दधानाः केचन विद्वांसो निबन्धमन्यथा विभजते । तेषां मते निबन्धाः पञ्चविधाः – (१) विवरणात्मकाः, (२) वर्णनात्मकाः, (३) भावात्मकाः, (४) विचारात्मकाः, (५) निजात्मकाश्च ।

निजात्मकनिबन्धेषु प्रायेण निबन्धकारस्य स्वविषयाः समुद्घाट्यन्ते । अन्येषां परिचयस्तु प्रागेवोक्तमिति नात्रावर्त्यते ।

५४.५ *निबन्धलेखनविधिः*

निबन्धलेखने प्रथमं काठिन्यमेवानुभूयते । तथापि लेखनाय प्रतिदिनं कृतेऽभ्यासे लेखनशक्तिः क्रमेण वृद्धिमुपगच्छति, भावानुसारेण शब्दानां प्रयोगकौशलं वर्धते, विचाराः शनैः शनैः पल्लविता जायन्ते, रचनाकौशलञ्च समेधते । अतः प्रारम्भे यत्किञ्चिद्विषयमादाय सरलया गिरा वर्णनं विधेयम् । ततः क्रमेण वृद्धिमुपगते वर्णनकौशले निबन्धस्य सैद्धान्तिकपक्षोऽध्ययनीयः । निबन्धकारैर्लब्धप्रतिष्ठैर्लिखिता निबन्धा विलोकनीयाः। विशेषेण निबन्धलेखनेऽनुसरणीया विषया अधो निर्दिश्यन्ते-

क) *शीर्षकविधानम्*

यस्य कस्यापि निबन्धस्य शिरोभागे विषयस्य नामोल्लिख्यते । तच्च निबन्धस्य रहस्योद्घाटकं किं वा वर्ण्यविषयस्य परिचायकं भवति । एतदेव 'शीर्षकम्' इत्येतेन नाम्न व्यवदिश्यते । एतत् सारवत्, अल्पाक्षरम्, असन्दिग्धं विषयसंबद्धं भवितुमर्हति । शीर्षकविधाने विचारणीयोऽस्त्ययं पक्षः ।

ख) *विषयसूत्राणि*

निबन्धलेखनक्रमे विषयसूत्राणां सङ्कलनं नितान्तमेव भवत्युपकारकम् । विषयसूत्राणां सङ्कलनमन्तरेण विषयप्रधाना निबन्धा न शक्यन्ते प्रणेतुम्, न च शक्यते तत्र क्रमबद्धतां स्थापयितुम् । अतोऽपि निबन्धरचनायां प्रयतता जनेन विषयसूत्राणां सङ्कलने दृष्टिर्दातव्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ग) *अनुच्छेदरचना*

अनुच्छेदैरेव निबन्धकलेवरस्य निर्माणं भवति । अतः सङ्कलितेषु विषयसूत्रेषु क्रमनिर्धारणं विधाय प्रतिविषयसूत्रमनुच्छेदानां रचनं विधेयम् ।

घ) *निबन्धावयवाः*

निबन्धस्य मुख्यतया त्रयोऽवयवाः संभवन्ति – परिचयभागः, मध्यभागः, उपसंहारभागश्चेति । तत्र परिचयभागः परिचयोपक्रमविषयप्रवेशभूमिकादिशब्दैर्व्यवह्रियते । अत्र विषयस्य परिचयः प्रस्तूयते । निबन्धस्य मध्यभागो नितान्तमेव महत्त्वं धत्ते । विषयवस्तूनां विकासोऽत्र जायते । त्रिभिश्चतुर्भि वाऽनुच्छेदैर्विषयस्य वर्णनं भवत्यत्र समुचितम् । अतोऽत्र निबन्धप्रणयनोद्यतैः छात्रैः सप्रमाणं सोदाहरणञ्च विषयो भवत्युपस्थापनीयः । आत्मपरकनिबन्धेष्वपि स्वविचारोद्भावनस्य हृद्गतभावोच्छ्वलनस्य वा चरमोत्कर्षोऽत्रैव जायते ।

निबन्धस्यान्तिमो भागः 'उपसंहारभागः' इति निगद्यते । अयं भागः निष्कर्षभागः, इति नाम्नाऽपि व्यपदिश्यते । मध्यभागे वर्णितस्यैव विषयस्य निष्कर्षोऽत्र स्थाप्यते निबन्धकारेणात्र ।

५४.६ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. निबन्धशब्दस्य का व्युत्पत्तिः, कश्चार्थं बोधयति स शब्दः ?
२. आधुनिकनिबन्धस्य प्रारम्भः कुत्र अजायत, कथञ्च तस्य संस्कृतभाषायां प्रयोगः ?
३. निबन्धस्य किं लक्षणम् ?
४. निबन्धस्य कति भेदाः, के च ते ? किञ्च तेषां स्वरूपम् ?
५. विषयि-विषयप्रधानयोर्निबन्धयोः को भेदः ?
६. वर्णनात्मक-विवरणात्मकनिबन्धयोः किं पार्थक्यम् ?
७. निबन्धरचनाविषये ध्यातव्या विषयाः के सन्ति ?
८. निबन्धस्य कत्यवयवाः, के च ते ? कश्च तेषां परिचयः ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पञ्चपञ्चाशः पाठः

निबन्धलेखनदिग्दर्शनम्

५५.१ *विद्या*

विद्याशब्दो ज्ञानर्थकाद् विद्धातोः करणे विद्यते अनया इति व्युत्पत्या सिद्धयति। लोके समुत्पन्नेषु द्रव्येषु विद्यैव सर्वश्रेष्ठं द्रव्यं मन्यते । विद्यामन्तरेण मानवोऽसभ्यो मूर्खो ग्रामीणश्च कथ्यते । ज्ञानं विना यथा पशुः धर्माधर्मयोर्विचारं कर्तुं न प्रभवति तथैव मनुष्योऽपि विद्यामन्तरेण पापपुण्ययोः कर्तव्याकर्तव्ययोश्च विचारं कर्तुं न पारयति। विद्याविहीनो मानवोऽन्ध एव भवति । यदि लोके विद्याज्योतिर्न स्यात्तदाखिलमपि जगत् अन्धकारावृत्तमिव भवेत् । विद्यया एवास्य जगतो यावज्ज्ञेयं तत्त्वं तावदखिलं प्रकाश्यते । यत्कार्यमन्येन द्रविणादिनापि न साध्यते, विद्या-द्रव्येणायासं विनैव साधयितुं शक्यते । अत एव विद्याधनस्य प्राधान्यं सर्वत्र वर्णितं विद्यते ।

इयञ्च विद्या सर्वेषु धनेषु प्रधाना इति यदुक्तं तस्य बहूनि कारणानि सन्ति । अन्यानि धनानि व्ययेन क्षयं गच्छन्ति। किन्तु विद्याधनं व्ययेन वृद्धिमेति । विद्याया एतद् वैशिष्ट्यं वर्तते यद् दानादियं प्रवर्धते सञ्चयाच्च क्षयं गच्छति । तदेवोक्तं केनचित् कविना-

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति !
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ।।

विद्याधनस्य अपरमपि वैशिष्ट्यं वर्तते यदिदं धनं न कोऽपि चोरयितुं शक्नोति। कदाचित् प्रशासको विद्याधनं हर्तुं न प्रभवति । विद्याधनं भ्रातृभाज्यमपि न भवति। इदं भारकारि अपि न जायते । अत एव सम्यगुक्तं केनचिद् विदुषा-

न चौरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् ।।

तथैवोक्तमन्यत्रापि -

वसुमतीपतिना न सरस्वती बलवता रिपुणापि न नीयते ।
समविभागहरैर्न विभज्यते विबुधबोधबुधैरपि सेव्यते ।।

विद्याबलेनैव मानवो मृतोऽपि अमृतपदविमारोहति । कालिदास-भवभूति-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सेक्सपियर-तुलसीदास-लेखनाथ-लक्ष्मीप्रसादप्रभृतयः कवयो विद्यया एवामरत्वं प्राप्तवन्तः। तेषां सरसानि सुललितानि काव्यानि अद्यापि सहृदयानां चेतांसि आवर्जयन्ति पीयूषधारा वर्षयन्ति। विद्यावन्तो जनाः सर्वत्र प्रतिष्ठां लभन्ते । राजानो विद्यावतां पुरो नतमस्तका भवन्ति । अत एवोच्यते - **विद्ययाऽमृतमश्नुते** इति ।

विद्यया चतुर्वर्गफलप्राप्तिर्भवति । विद्या विनयं ददाति, विनयेन मानवः पात्रत्वं लभते । पात्रत्वेन स धनमाप्नोति । इत्थं चतुर्वर्गस्य प्रथमो वर्गो धनरूपो विद्यया प्राप्तुं शक्यते । यदा मानवो धनं लभते तदा स दानं करोति तेन च पुण्यार्जनं जायते, ततश्च स सुखमनुभवति । तदुक्तं नीतिकृता -

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मः ततः सुखम् ।।

धनेन मानवः सुन्दरं प्रासादं निर्माति । नानास्वादजनकानि भोजनानि भुङ्क्ते । इत्थञ्च स विद्यया काममपि लभते । नरो विद्ययैव आत्मपरमात्मनोरभेदं पश्यति । स ब्रह्म जानाति ततस्तद्रूपो भवति । अनेन प्रकारेण मानवो विद्यया मोक्षं लभते ।

अत्र विचारणीयं वर्तते यद् या विद्या क्रियान्विता न भवति सा खलु फलवती न भवति । यः क्रियावान् अधीतशास्त्रः स एव विद्वान् कथ्यते । विद्वानपि कर्मविहीनो नरस्तु मूर्ख एव । तदुक्तं केनचित् -

विद्यामधीत्यापि भवन्ति मूर्खाः, यस्तु क्रियावान् पुरुषः स विद्वान् ।

विद्यामुपार्जयता छात्रेण सुखदुःखयोः चिन्तनं मनसापि न विधेयम् । अनवरतं परिश्रम्य विद्या सर्वात्मना आत्मसात् करणीया । सुखमभिलषन्तश्छात्रा विद्यामहत्त्वं न जानन्ति, ते विद्यामृतञ्च प्राप्तुं न प्रभवन्ति । तथा चोक्तम् -

सुखार्थिनः कुतो विद्या विद्यार्थिनः कुत सुखम् ।
सुखार्थी चेत् त्यजेद्विद्यां विद्यार्थी चेत् त्यजेत् सुखम् ।।

अत एव वक्तुं शक्यते-विद्या मानवानां नितरामुपकरोति, इयं मातेव रक्षति, पितेव हितकार्ये नियोजयति, कान्तेव खेदमपनीय रमयति, लक्ष्मीं वर्धयति, दिक्षु कीर्तिं विस्तारयति, अत इयं कल्पलतेव विलसति । विद्याप्रशंसायां सत्यमेवाभिहितं केनचित् कविना -

मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीय खेदम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं
किं किं न साधयति कल्पलतेव विद्या ।।

५५.२ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. विद्याशब्दस्य का व्युत्पत्तिः, कश्च तस्यार्थः ?

२. विद्याविहीनो नरः, किं कर्तुं न पारयति ?

३. विद्यां विना इदं जगत् कीदृशं जायते ?

४. विद्यायाः सर्वधनप्रधान्ये, के हेतवः ?

५. विद्यया कथममृतं लभ्यते ?

६. विद्यया चतुर्वर्गफलप्राप्तिः कथं जायते ?

७. कीदृशी विद्या अनर्थाय कल्पते ?

८. कीदृशश्छात्रो विद्यामर्जयितुं पारयति ?

९. विद्याकल्पलतयोः किमर्थमस्ति साम्यं वर्णितम् ?

५५.३ *निम्नलिखितसङ्केतमवलम्ब्य विद्याविषयको निबन्धो विरच्यताम्-*

क) विद्यापरिचयः (ख) विद्यायाः सर्वधनप्राधान्यम् (ग) विद्याकल्पलतयोः साम्यम् (घ) विद्यया चतुर्वर्गफलप्राप्तिः (ङ) विद्यया अमरत्वप्राप्तिः (च) उपसंहारः।

५५.४ *निम्नलिखितसूक्तीर्यथास्थानं प्रयुज्य विद्याविषयकं निबन्धं रचयत।*

क) शुनः पुच्छमिव व्यर्थं जीवनं विद्यया विना ।
न गुह्यगोपने शक्तं न च दंशनिवारणे ।।

ख) अपूर्वः कोऽपि कोशोऽयं दृश्यते तव भारति ! ।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ।।

ग) सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ।
अहार्यत्वादनर्घत्वादक्षयत्वाच्च सर्वदा ।।

घ) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम्
विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ङ) विद्वत्त्वञ्च नृपत्वञ्च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ॥

५५.५ *निर्धारितसङ्केतानुसारं निम्नविषयेषु निबन्धं रचयत ।*

क) अनुशासनम् – परिचयः । महत्त्वम् । तदभावे हानिः । दृष्टान्तः । उपसंहारः।

ख) लोकतन्त्रम् – परिचयः । महत्त्वम् । लोकतन्त्रस्य विकासक्रमः । लोकतन्त्रप्रकाराः । लोकतन्त्रस्य लाभाः । अस्य दोषाः । उपसंहारः ।

ग) वसन्तः – परिचयः । महत्त्वम् । साहित्ये वसन्तस्य स्थानम् । उपसंहारः।

घ) सत्सङ्गतिः – परिचयः । तस्या महत्त्वम् । सत्सङ्गतेर्लाभाः । उपसंहारः ।

ङ) संस्कृतभाषा – परिचयः । विकासक्रमः । वर्गीकरणम् । वाङ्मयपरिचयः। महत्त्वम् । संस्कृतस्य वर्तमानावस्था । अस्या अभ्युत्थानस्योपायाः । उपसंहारः।

च) कालिदासः – परिचयः । ग्रन्थाः । तेषां वैशिष्ट्यम् । उपसंहारः ।

छ) परोपकारः – परिचयः । परोपकारस्य महत्त्वम् । दृष्टान्ताः । उपसंहारः ।

ज) उद्योगः – परिचयः । उद्योगस्य महत्त्वम् । अनुद्योगस्य दोषाः । दृष्टान्ताः। निष्कर्षः ।

द्रष्टव्यम् – *एवमेव शिक्षकैर्निबन्धसङ्ग्रहेभ्यः समुचितान् निबन्धान् सङ्कलय्य अभ्यासः कारयितव्यः ।*

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षट्पञ्चाशः पाठः

पद्यपरिचयः

५६.१ *पद्यस्य लक्षणम्*

यत्र चत्वारः पादा भवन्ति तत् पद्यमिति निगद्यते । तस्य लक्षणं यथा छन्दोमञ्जर्याम् -

'चतुष्पदि पद्यम्' इति

एकस्मिन् पद्ये चत्वारः पादा भवन्तीति सरलार्थः । उदाहरणं यथा -

नरपतिहितकर्ता त्यज्यते पार्थिवेन्द्रै-
र्जनपदहितकर्ता द्वेष्यतामेति लोके ।
इति महति विरोधे वर्तमाने समाने
नृपतिजनपदानां दुर्लभः कार्यकर्ता ।।

अत्र चत्वारः पादाः सन्ति । अत एतत्पद्यमस्ति ।

५६.२ *पद्यभेदाः*

पद्यं द्विविधम् - वृत्तम्, जातिश्च । यत्र अक्षरैर्गणना भवति तद् वृत्तम्, यत्र च पुनर्मात्राभिर्गणना जायते सा जातिरिति निगद्यते । तदेवोक्तम् -

अक्षरैर्गणना यत्र तद् वृत्तमिति कथ्यते ।
मात्राभिर्गणना यत्र सा जातिरभिधीयते ।।

५६.३ *वृत्तं त्रिविधम्*

समचतुष्पादम्, अर्धसमपादम्, विषमपादञ्च । यत्र चत्वारः पादाः समानाः तत्समचतुष्पादमिति निगद्यते । यथा -

वरं वनं व्याघ्रगजेन्द्रसेवितं
द्रुमालयं पक्वफलाम्बुभोजनम् ।
तृणानि शय्या रुचिरञ्च वल्कलं
न बन्धुमध्ये धनहीनजीवनम् ।।

अत्र चत्वार एव पादाः समानाः। अतो वंशस्थविलं नामेदं पद्यं समचतुष्पादम्। यत्र प्रथमपादेन तुल्यस्तृतीयपादः, द्वितीयपादेन तुल्यश्चतुर्थपादस्तदर्ध-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समपादमुच्यते । यथा –

यदवोचत वीक्ष्य मानिनी
परितः स्नेहमयेन चक्षुषा
अपि वागधिपस्य दुर्वचं
वचनं तद्विदधीत विस्मयम् ।

अत्र प्रथमपादस्तृतीयपादेन, द्वितीयपादश्चतुर्थपादेन तुल्यौ स्तः । अतः सुन्दर्यां रचितमिदं पद्यमर्धसमपादमिति । यत्र चत्वार एव पादा भिन्नलक्षणास्तद् विषमपादवृत्तम् । यथा –

अथ वासवस्य वचनेन
रुचिरवदनस्त्रिलोचनम् ।
क्लान्तिरहितमभिराधयितुं
विधिवत्तपांसि विदधे धनञ्जयः ।

अत्र चत्वार एव पादा असमानलक्षणाः, अत उद्गतायां लिखितमिदं वृत्तं विषमपादवृत्तम् ।

५६.४ *जाति च नवधा*

पथ्या, विपुला, चपला, मुखचपला, जघनचपला, गीतिः, उपगीतिः, उद्गीतिः, आर्यागीतिश्चेति ।

५६.५ *गणनामानि*

छन्दः शास्त्रे त्र्यक्षराणामेको गणः कल्पितोऽस्ति । तस्य सङ्ख्या चाष्टौ विद्यते। तदुक्तं छन्दोमञ्जर्याम् –

म्यरस्तजभ्नगैर्लान्तैरेभिर्दशभिरक्षरैः ।
समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ।।

५६.६ *तेषां परिचयो यथा –*

मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः ।
जो गुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ।।

पिङ्गलसूत्रेऽपि –

आदिमध्यावसानेषु भजसा यान्ति गौरवम् ।
यरता लाघवं यान्ति मनौ तु गुरुलाघवम् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यथा - यमाताराजभानसलगा

गणनामानि	गणपरिचयः	गणसङ्केताः	उदाहरणानि
भगणः	आदिगुरुः	ऽ।।	खादति
जगणः	मध्यगुरुः	।ऽ।	करोति
सगणः	अन्त्यगुरुः	।।ऽ	कुरुतः
यगणः	आदिलघुः	।ऽऽ	अकुर्वन्
रगणः	मध्यलघुः	ऽ।ऽ	कुर्वते
तगणः	अन्त्यलघुः	ऽऽ।	कुर्वन्ति
मगणः	सर्वगुरुः	ऽऽऽ	कुर्वीते
लघुः	ल	।	न
गुरुः	ग	ऽ	का

५६.७ *गुरुलघुनिर्देशः*

गुरुरेको गकारस्तु लकारो लघुरेककः ।
क्रमेण चैषां रेखाभिः संस्थानं दर्शितं मया ।।

५६.८ *गुरुलघुसिद्धान्तः*

सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।
वर्णसंयोगपूर्वश्च तथा पादान्तगोऽपि वा ।।

५६.९ *यतिपरिचयः*

यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते ।
सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया ।।

५६.१० *आर्यालक्षणम्*

यस्याः प्रथमतृतीयपादयोः प्रत्येकं द्वादशमात्राः, द्वितीये पादेऽष्टादशमात्राः, चतुर्थे च पादे पञ्चदशमात्रा भवन्ति सा आर्येति निगद्यते । तल्लक्षणं यथा–

यस्याः पादे प्रथमे
द्वादशमात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये
चतुर्थके पञ्चदश साऽऽर्या ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदाहरणं यथा

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ।।

अत्र प्रथमतृतीयपादयोः प्रत्येकं द्वादशमात्राः, द्वितीये पादेऽष्टादशमात्राः, चतुर्थे च पादे पञ्चदशमात्राः प्रयुक्ताः सन्ति । अतः पद्यमिदमार्याछन्दस उदाहरणं विद्यते।

५६.११ *अनुष्टुब्वृत्तस्य लक्षणम्*

यस्य वृत्तस्य चतुर्ष्वेव पादेषु पञ्चमवर्णो लघुर्भवति, द्विचतुर्थयोः पादयोः सप्तमवर्णो लघुर्जायते, सर्वेष्वेव पादेषु षष्ठवर्णो गुरुर्भवति, तद्वृत्तम् 'अनुष्टुभ्' इति कथ्यते । तल्लक्षणं यथा –

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरु विजानीयात् शेषेषु नियमो नहि ।।

अक्षरमिति शेषः ।

उदाहरणं यथा

काव्यशास्त्रविनोदेन कालो गच्छति धीमताम् ।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ।।

अत्र सर्वेषु पादेषु पञ्चमवर्णः, द्वितीयचतुर्थपादयोश्च सप्तमवर्णो लघुर्विद्यते, चतुर्ष्वेव पादेषु षष्ठवर्णो गुरुरस्ति । अतः पद्यमिदमनुष्टुब्वृत्तस्योदाहरणम् ।

५६.१२ *इन्द्रवज्राया लक्षणम्*

यस्य वृत्तस्य प्रतिपादं क्रमेण ततजगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगो भवति तद्वृत्तम् 'इन्द्रवज्रा' इति कथ्यते । तल्लक्षणं यथा –

स्यादिन्द्रवज्रा यदि तौ जगौ गः ।

उदाहरणं यथा

सर्वौषधीनाममृतं प्रधानं
सर्वेषु सौख्येष्वशनं प्रधानम् ।
सर्वेन्द्रियाणां नयनं प्रधानं
सर्वेषु गात्रेषु शिरःप्रधानम् ।।

अत्र चतुर्षु पादेषु क्रमेण ततजगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगः । अत पद्यमिदमिन्द्रवज्राया उदाहरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५६.१३ उपेन्द्रवज्रालक्षणम्

यस्य वृत्तस्य प्रतिपादं क्रमेण जतजगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगो भवति तद्वृत्तम् 'उपेन्द्रवज्रा' इति निगद्यते । तल्लक्षणं यथा –

उपेन्द्रवज्रा जतजास्ततो गौ ।

उदारहणं यथा

अपायसन्दर्शनजां विपत्ति-
मुपायसन्दर्शनजाञ्च सिद्धिम् ।
समीक्षका नीतिगुणप्रयुक्तां
पुरःस्फुरन्तीमिव वर्णयन्ति ।।

अत्र प्रतिपादं क्रमेण जतजगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगः । अतः पद्यमिद-मुपेन्द्रवज्राया उदाहरणम् ।

५६.१४ उपजातिलक्षणम्

यत्र द्वयोर्वृत्तयोः प्रायश इन्द्रवज्रोपेन्द्रवज्रयोः सम्मिश्रणं भवति तत् उपजाति-वृत्तमुच्यते । तल्लक्षणं यथा –

अनन्तरोदीरितलक्ष्मभाजौ
पादौ यदीयावुपजातयस्ताः ।
इत्थं किलान्यास्वपि मिश्रितासु
वदन्ति जातिष्विदमेव नाम ।।

उदाहरणं यथा

अर्थागमो नित्यमरोगिता च
प्रिया च भार्या प्रियवादिनी च
वश्यश्च पुत्रोऽर्थकरी च विद्या
षड् जीवलोकस्य सुखानि राजन्

अत्र प्रथमतृतीयचतुर्थपादेषु इन्द्रवज्रायाः (प्रत्येकं क्रमेण ततजगणानां द्वयो-र्गुरुवर्णयोश्च) प्रयोगः, द्वितीये च पादे उपेन्द्रवज्राया (क्रमेण जतजगणानां द्वयोर्गुरु-वर्णयोश्च) प्रयोगः । अतः पद्यमिदमिन्द्रवज्रोपेन्द्रवज्रयोर्मिश्रणादुपजातिवृत्त-स्योदाहरणम्। एवमेव वंशस्थेन्द्रवंशादेरपि ।

५६.१५ रथोद्धतावृत्तलक्षणम्

यस्य वृत्तस्य प्रतिपादं क्रमेण र–न–रगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

च प्रयोगो भवति तद्वृत्तं रथोद्धतेति कथ्यते । तल्लक्षणं यथा–

रात्परैर्नरलगौ रथोद्धता ।

उदाहरणं यथा

गम्यते यदि मृगेन्द्रमन्दिरे
लभ्यते करिकपोलमौक्तिकम् ।
जम्बुकालयगतेन लभ्यते
वत्सपुच्छखुरचर्मखण्डनम् ।।

अत्र प्रतिपादं क्रमेण र–न–रगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगः। अतः पद्यमिदं रथोद्धताया उदाहरणम् ।

शालिनीवृत्तलक्षणम्

यत्र प्रतिपादं क्रमेण मगणस्य, तगणयोर्द्वयोर्गुरुवर्णयोश्च प्रयोगो भवति तच्छालिनीवृत्तमिति निगद्यते । लक्षणं यथा –

मात्तौ गौ चेच्छालिनी वेदलोकैः ।

वृत्तेऽस्मिन् चतुर्थे वर्णे, तदनु च सप्तमेऽक्षरे विश्रामो भवति ।

उदाहरणं यथा

बुद्धिर्येषां संप्रभूतप्रकर्षा
स्तेऽमी धन्या सिद्धिभाजश्च कार्ये ।
अन्ये भूयो हन्त पाषाणकल्पाः
किञ्चित् कार्यं नैव कर्तुं समर्थाः ।।

अत्र प्रतिपादं क्रमेण म–त–तगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगाच्छालिनीवृत्तम्।

स्वागतावृत्तलक्षणम्

यत्र पद्ये प्रतिपादं क्रमेण रगण–नगण–भगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगस्तदा स्वागतावृत्तं भवति । तल्लक्षणं यथा –

स्वागतेति रनभाद् गुरुयुग्मम् ।

उदाहरणं यथा

नीललोहितमुखच्युतवाचा
यातुधानपुरि बद्धपदं यम्
रावणं भर निशाचरि ! मां त्वं
मोचयेति वदतीव शुकोऽस्याम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र प्रतिपादं क्रमेण र–न–भगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगाद् स्वागतावृत्तम्।

५६.१८ *दोधकवृत्तस्य लक्षणम्*

यत्र प्रतिपादं क्रमेण त्रयाणां भगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगस्तद् दोधकवृत्तं निगद्यते। तल्लक्षणं यथा छन्दोमञ्जर्याम् –

दोधकमिच्छति भत्रितयाद् गौ। ।

उदाहरणं यथा

देव ! सदोधकदम्बतलस्थ !
श्रीधर ! तावकनामपदं मे ।
कण्ठतलेऽसुविनिर्गमकाले
स्वल्पमपि क्षणमेष्यति योगम् ।।

अत्र प्रतिपादं क्रमेण त्रयाणां भगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगः । अतः पद्यमिदं दोधकवृत्तम् ।

५६.१९ *तोटकलक्षणम्*

यत्र प्रतिपादं क्रमेण चतुर्णां सगणानां प्रयोगो भवति तत् तोटकमिति निगद्यते। तल्लक्षणं यथा –

वद तोटकमब्धिसकारयुतम् ।

उदाहरणं यथा

मणिना वलयं वलयेन मणिः
मणिना वलयेन विभाति करः ।
कविना च विभुर्विभुना च कविः
कविना विभुना च विभाति सभा ।।

अत्र प्रतिपादं क्रमेण चतुर्णां सगणानां प्रयोगात् तोटकं नाम वृत्तम् ।

५६.२० *द्रुतविलम्बितलक्षणम्*

यत्र प्रतिपादं क्रमेण नगणस्य, भगणयोः, रगणस्य च प्रयोगो भवति तं द्रुतविलम्बितं कथयन्ति । तल्लक्षणं यथा –

द्रुतविलम्बितमाह नभौ भरौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदाहरणं यथा

सुतनु ! ते तनुते न गवेषणं
विरहितो रहितो दयया धवः ।
भज हृदा हृदयङ्गममाशरं
त्यज पुरा स्वधवीकृतमानवम् ।।

अत्र प्रतिपादं क्रमेण न-भ-भ-रगणानां प्रयोगाद् द्रुतविलम्बितं नाम वृत्तम्।

५६.२१ वंशस्थवृत्तलक्षणम्

यत्र प्रतिपादं क्रमेण ज-त-ज-रगणानां प्रयोगस्तद् वंशस्थविलमिति वृत्तमुदीर्यते । तल्लक्षणं यथा –

वदन्ति वंशस्थविलं जतौ जरौ ।

उदाहरणं यथा

वरं वनं व्याघ्रगजेन्द्रसेवितं
द्रुमालयं पक्वफलाम्बुभोजनम् ।
तृणानि शय्या रुचिरञ्च वल्कलं
न बन्धुमध्ये धनहीनजीवनम् ।।

अत्र प्रतिपादं क्रमेण जतजरगणानां प्रयोगः । अतोऽत्र वंशस्थविलं वृत्तम्।

५६.२२ वसन्ततिलकलक्षणम्

यत्र प्रतिपादं क्रमेण त-भ-ज-जगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगस्तद्वृत्तं वसन्ततिलकमिति समुदीर्यते । तल्लक्षणं यथा –

ज्ञेयं वसन्ततिलकं तभजा जगौ गः ।

उदाहरणं यथा

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात् पथः प्रविचलन्ति पदं न धीराः ।।

अत्र प्रतिपादं क्रमेण त-भ-ज-जगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगाद् वसन्ततिलकं वृत्तम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५६.२३ *मालिनीवृत्तस्य लक्षणम्*

यत्र प्रतिपादं क्रमेण न-न-म-य-यगणानां प्रयोगस्तद्वृत्तं मालिनीवृत्तमित्युच्यते । तल्लक्षणं यथा –

ननमयययुतेयं मालिनी भोगिलोकैः ।

उदाहरणं यथा

नरपतिहितकर्ता द्वेष्यतां याति लोके
जनपदहितकर्ता त्यज्यते पार्थिवेन्द्रैः ।
इति महति विरोधे वर्तमाने समाने
नृपतिजनपदानां दुर्लभः कार्यकर्ता ।।

अत्र प्रतिपादं क्रमेण न-न-म-य-यगणानां प्रयोगः, अष्टमे तदनु सप्तमे चाक्षरे विश्रामः । अतः पद्यमिदं मालिनीवृत्तस्योदाहरणम् ।

५६.२४ *मन्दाक्रान्तावृत्तस्य लक्षणम्*

यस्मिन् पद्ये प्रतिपादं क्रमेण म-भ-न-त-तगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगो भवति तद्वृत्तं मन्दाक्रान्तेति निगद्यते । तल्लक्षणं यथा –

मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ।

अत्र चतुर्थे, तदनु षष्ठे, तत्पश्चात्सप्तमे चाक्षरे यतिर्भवति ।

उदाहरणं यथा

मौनान्मूकः प्रवचनपटुर्जल्पको वातुलो वा
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः ।
धृष्टः पार्श्वे वसति च सदा दूरतश्चाप्रगल्भः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ।

अत्र प्रतिपादं क्रमेण म-भ-न-त-तगणानां द्वयोर्गुरुवर्णयोश्च प्रयोगः । चतुर्थे, तदनु षष्ठे, तत्पश्चात् सप्तमे चाक्षरे विश्रामः । अतः पद्यमिदं मन्दाक्रान्ताया उदाहरणम्।

५६.२५ *पृथ्वीवृत्तस्य लक्षणम्*

यस्य वृत्तस्य प्रतिपादं क्रमेण ज-स-ज-स-यगणानामेकस्य लघुवर्णस्यैकस्य च गुरुवर्णस्य च प्रयोगः, अष्टमे, तदनु नवमेचाक्षरे विश्रामस्तद्वृत्तं पृथ्वीति कथ्यते। तल्लक्षणं यथा –

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।

837961

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदाहरणं यथा

दुरन्तदनुजेश्वरप्रकरदुःस्थपृथ्वीभरं
जहार निजलीलया यदुकुलेऽवतीर्याशु यः ।
स एष जगतां पतिर्दुरितभारमस्मादृशां
हरिष्यति हरिः स्तुतिस्मरणचाटुभिस्तोषितः ।

अत्र प्रतिपादं क्रमेण ज-स-ज-स-यगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगः, अष्टमे तदनु नवमे चाक्षरे विश्रामः । अतः पद्यमिदं पृथ्वीवृत्तस्योदाहरणम् ।

५६.२६ *शिखरिणीवृत्तस्य लक्षणम्*

यत्र प्रतिपादं क्रमेण य-म-न-स-भगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगः, षष्ठे तदनु चैकादशेऽक्षरे विश्रामस्तद्वृत्तं शिखरिणीति निगद्यते। तल्लक्षणं यथा -

रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।

उदाहरणं यथा

नभो भूषा पूषा कमलवनभूषा मधुकरो
वचोभूषा सत्यं वरविभवभूषा वितरणम् ।
मनोभूषा मैत्री मधुसमयभूषा व्रततयः
सदोभूषा सूक्तिः सकलगणभूषा च विषयः ।

अत्र प्रतिपादं क्रमेण य-म-न-स-भगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगः, षष्ठे, तदनु चैकादशेऽक्षरे विश्रामः । अतः पद्यमिदं शिखरिणीवृत्तस्योदाहरणम् ।

५६.२७ *शार्दूलविक्रीडितलक्षणम्*

यत्र प्रतिपादं क्रमेण म-स-ज-स-त-तगणानामेकस्य गुरुवर्णस्य च प्रयोगस्तत् 'शार्दूलविक्रीडितम्' इति वृत्तं निगद्यते । तस्य लक्षणं यथा -

सूर्याश्वैर्मसजस्ततः सगुरवः शार्दूलविक्राडितम् ।

उदाहरणं यथा

शक्यो वारयितुं जलेन हुतभुक् छत्रेण सूर्यातपो
नागेन्द्रो निशिताङ्कुशेन समदो दण्डेन गोगर्दभौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्याधिर्भेषजसङ्ग्रहैश्च विविधैर्मन्त्रप्रयोगैर्विषं
सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्।

अत्र प्रतिपादं क्रमेण म-स-ज-स-त-तगणानामेकस्य गुरुवर्णस्य च प्रयोगः। प्रतिपादं द्वादशे, तदनु सप्तमे चाक्षरे विश्रामः । अतः पद्यमिदं शार्दूलविक्रीडित-वृत्तस्योदाहरणम् ।

५६.२८ स्रग्धरावृत्तलक्षणम्

यत्र प्रतिपादं क्रमेण म-र-भ-न-य-य-यगणानां प्रयोगः, प्रतिसप्ताक्षरञ्च विश्रामस्तद्वृत्तं स्रग्धरेति निगद्यते । तल्लक्षणं यथा -

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।

उदाहरणं यथा

भ्रातः कस्त्वं तमाखुर्गमनमिह कुतो वारिधेः पूर्वपारात्
कस्य त्वं दण्डधारी न हि तव विदितं श्रीकलेरेव राज्ञः ।
चातुर्वर्ण्यं विधात्रा विविधविरचितं ब्रह्मणा धर्महेतो-
रेकीकर्तुं बलात्तन्निखिलजगति रे शासनादागतोऽस्मि ।।

अत्र प्रतिपादं क्रमेण म-र-भ-न-य-य-यगणानां प्रयोगः, प्रतिसप्ताक्षरं विश्रामश्च। अतः पद्यमिदं स्रग्धरावृत्तस्योदाहरणम् ।

५६.२९ सुन्दरीवृत्तलक्षणम् → वियोगिनी वृत्तम्

यत्र प्रथमतृतीयपादयोः (अयुजोः) क्रमेण स-स-जगणानामेकस्य गुरुवर्णस्य, द्वितीयचतुर्थपादयोः (युजोः) स-भ-रगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगस्तद्वृत्तं सुन्दरी (वियोगिनी) इति निगद्यते । तल्लक्षणं यथा -

अयुजोर्यदि सौ जगौ युजोः, सभरा ल्गौ यदि सुन्दरी तदा

उदाहरणं यथा

यदवोचत वीक्ष्य मानिनी
परितः स्नेहमयेन चक्षुषा ।
अपि वागधिपस्य दुर्वचं
वचनं तद् विदधीत विस्मयम् ।।

अत्र प्रथमतृतीयपादयोः क्रगेण सगणद्वयस्य, जगणस्य, एकस्य गुरुवर्णस्य च प्रयोगः । द्वितीयचतुर्थपादयोश्च क्रमशः सभरगणानामेकस्य लघुवर्णस्यैकस्य गुरुवर्णस्य च प्रयोगः । अतः पद्यमिदं सुन्दरीवृत्तस्योदाहरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रश्नाः

१. सभेदं पद्यलक्षणं निरूपयत ।
२. जातिवृत्तयोः पार्थक्यं सोदाहरणं निर्दिशत ।
३. यतेर्लक्षणं विलिख्य गणप्रतीकान् निर्दिशत ।
४. भजसादिगणानां रेखासहितं सोदाहरणं परिचयं दत्त ।
५. आर्याऽनुष्टुभ्-रथोद्धता-शालिनी-स्वागता-तोटक-द्रुतविलम्बित-वंशस्थ-वसन्ततिलका-मालिनी-मन्दाक्रान्ता-पृथिवी-शिखरिणी-शार्दूलविक्रीडित-स्रग्धरा-सुन्दरीवृत्तानां सोदाहरणं लक्षणं प्रकाशयत ।
६. अधोलिखितवृत्तानि केषां छन्दसामुदाहरणानि ? सलक्षणं स्फुटीकुरुत ।

क) कुंदेशमासाद्य कुतोऽर्थसञ्चयः
कुपुत्रमासाद्य कुतो जलाञ्जलिः ।
कुगेहिनीं प्राप्य गृहे कुतः सुखं
कुशिष्यमध्यापयतः कुतो यशः ।।

ख) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परा देवता
विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः ।।

ग) ख्यातः शक्रो भगाङ्गो विधुरपि मलिनो माधवो गोपजातो
वेश्यापुत्रो वसिष्ठो रतिपतिरतनुः सर्वभक्षी हुताशः।
व्यासो मत्स्योदरीयो लवणजलनिधिः पाण्डवा जारजाताः
रुद्रः प्रेतास्थिधारी त्रिभुवनविषये कस्य दोषो न चास्ति ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सप्तपञ्चाशः पाठः

अलङ्कारपरिचयः

५७.१ *अलङ्कारसामान्यलक्षणम्*

अलङ्करोतीति व्युत्पत्याऽलङ्कारशब्दो निष्पद्यते । लोके यथा शरीराऽलङ्कृतिसाधनानि कटककुण्डलहारकेयूरादीनि वस्तूनि, अलङ्कारशब्देनाभिधीयन्ते तथैव काव्येष्वपि काव्यशरीरशोभातिशायिनोऽनुप्रासोपमादयोऽलङ्कारपदेन व्यवह्रियन्ते। यथा लोकेऽलङ्कृता जना उत्कृष्टा मन्यन्ते, तथैव अलङ्कारैः समन्वितानि काव्यान्यपि समुस्कृष्टानि मन्यन्ते सहृदयानां चेतश्चावर्जयन्ति । अलङ्कारस्य सामान्यलक्षणं यथाऽऽह दण्डी –

काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते ।

अलङ्कारवादिनां मतेऽलङ्काराः काव्यस्य स्थिरा धर्माः, ध्वनिवादिनां मते तु नास्ति तेषां स्थिरधर्मत्वम्, तदेवाह साहित्यदर्पणकारो विश्वनाथः –

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ।।

सर्वे काव्यशास्त्रिणः शब्दार्थौ शरीरं काव्यस्येति स्वीकुर्वन्ति । अलङ्काराश्च काव्यशरीरस्योत्कर्षाधायका इत्यत्र न कापि विप्रतिपत्तिः । अतः शब्दार्थयोरुत्कर्षाधायकत्वमलङ्कारत्वमिति अलङ्कारस्यास्ति सामान्यलक्षणम् ।

५७.२ *अलङ्कारमहत्त्वम्*

काव्येष्वलङ्काराणां महत्त्वमतीव गौरवमयं विद्यते । काव्यशास्त्रिषु केचन कथयन्ति यत् – अलङ्कारानन्तरेण काव्यस्य कल्पनम् तथैव निरर्थकं यथा उष्णतां विना वह्नेरस्तित्वस्य परिकल्पनम् । तथा चोक्तं जयदेवेन चन्द्रालोके –

अङ्गीकरोति यः काव्यं शब्दार्थावनलङ्कृती ।
असौ न मन्यते कस्मादनुष्णमनलं कृती ।।

एवमेव –

अलङ्कारविहीना तु विधवेव सरस्वती ।

अलङ्कारवादिनां मते काव्योत्कर्षाधायकं तत्त्वम्, अलङ्कारा एव। तेषां स्थितिः काव्येऽपरिहार्या भवति । ध्वनिवादिनस्त्वलङ्कारान् काव्यस्यास्थिरधर्मत्वेनाङ्गीकुर्वन्ति

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परं तेऽपि, अलङ्काराणां स्थितिं विच्छित्तिविशेषाधायकत्वेनैव स्वीकुर्वन्ति। यथाह मम्मटः -

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ।।

तेषां मते वाच्यतया स्थिता अलङ्काराः शब्दार्थद्वारा रसादीनुपकुर्वन्ति, व्यङ्ग्यतया प्रयुक्ता अलङ्कारास्तु काव्यस्यात्मरूपेण अलङ्कारध्वनिरित्याख्यया भवन्ति व्यवदेश्याः । अत काव्ये सौन्दर्योत्कर्षाधायकतयाऽलङ्काराणामस्तित्वं स्वीकुर्वन्ति विद्वांसः ।

५७.३ *अलङ्कारस्य भेदाः*

सामान्यतयाऽलङ्कारस्य त्रयो भेदाः सन्ति । शब्दालङ्काराः, अर्थालङ्काराः, उभयालङ्काराश्च । ये काव्यगतपदानां सौन्दर्यं वर्धयन्त काव्यात्मरूपेणावस्थितान् रसादीनप्युपकुर्वते, ते शब्दालङ्कारा निगद्यन्ते । ते च शब्दपरिवृत्यसहा भवन्ति ।

५७.४ *शब्दालङ्काराः*

लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन्
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि ।।

अत्र कुञ्जगुञ्जपुञ्जादिषु व्यञ्जनसाम्यमस्ति प्रयुक्तम्, वासन्तिकपवनस्य रतेरुद्दीपकतया शृङ्गारानुकूला वर्णाः सन्त्यत्र प्रयुक्ताः । अतोऽत्रानुप्रासालङ्कारः । कुञ्जगुञ्जादीनां परिवर्तनेऽनुप्रासाभावादत्र शब्दानां परिवृत्यसहत्वम् । एवमेव यमकादावपि बोध्यम् ।

५७.५ *अर्थालङ्काराः*

ये च पुनः काव्यात्मतत्त्वमुत्कर्षयन्तोऽर्थस्य सौन्दर्यं समेधयन्ति तेऽर्थालङ्काराः कथ्यन्ते । ते च शब्दपरिवृत्तिसहा भवन्ति ।

उदाहरणं यथा

हरस्तु किञ्चित्परिलुप्तधैर्य -
श्चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे
व्यापारयामास विलोचनानि ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र शिवस्योपमेयस्याम्बुराशिनोपमानेन सह सादृश्यवर्णनादुपमालङ्कारः, अत्रोपमानोपमेयसाधारणधर्मवाचकशब्दानां पर्यायशब्दोपादानेऽपि, उपमालङ्कारे न कापि क्षतिरिति शब्दपरिवृत्तिसहत्त्वमस्येति वेद्यम् । शब्दपरिवृत्तिसहत्वासहत्वे तूभयालङ्कारः ।

५७.६ *अर्थालङ्कारभेदाः*

अर्थालङ्काराश्च सप्तविधाः सन्ति –

सादृश्यमूलकाः –	उपमारूपकोत्प्रेक्षादयः ।
विरोधमूलकाः –	विरोधाभासविभावनादयः ।
शृङ्खलाबन्धमूलकाः –	कारणमाला–सारप्रभृतयः ।
तर्कन्यायमूलकौ –	काव्यालिङ्गम्, अनुमानञ्च ।
वाक्यन्यायमूलकाः –	यथासङ्ख्यादय : ।
लोकन्यायमूलकाः –	प्रत्यनीकप्रतीपादयः ।
गूढार्थप्रतीतिमूलकाः –	सूक्ष्मव्याजोक्तिप्रभृतयश्च ।

अनेन ज्ञायते यत्– अर्थालङ्काराणां सङ्ख्या शब्दालङ्कारापेक्षया भूयसी वर्तते।

५७.७ *अनुप्रासलक्षणम्*

स्वरस्य साम्ये वैषम्ये वा यत्र शब्दानां (व्यञ्जनवर्णानाम्) ऽऽवृत्तिर्भवति सोऽनुप्रासालङ्कारः । तल्लक्षणं यथा –

अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत् ।

उदाहरणं यथा – (स्वरसाम्ये)

लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन्
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि ।।

अत्र कुञ्जगुञ्जपुञ्जेत्यादौ स्वरसाम्यसहितं व्यञ्जनसाम्यं विद्यते । अतोऽनुप्रासालङ्कारस्योदाहरणमिदं पद्यम् । *स्वरवैषम्ये यथा –*

आदाय वकुलगन्धानन्धीकुर्वन् पदे पदे भ्रमरान् ।
अयमेति मन्दमन्दं कावेरीवारिपावन पवनः ।।

अत्र गन्धानन्धीत्यादौ स्वरस्य वैषम्येऽपि व्यञ्जनसाम्यादनुप्रासः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमकस्य सामान्यलक्षणम्

यत्र भिन्नार्थस्य स्वरव्यञ्जनसमूहस्य एकेनैव क्रमेणावृत्तिर्भवति तत्र यमकालङ्कारः। तल्लक्षणं यथाह विश्वनाथः –

सत्यर्थे पृथगर्थायाः स्वरव्यञ्जनसंहतेः
क्रमेण तेनैवावृत्तिर्यमकं विनिगद्यते ।

अत्र द्वयोरपि पदयोः क्वचित्सार्थकत्वम्, क्वचिन्निरर्थकत्वम्, क्वचिदेकस्य सार्थकत्वमपरस्य निरर्थकत्वम् ।

उदाहरणं यथा

नवपलाशपलाशवनं पुरः स्फुटपरागपरागतपङ्कजम्
मृदुलतान्तलतान्तमलोकयत् स सुरभिं सुरभिं सुमनोभरैः ।

अत्र पलाश–पराग–लतान्त–सुरभिशब्दानां तेनैव क्रमेणावृत्तेर्यमकालङ्कारः। 'पलाश–पालश' इत्यत्र, सुरभिं सुरभिमित्यत्र च द्वयोरेव पदयोः सार्थकत्वम् । लतान्त–लतान्त इत्यत्र प्रथमस्य, पराग–पराग इत्यत्र च द्वितीयस्य निरर्थकत्वम् ।

श्लेषालङ्कारलक्षणम्

यत्र श्लिष्टैः पदैरनेकार्थानामभिधानं भवति तत्र श्लेषालङ्कारः । तल्लक्षणं यथाऽऽह विश्वनाथः :–

श्लिष्टैः पदैरनेकार्थाभिधाने श्लेष इष्यते ।

उदाहरणं यथा

प्रावृषं शरदञ्चापि बहुधाकाशहारिणीम्
विलोक्य नोत्सुकः कः स्यान्नरो नीरजसङ्गताम् ।

अत्र बहुधाकाशहारिणीम् नीरजसङ्गताम्; इति पदद्वयेन शरदो वर्षर्तोश्च वैशिष्ट्यरूपार्थद्वयबोधनात् श्लेषालङ्कारः । शरद् बहुधा आकाशमनोहरा, कमलयुता भवति, वर्षास्तु प्रायः काशपुष्पैर्मनोहराः, धूलिशून्याश्च । इत्थमेकेनैव शब्देनार्थद्वयाभिधानात् श्लेषः।

उपमालङ्कारस्वरूपम्

अयमर्थालङ्कारः । अत्रोपमेयस्योपमानेन सह सादृश्यं वर्ण्यते । उपमानम्, उपमेयः, साधारणधर्मः, सादृश्यवाचकशब्दश्चेति, उपमायां चत्वारि तत्त्वानि। तेषु सर्वेषामुपादाने पूर्णोपमा, एकस्य, द्वयोः, त्रयाणां वानुपादाने लुप्तोपमा। उपमीयते–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऽनयेति उपमाशब्दस्य व्युत्पत्तिः । सादृश्यमूलकोऽयमलङ्कारः ।

उपमायाः सामान्यलक्षणम्

यत्रोपमेयस्योपमानेन प्रत्ययाव्ययतुल्यार्थसमासैः सादृश्यं वर्ण्यते सोपमेति निगद्यते। तल्लक्षणं यथाऽऽह वाग्भटः –

उपमानेन सादृश्यमुपमेयस्य यत्र सा
प्रत्ययाव्ययतुल्यार्थसमासैरुपमा मता ।

उदाहरणानि यथा

गत्या विभ्रममन्दया प्रतिपदं या राजहंसायते
यस्याः पूर्णमृगाङ्कमण्डलमिव श्रीमत्सदैवाननम् ।
यस्याश्चानुकरोति नेत्रयुगलं नीलोत्पलानि श्रिया
तां कुन्दाग्रदतीं त्यजन् जिनपती राजिमतीं पातु वः ।।

अत्र चत्वार उपमालङ्काराः । तत्र 'राजहंसायते' इत्यत्र क्यङ्प्रत्ययेन, उपमेयभूताया राजिमत्या उपमानरूपिण्या राजहंस्या सह सादृश्यं वर्णितम् । द्वितीये पादे राजिमत्या आननस्योपमेयस्य मृगाङ्कमण्डलेनोपमानेन सह, इवेत्यव्ययपदेन सादृश्यमस्ति निरूपितम् । तृतीये च पादे 'अनुकरोति' इति तुल्यार्थबोधकपदेन नेत्रयुगलस्योपमेयस्य नीलोत्पलैरुपमानैः साम्यं प्रकाशितम्, कुन्दाग्रदतीमित्यत्र च कुन्दस्य अग्रा इव दन्ता यस्या इति विग्रहे समासेन दन्तानां कुन्दाग्रैः सादृश्यं विद्यते प्रतिपादितम् ।

इयञ्चोपमा द्विविधा – पूर्णा लुप्ता च । यत्र उपमानोपमेयसाधारणधर्मवाचकपदानामुपादानं तत्र पूर्णा । यथा –

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।

अत्र पार्वतीपरमेश्वरयोः(उपमेययोः) वागर्थाभ्यां(उपमानाभ्यां) संपृक्तत्वरूपसाधारणधर्मेण सादृश्यवर्णनादुपमालङ्कारः । तथा चात्र पार्वतीपरमेश्वरौ इत्युपमेयपदम् । 'वागर्थौ' इत्युपमानबोधकशब्दः । संपृक्तत्वञ्च साधारणधर्मः, इवेति पदञ्चात्र सादृश्यवाचकशब्दः। इत्थमत्रोपमानोपमेयसाधारणधर्मसादृश्यवाचकपदानां चतुर्णामप्युपादानात्पूर्णोपमालङ्कारः ।

यत्र च पुनः उपमानोपमेयसाधारणधर्मसादृश्यवाचकपदानां मध्ये एकस्य,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द्वयोः, त्रयाणां वाऽनुपादानन्तत्र लुप्तोपमालङ्कारः । यथा -

गजेन्द्रगमना श्यामा कोमला कोकिलस्वनाः ।
हंसवाणीप्रिया सेयं राजते मृगलोचना ।।

अत्र 'गजेन्द्रस्य गमनमिव मन्दं गमनं यस्याः सा गजेन्द्रगमना, कोकिलस्य स्वन इव मधुरः स्वनो यस्याः सा कोकिलस्वना, हंसस्य वाणीव मधुरा वाणी यस्याः सा, हंसवाणी, मृगस्य लोचने इव चञ्चले लोचने यस्याः सा मृगलोचना' इत्यत्र समासे प्रत्येकमुपमानसाधारणधर्मसादृश्यवाचकपदानां लोपाल्लुप्तोपमा-लङ्कारः। एकस्यैवोपमेयस्यानेकोपमानत्वे तु मालोपमालङ्कारः ।

५७.१२ उत्प्रेक्षालङ्कारस्य सामान्यलक्षणम् २०६८

यत्र प्रकृतस्य (वर्णनीयस्य, उपमेयस्य) समेन (अवर्णनीयेन, उपमानेन) यत् संभावनम्, तदेवोत्प्रेक्षालङ्कार इत्युच्यते । तल्लक्षणं यथाऽऽह दण्डी-

संभावनमथोत्प्रेक्षा प्रकृतस्य समेन यत् ।

उदाहरणं यथा

पिनष्टीव तरङ्गाग्रैः समुद्रः फेनचन्दनम् ।
तदादाय करैरिन्दुर्लिम्पतीव दिगङ्गनाः ।।

अत्र वर्णनीयस्य तरङ्गाग्रकृतप्रेरणस्यावर्णनीयेन फेनचन्दनपेषणरूपेण संभावनादुत्प्रेक्षालङ्कारः । तथैव द्वितीयार्धे चन्द्रकिरणव्यापनस्य वर्णनीयस्य चन्द्रकृतदिगङ्गनालेपनकर्मत्वेन संभावनादुत्प्रेक्षालङ्कारः । उत्प्रेक्षावाचकाः शब्दास्तु -

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः ।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ।

५७.१३ रूपकालङ्कारलक्षणम् ९०

यत्रोपमानोपमेययोरभेदारोपस्तत्र रूपकालङ्कारः । तल्लक्षणं यथाह - मम्मटः-

तद्रूपकमभेदो य उपमानोपमेययोः

उदाहरणं यथा

निशया धवलीकुर्वन् नुर्वी सकुलपर्वताम् ।
निशाविलासकमलमुदेति स्म निशाकरः ।।

अत्रोपमेयोपमानयोर्निशाकरनिशाविलासकमलयोरभेदारोपाद् रूपकालङ्कारः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

५७.१४ *अतिशयोक्त्यलङ्कारस्य सामान्यलक्षणम्*

यत्र वर्णनीयस्य वस्तुन उत्कर्षं प्रतिपादयितुं लोकातिक्रान्ततया वर्णनम्, तत्रातिशयोक्त्यलङ्कारः, तल्लक्षणं यथाह उद्भटः –

निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम् ।
मन्वतेऽतिशयोक्तिं तामलङ्कारतया बुधाः ।।

तत्र लोकातिक्रान्तत्वञ्च चतुर्विधम्, मम्मटेन विद्यते वर्णितम् ।

यत्रोपमेयं (वर्णनीयविषयं) निगीर्य तदभेदत्वेनोपमानस्य (विषयिणः) वर्णनं भवति तत् प्रथमम् ।

उदाहरणं यथा

कमलमनम्भसि कमले च कुवलये तानि च कनकलतिकायाम्।
सा च सुकुमारसुभगेत्युत्पातपरम्परा केयम् ।।

कश्चित् स्वप्रियां निरीक्ष्य तस्याः सखीं प्रति कथयति- कमलमिति । अत्र मुखादीनामुपमेयानां निगरणं विधाय तेषामभेदतयोपमानरूपाणां कमलादीनां वर्णनादतिशयोक्त्यलङ्कारः ।

यत्रोपमेय एव तद्भिन्नतया वर्ण्यते, तद् द्वितीयं लोकातिक्रान्तत्वम् ।

उदाहरणं यथा

अन्यदेवाङ्गलावण्यमन्याः सौरभसंपदः ।
अस्याः पद्मपलाशाक्ष्याः सरसत्वमलौकिकम् ।।

अन्यासु नायिकासु यज्जातीयं लावण्यादिकं तस्यामपि तज्जातीयमेव लावण्यादिकं वर्तते । परन्तु पद्येऽस्मिन् वर्णनीयस्य लावण्यादेस्तद्भिन्नतया वर्णनादतिशयोक्तिः ।

यत्र चेदर्थबोधकैः पदैरसंभवार्थस्य कल्पनन्तत्र तृतीयं लोकातिक्रान्तत्वम्।

उदाहरणं यथा

यदि स्यान्मण्डले सक्तमिन्दोरिन्दिवरद्वयम् ।
तदोपमीयते तस्या वदनं चारुलोचनम् ।।

अत्र यद्यर्थबलेन विषयस्योत्कर्षं प्रतिपादयितुमसंभवस्य इन्दोर्मण्डले कमलद्वयसंयोगरूपस्योपमानस्य कल्पनादतिशयोक्तिः ।

यत्र कारणस्य क्षिप्रकारित्वं वक्तुं कारणात्पूर्वं समकालमेव वा कार्यं वर्ण्यते तत्र चतुर्थं लोकातिक्रान्तत्वम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदाहरणं यथा

अग्रे मानो गतः पश्चादनुनीता प्रियेण सा ।

अथवा

आलिङ्गन्ति समं देव ! ज्यां शराश्च पराश्च ते ।

अत्र प्रथमे नायिकामानगमनरूपकार्यस्य नायकानुनयनरूपकारणाद् पूर्वमेव सिद्धकार्यकारणवैपरीत्येन वर्णनादतिशयोक्तिः । द्वितीये च पृथिव्यां शरपतन-शत्रुपतनयोः कार्यकारणयोः समकालिकत्वेन वर्णनादतिशयोक्त्यलङ्कारः ।

५७.१५ *अपह्नुत्यलङ्कारलक्षणम्*

यत्र प्रकृतं (वर्णनीयम्, उपमेयम्) निषिध्य अन्यस्य (अप्रकृतस्य, अवर्णनीयस्य, उपमानस्य) स्थापनं विधीयते तत्रापह्नुत्यलङ्कारः । तल्लक्षणं यथा-

प्रकृतं प्रतिषिध्यान्यत्स्थापनं स्यादपह्नुतिः ।

उदाहरणं यथा

नेदं नभोमण्डलमम्बुराशि-
नैताश्च तारा नवफेनभङ्गाः ।
नायं शशी कुण्डलीतः फणीन्द्रो
नासौ कलङ्कः शयितो मुरारिः ।।

अत्र प्रथमपादे प्रकृतं नभोमण्डलं निषिध्याप्रकृतस्याम्बुराशेः स्थापनम्, द्वितीये पादे वर्णनीयास्ताराः प्रतिषिध्यावर्णनीयस्य नवफेनभङ्गस्य स्थापनम्, तृतीये पादे प्रस्तुतं शशिनं निषिध्य फणीन्द्रस्य स्थापनम्, चतुर्थे च पादे कलङ्कं प्रतिषिध्य शयानस्य मुरारेः स्थापनम् । अतः पद्येऽस्मिन् वर्णनीयविषयान् निषिध्यावर्णनीयविषयाणां स्थापनादपह्नुत्यलङ्कारः।

५७.१६ *दीपकालङ्कारलक्षणम्*

यत्र प्रस्तुतस्य (वर्णनीयस्य) अप्रस्तुतस्य (अवर्णनीयस्य) चार्थस्यैकधर्मेण क्रियैकेन वा सम्बन्धो वर्ण्यते तत्र दीपकालङ्कारः । यद्येकं कारकमनेकक्रियान्वितं भवति तत्राप्ययमेवालङ्कारः । तल्लक्षणं यथा -

अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते ।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ।।

अत्र प्रस्तुत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदाहरणं यथा

बलावलेपादधुनापि पूर्ववत्
प्रबाध्यते तेन जगज्जिगीषुणा ।
सती च योषित् प्रकृतिश्च निश्चला
पुमांसमभ्येति भवान्तरेष्वपि ।।

अत्र प्राकरणिकनिश्चलप्रकृतेरप्राकरणिकसत्या योषितश्च प्रतिजन्म पुरुषानुसरण-रूपधर्मैकसम्बन्धाद् दीपकालङ्कारः । यदि कारकमेकमनेकासु क्रियासु समन्वेति तत्रापि दीपकालङ्कारः ।

उदाहरणं यथा

नृत्यन्ति जल्पन्ति हसन्ति रामाः
क्रीडन्ति गायन्ति चरन्ति वामाः ।
दीव्यन्ति दिव्यैः कुतुकैश्च दिव्याः
लङ्कागृहाट्टालकमाश्रयन्त्यः ।।

अत्र प्रथमपादे 'रामाः' इति कर्तृकारकेण नर्तनजल्पनहसनक्रियाणाम्, द्वितीये च पादे 'वामाः' इति कर्तृकारकेण क्रीडन-गान-चरणक्रियाणामन्वयाद् दीपकालङ्कारः।

५७.१७ *समासोक्त्यलङ्कारलक्षणम्*

यत्र प्रस्तुते (वर्णनीये) विषयेऽप्रस्तुतविषयस्य (अवर्णनीयस्य) व्यवहार-समारोपस्तत्र समासोक्त्यलङ्कारः । तल्लक्षणं यथा -

समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य यत् ।

उदाहरणं यथा

ललिततरतरङ्गै रत्नभूषां गृहीत्वा
पतिरपि सरितां कं दर्पचिह्नं दधानः ।
प्रसरति तटिनीनां सङ्गमायेव तासां
मुखरसमपि लेढुं तत्र लङ्कागतानाम् ।।

अत्र नदीसमुद्रसङ्गमवर्णनेन प्रस्तुतार्थेनाप्रस्तुतस्य नायिकानायकसङ्गम-व्यवहारप्रतीतेः समासोक्त्यलङ्कारः ।

५७.१८ *दृष्टान्तालङ्कारस्य सामान्यलक्षणम्*

यत्र भिन्नवाक्यगतयोः समानधर्मयोर्भिन्नधर्मयोर्वा प्रकृताप्रकृतविषययोर्विम्ब-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रतिविम्बभावस्तत्र दृष्टान्तालङ्कारः । तल्लक्षणं यथा

चेद् विम्बप्रतिविम्बत्वं दृष्टान्तस्तदलङ्कृतिः ।

उदाहरणं यथा

त्वमेव कीर्तिमान् राजन् विधुरेव हि कान्तिमान् ।

अत्र भिन्नधर्मयोः (कीर्ति–कान्तिमतोः) नृपचन्द्रयोः प्रकृताप्रकृतयोर्विम्ब-प्रतिविम्बभावाद् दृष्टान्तालङ्कारः ।

५७.१९ *स्वभावोक्त्यलङ्कारलक्षणम्*

यत्र शिशुपशुपक्षिप्रभृतीनां स्वभावस्य वर्णनं विधीयते तत्र स्वभावोक्त्यलङ्कारः। तल्लक्षणं यथा –

स्वभावोक्तिस्तु डिम्भादेः स्वक्रियारूपवर्णनम् ।

उदाहरणं यथा

ग्रीवाभङ्गाभिरामं मुहुरनुपतति स्यन्दने दत्तदृष्टिः
पश्चार्धेन प्रविष्टः शरपतनभयाद् भूयसा पूर्वकायम् ।
शष्पैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा
पश्योदग्रप्लुतत्वाद् वियति बहुतरं स्तोकमुर्व्यां प्रयाति ।।

अत्र भयेनोत्प्लुत्य धावतो मृगस्य स्वभावोऽस्ति वर्णितः । अतः स्वभावो-त्त्यलङ्कारः।

५७.२० *अर्थान्तरन्यासस्य सामान्यलक्षणम्*

यत्र सामान्यार्थो विशेषार्थेन, विशेषार्थश्च सामान्यार्थेन समर्थ्यते तत्रार्थान्तर-न्यासालङ्कारः । तल्लक्षणं यथा –

उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः ।

उदाहरणं यथा

हनुमानब्धिमतरद्दुष्करं किं महात्मनाम् ।

अत्र विशेषार्थस्य सामान्यार्थेन समर्थनादर्थान्तरन्यासः । सामान्यस्यार्थस्य विशेषार्थेन समर्थनस्योदाहरणं यथा –

गुणवद्वस्तु संसर्गाद्याति स्वल्पोऽपि गौरवम् ।
पुष्पमालानुषङ्गेण सूत्रं शिरसि धार्यते ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्र पूर्वार्धे वर्णितस्य सामान्यार्थस्योत्तरार्धे वर्णितेन विशेषार्थेन समर्थनादर्थान्तरन्यासः ।

५७.२१ *परिसङ्ख्यालङ्कारस्य लक्षणम्*

यत्रैकस्मिन् कस्यापि विषयस्यास्तित्वं निराकृत्यापरस्मिन् तत् स्थाप्यते तत्र परिसङ्ख्यालङ्कारः । तल्लक्षणं यथा –

परिसङ्ख्या निषिध्यैकमेकस्मिन् वस्तुयन्त्रणम् ।

५७.२२ *परिसङ्ख्याभेदाः*

इयञ्च परिसङ्ख्या द्विविधा – शुद्धा, प्रश्नपूर्विका च । पुनः सा द्विविधा- शाब्दी आर्थी च । इत्थमियं चतुर्विधा ।

शुद्धायाः शाब्द्या उदाहरणं यथा

स्नेहक्षयः प्रदीपेषु न स्वान्तेषु नतभ्रुवाम् ।

अत्र स्नेहक्षयशब्दः श्लिष्टः, तैलभावप्रेमनाशरूपद्वयार्थावगतेः । तथा चात्र स्नेहक्षयस्य (प्रेमाभावस्य) अस्तित्वं कामिनीषु निराकृत्य तस्य (तैलाभावस्य) अस्तित्वं प्रदीपेषु स्थापितम्। अत्र प्रश्नाभावात् शुद्धा, नशब्दस्योपादानाच्च शाब्दी।

५७.२३ *विरोधाभासस्य सामान्यलक्षणम्* ६०

यत्रापाततो विरोधः प्रतीयते, कृते चानुशीलने पश्चाद् विरोधस्य परिहारो भवति, स विरोधाभासालङ्कारः । तल्लक्षणं यथा –

आभासत्वे विरोधस्य विरोधाभास इष्यते ।

उदाहरणं यथा

सदूषणापि निर्दोषा सखराऽपि सुकोमला ।
नमस्तस्मै कृता येन रम्या रामायणी कथा ।।

अत्र आपाततः श्रवणे सदूषणाः= दोषयुक्ताऽपि, निर्दोषा= दोषरहिता, सखरा= सरुक्षाऽपि, सुकोमला = मृदुलेति विरोधः प्रतीयते । अनुशीलने तु खरदूषणयोः राक्षसयोः प्रतीतेर्विरोधपरिहारः । अतोऽत्र विरोधाभासालङ्कारः ।

५७.२४ *संसृष्ट्यलङ्कारलक्षणम्*

यत्र परस्परं निरपेक्षतयाऽलङ्काराणां मिश्रणं भवति, तत्र तिलतण्डुलन्यायेन संसृष्टिरित्यलङ्कारः । तल्लक्षणं यथा –

मिथोऽनपेक्षयैतेषां स्थितिः संसृष्टिरुच्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदाहरणं यथा –

> देवः पायादपायान्नः स्मेरेन्दीवरलोचनः ।
> संसारध्वान्तविध्वंसहंसः कान्तिनिषूदनः ।।

अत्र पूर्वार्धे पायादपायादित्यत्र यमकम्, संसार इत्यादौ सकारधकारयोरावृत्तेरनुप्रासः। इत्थञ्चात्र तयोः संसृष्टिः । द्वितीये पादे इन्दिवरे इव लोचने यस्य स इति उपमालङ्कारः । द्वितीयार्धे च कृष्णस्य हंसत्वेनाभेदारोपाद् रूपकम् । इत्थञ्चात्रोपमारूपकयोरर्थालङ्कारयोः संसृष्टिः ।

सङ्करालङ्कारभेदाः

यत्र परस्परमङ्गाङ्गिभावतया, एकाश्रयतया, सन्दिग्धतया चालङ्काराणां नीरक्षीरन्यायेन सम्मिश्रणं भवति तत्र सङ्करालङ्कारः । तल्लक्षणं यथा –

> अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ ।
> सन्दिग्धे च भवति सङ्करस्त्रिविधः पुनः ।।

अङ्गाङ्गिभावसङ्करालङ्कारः

यत्र द्वयोर्बहूनां वाऽलङ्काराणां परस्परमङ्गाङ्गिभावस्तत्र, अङ्गाङ्गिभावसङ्करो भवति। यथा –

> अनुरागवती सन्ध्या दिवसस्तत्पुरसरः ।
> अहो दैवगतिश्चित्रा तथापि न समागमः ।।

अत्र समासोक्तिः विशेषोक्तेरङ्गतयाऽङ्गाङ्गिभावसङ्करः ।

एकाश्रयानुप्रवेशसङ्करालङ्कारः

यत्रैकस्मिन्नेवाश्रयेऽलङ्कारा मिश्रिता भवन्ति तथाविधोऽलङ्कार एकाश्रयानुप्रवेशसङ्कर इत्युच्यते । यथा –

> स्पष्टोल्लत्किरणकेशरसूर्यविम्ब –
> विस्तीर्णकर्णिकमथो दिवसारविन्दम् ।
> श्लिष्टाष्टदिग्दलकलापमुखावतार-
> बद्धान्धकारमधुपावलिः सञ्चुकोच ।।

अत्र 'किरणकेशर' 'सूर्यविम्बविस्तीर्णकर्णिक' इत्यत्र रूपकस्यानुप्रासस्य चैकाश्रयानुप्रवेशतया सङ्करः ।

सन्देहसङ्करालङ्कारः

यत्रानेकालङ्काराणां सन्देहो भवति तत्र सन्देहसङ्करो भवति । यथा–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नयनानन्ददायिन्या विम्बमेतत्प्रसीदति ।
अधुनापि विरुद्धाशमवशीर्णमिदन्तमः ।।

अत्र मुखस्य विम्बत्वेनाध्यवसानात् किमतिशयोक्त्यलङ्कारः, यद्वा एतदिति पदेन मुखरूपमुपमेयं निर्दिश्य विम्बारोपाद् रूपकम्, अथवा मुखचन्द्रयोः प्रस्तुतयोः प्रसीदतीति क्रियैकसम्बन्धाद् दीपकम्, किं वा उभयोरेव वर्णनीयतया प्रसाद-क्रियैकसम्बन्धात् तुल्ययोगिता, इत्यनेकालङ्काराणां सन्दिग्धत्वेन सन्देहसङ्क-रालङ्कारः।

५७.२६ *निम्नप्रश्नानामुत्तराणि लिखत ।*

१. अलङ्कारस्य लक्षणं सोदाहरणं प्रकाशयत ।
२. अलङ्कारस्य भेदान् निर्दिशत ।
३. शब्दार्थालङ्कारयोः पार्थक्यं सोदाहरणं प्रदर्शयत ।
४. अलङ्कारस्य महत्त्वं निरूपयत ।
५. उपमा-रूपकोत्प्रेक्षा-समासोक्ति-दृष्टान्त-विरोधाभासातिशयोक्ति-स्वभावोक्त्य-लङ्काराणां लक्षणानि सोदाहरणं प्रदर्शयत ।
६. उपमारूपकयोरुत्प्रेक्षारूपकयोश्च पार्थक्यं सोदाहरणं निर्दिशत ।
७. परिसङ्ख्यालङ्कारस्य लक्षणं सभेदं निरूपयत ।
८. संसृष्टिसङ्करालङ्कारयोः पार्थक्ये बीजं सोदाहरणं प्रदर्शयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पाठ्यक्रमः

पाठ्यांशसङ्केतः - अ.सं. १०२

पाठ्यांशनाम - संस्कृतरचना

पाठ्यांशपरिचयः

अत्रोत्तरमध्यमस्तरे संस्कृतवाङ्मयध्येतुकामानां छात्राणां लिङ्गानुशासन-रूपावलिवाक्यरचनानिबन्धप्रणयनच्छन्दोलङ्कारलक्षणोदाहरणनीतिकथाद्याः संस्कृतभाषाशिक्षणोपयोगिनो व्युत्पत्याधायकाश्च विषयाः सन्निविष्टाः सन्ति ।

पाठ्यांशसामान्योद्देश्यम्

संस्कृतभाषाप्रयोगकौशलार्जनम्, तन्निबद्धकृतीनामध्ययन-सामर्थ्य-सम्पादनञ्च ।

पाठ्यांशविशिष्टोद्देश्यम्

अस्य पाठ्यांशस्याध्ययनेनच्छात्रा अधो निर्दिष्टविषयेषु क्षमा भविष्यन्ति-

१. वाक्याधारभूतानां नामपदानां लिङ्गव्यवस्थाया ज्ञाने,
२. सुबन्तपदानां रूपावलिज्ञाने,
३. तिङन्तपदानां रूपावबोधे,
४. संस्कृतवाक्यरचनायाम्,
५. निबन्धलेखने,
६. सरलसंस्कृतनिबद्धग्रन्थानां स्वयमेवाध्ययने,
७. संस्कृतकृतिषु प्रयुक्तानां कृत्तद्धितशब्दानां व्युत्पादने,
८. समस्तपदानां समासप्रक्रियाज्ञानपुरःसरं विग्रहप्रदर्शने व्यस्तानाञ्च पदानां समसने,
९. प्रसिद्धवृत्तानां स्वरूपपरिज्ञाने,
१०. संस्कृतवाङ्मयेषु प्रयुक्तानां प्रमुखालङ्काराणां लक्षणज्ञाने च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकरणविभागः

प्रकरणानि	पाठ्यांशविषयाः	पाठाः	अङ्काः
क	नामलिङ्गव्यवस्था रूपावलिश्च	३६	२०
ख	वाक्यरचना	४५	२५
ग	निबन्धरचना	१८	१०
घ	बोधो व्युत्पत्तिश्च	३६	२०
ङ	वृत्तपरिचयः	१८	१०
च	अलङ्कारपरिचयः	२७	१५
योगः		१८०	१००

पाठ्यवस्तुविवरणम्

क) प्रकरणे

<u>नामलिङ्गव्यवस्था रूपावलिश्च</u>

तत्र वाक्याधारभूतानां सुबन्तपदानां लिङ्गव्यवस्थावबोधाय निम्न-सूत्राणां सापवादानां सोदाहरणमध्ययनम् ।

१. नामलिङ्गव्यवस्था

स्त्र्यधिकारे - ऋकारान्ता मातृदुहितृस्वसृयातृननान्दरः, अन्यू-प्रत्ययान्तो धातुः, मिन्यन्तः, क्तिन्नन्तः, ईकारान्तश्च, ऊङाबन्तश्च, य्वन्तमे-काक्षरम्, विंशत्यादिरानवतेः, तलन्तः, भाःस्रुव-स्रग्दिगुष्णिगुपानहः ।

पुमधिकारे - घञबन्तः, घाजन्तश्च, भयलिङ्गभगपदानि नपुंसके, नङन्तः, क्यन्तो घुः, त्रिविष्टपत्रिभुवने नपुंसके, द्यौः स्त्रियाम्, ऋतुपुरुष-कपोलगुल्फमेघाभिधानानि, अभ्रं नपुंसकम्, उकारान्तः, धेनुरज्जुकुहुसर-युतनुरेणुप्रियङ्गवः स्त्रियाम्, रुत्वन्तः, दारुकशेरुजतुवस्तुमस्तूनि नपुंसके च, कोपधः, चिबुकादीनि नपुंसके, टोपधः, किरीटादीनि नपुंसके च, णोपधः, ऋणलवणपर्णतोरणोष्णानि नपुंसके, थोपधः, नोपधः, जघनादीनि नपुंसके, पोपधः, पापादीनि नपुंसके, मोपधः, संग्रामादीनि नपुंसके च, योपधः, किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके, गोमयकषायमलयान्व-याव्ययानि नपुंसके च, रोपधः, द्वारादीनि नपुंसके, षोपधः, शिरीषादीनि नपुंसके, सोपधः, पनसबिसबुससाहसानि नपुंसके, चमसादीनि नपुंसके च, रश्मिदिवाभिधानानि, मानाभिधानानि, खारीमानिके स्त्रियाम्, दाराक्ष-तलाजासूनां बहुत्वं च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नपुंसकाधिकारे – भावे ल्युडन्तः, निष्ठा च, त्वष्यञौ तद्धितौ, यद्यढग्यगञण्वुञ्छाश्च, द्वन्द्वैकत्वम्, मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनान्नाभिधानानि, शतादिःसंख्या, असन्तो द्व्यच्कः, त्रन्नन्तः।

अवशिष्टलिङ्गे – अव्ययं कतियुष्मदस्मदः, ष्णान्ता संख्या, गुणवचनम्, कृत्याश्च, करणाधिकरणयोर्ल्युट् च, सर्वादीनि सर्वनामानि ।

२. **रूपावलिः**

सुबन्तेषु अजन्तानाम् – कृष्ण–फल–सर्व–प्रथम–द्वितीयान्यतरकतमरमाहरिसखि–द्वि–दधि–त्रि–सुधी–नदी–स्त्री–सानु–भानु–भू– नृ–धातृ–पितृ–मातृ–गो–नौशब्दानां तत्तुल्यानाञ्चान्येषां शब्दानां रूपाणां ज्ञानम् ।

सुबन्तेषु हलन्तानाम् – वणिज्–भवत्–यावत्–गच्छत्–ब्रह्मन्–सीमन्–कर्मन्–राजन्–युवन्–पथिन्–अहन्–पञ्चन्–अष्टन्–दण्डिन्–अप्–गिर्–दिश्–दिव्–षष्–चतुर्–वेधस्–विद्वस्–मनस्–युष्मदस्मद्–किम्–तदेतदिदमदस्–यच्छब्दानां तत्तुल्यानामन्येषाञ्च शब्दानां रूपाणां बोधः।

ण्यन्तसहितानां धातूनाम् – भू–वृधु–हन्–शीङ्–दृ–दा–दिवु–जनी–तुद–रुध–कृ–क्री– धातूनां रूपाणां ज्ञानम् (वाक्यरचनायामत्यपेक्षितानां लट्–लृट्–लोट्–लङ्–लिङ्लुङ्लकारेषु निष्पन्नानां तेषां विशेषेणाभ्यासः) ।

ख) प्रकरणे

वाक्यरचना

वाक्यपरिचयः, वाक्यावयवाः, वाक्यभेदाः, ससम्बन्धकारक–नियमानुसारेण वाक्यरचनाभ्यासः, अनुच्छेदलेखनाभ्यासः ।

वाक्यपरिवर्तनम् – वचनपुरुषकालानुसारेण वाक्यानां मिथः परिवर्तनम्, वाच्यपरिवर्तनम्, रचनादृष्ट्या वाक्यानां परस्परं परिवर्तनम्, अर्थानुसारेण वाक्यानां मिथः परिवर्तनम्, वाक्यसंश्लेषणम्, वाक्य–विश्लेषणम्, विस्तृतस्यांशस्य सङ्क्षेपेण सङ्क्षिप्तस्य च विस्तरेण लेखनम्।

ग) प्रकरणे

निबन्धरचना

निबन्धस्य लक्षणम्, निबन्धस्य प्रकाराः, निबन्धावयवाः, निबन्धलेखनविधिः, निबन्धरचनाभ्यासः ।

घ) प्रकरणे

बोधो व्युत्पत्तिश्च

पञ्चतन्त्रान्तर्गतयोः सपद्ययोर्मित्रभेदस्थप्रथमद्वितीयकथयोः (संस्कृतरचना–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशे सङ्ग्रहीतयोः) विग्रहप्रकृतिप्रत्ययविभागपर्यायभावार्थप्रदर्शनपूर्वकं व्याख्यानम्।

संस्कृत-भाषावबोधशक्तेरभिवृद्धयेऽदृष्टांशानामपि प्रश्नोत्तरविग्रहपर्याय-भावार्थप्रदर्शनाभ्यासः।

ङ) प्रकरणे

वृत्तपरिचयः

पद्यस्य लक्षणम्, पद्यभेदाः, जातिवृत्तयोर्भेदः, मात्रापरिचयः, वृत्तभेदाः, गणप्रतीकाः, गुरुलघुसिद्धान्तः, यतेर्लक्षणम्।

आर्या, अनुष्टुभ्, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजातिः, शालिनी, मालिनी, रथोद्धता, स्वागता, दोधकम्, वसन्ततिलका, वंशस्थविलम्, तोटकम्, द्रुतविलम्बितम्, मन्दाक्रान्ता, पृथ्वी, शिखरिणी, शार्दूल-विक्रीडितम्, स्रग्धरा, सुन्दरी – इत्येतेषां वृत्तानां सोदाहरणं लक्षणज्ञानम्।

च) प्रकरणे

अलङ्कारपरिचयः

अलङ्कारलक्षणम्, अलङ्कारभेदाः, अलङ्कारमहत्त्वम्।

अनुप्रासः, यमकम्, श्लेषः, उपमा, रूपकम्, परिसंख्या, अपह्नुतिः, दृष्टान्तः, अर्थान्तरन्यासः, विरोधाभासः, दीपकम्, अतिशयोक्तिः, उत्प्रेक्षा, स्वभावोक्तिः, संसृष्टिः, सङ्करः – इत्येतेषामलङ्काराणां सोदाहरणं लक्षणज्ञानम्।

पाठ्यग्रन्थाः

१. संस्कृतरचनाप्रकाशः – प्रथमो भागः, प्रा.नीलमणिढुङ्गाना– उपप्रा.ध्रुवज्ञवालीरचितः।
२. संस्कृतरचनाप्रकाशः – द्वितीयो भागः, प्रा.नीलमणिढुङ्गाना–रचितः।
३. संस्कृतरचनाप्रकाशः – तृतीयो भागः, प्रा. नीलमणिढुङ्गाना–रचितः।

सहायकग्रन्थाः

१. अनुवादचन्द्रिका – पं. सोमनाथसिग्द्यालरचिता।
२. रूपचन्द्रिका – रमेशचन्द्रशुक्लरचिता।
३. संस्कृतशिक्षणाभ्यासः – प्रथमो भागः, प्रा.नीलमणिढुङ्गाना–रचितः।
४. व्याकरणप्रवेशिका – म.सं.वि.प्रकाशिता।
५. साहित्यप्रवेशिका –.म.सं.वि. प्रकाशिता।
६. निबन्धनवनीतम् – पारसनाथप्रणीतम्।

शिक्षणपद्धतयः

निगमनागमनव्याख्यानप्रश्नोत्तराद्याः पद्धतयो यथाविषयमवलम्बनीयाः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमूना प्रश्न-पत्र

वार्षिक परीक्षा, २०५८

परीक्षा - उत्तरमध्यमा

विषयः - अनिवार्यसंस्कृतरचना

खण्डः - प्रथमः पूर्णाङ्काः - १००

पत्रम् - प्रथमम् समयः - घण्टात्रयम्

(क) परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम्।

(ख) दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान् द्योतयन्ति ।

१. 'क्तिन्नन्तः' 'मोपधः' 'निष्ठा च' इत्येषां सूत्राणामर्थानुदाहरणानि च लिखत । ५

अथवा

स्वसृ–दारु–पितृ–धातृ–गौरीशब्दानां लिङ्गानि निर्धार्य प्रथमायां रूपाणि लिखत।

२. निष्पन्नानि रूपाणि प्रदर्शयत – ५

फल+आम्, अन्य+जस्, नदी+ङे, भानु+शस्, गो+अम्, चतुर्+आम्, राजन्+ङि, दण्डिन्+औ, मनस्+टा, किम्+भिस् ।

३. अस्मद्शब्दस्य सर्वाणि रूपाणि लिखत । ५

४. हन्धातोर्लटि रूपाणि लिखत । ५

५. कोष्ठकस्थसङ्केतानुसारेण वाक्यानि परिवर्त्तयत – ५

(क) अहं गृहं गच्छामि । (बहुवचने)

(ख) त्वं ग्रामं गच्छसि । (कर्मवाच्ये)

(ग) यद्यपि विद्वानस्म्यहं तथापि पाठयितुं न शक्नोमि । (संयुक्तवाक्ये)

(घ) योऽयं मत्पुत्रोऽस्ति स व्याकरणं पठेत् । (सरलवाक्ये)

(ङ) तेनाहं दृष्टः । (कर्त्तृवाच्ये)

६. तुमुन्प्रत्ययान्तपदैर्वाक्यानि संयोजयत – ५

(क) माता शय्यां गच्छति । सा तत्र शेते ।

(ख) पिता गां गोग्धि । स गोष्ठं गच्छति ।

(ग) स वनं गच्छति । स तत्र फलानि चिनोति ।

(घ) अहं मन्त्रान् पठामि । अहं शिवं पूजयामि ।

(ङ) राम ओदनं पचति । स महानसं गच्छति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७. कोष्ठकस्थसङ्केतमनुसृत्य उत्तराणि लिखत – ५

(क) प्राध्यापकः किं करोति ? (छात्र, पाठ, पाठि)

(ख) साधुः किं करोति ? (मन्दिर, भगवत्, पूजि)

(ग) नेतारः किं कुर्वन्ति ? (मञ्च, भाषण, कृ)

(घ) लेखन्याः किं प्रयोजनम् ? (सुन्दर, अक्षर, लिख)

(ङ) ते किं कृत्वा आगच्छन्ति ? (विद्यालय, पाठ, पठ)

८. वाक्येषु प्रयोगं कुरुत – ५

नमः । निकषा । ब्रूते । रोचते । बिभेति ।

अथवा

सर्वतः । स्वधा । स्पृहयति । रोचते । जुगुप्सते इत्येतेषां वाक्येषु प्रयोगं कुरुत ।

९. कोष्ठकस्थपदान्यनुसृत्य रिक्तं पूरयत – ५

(क) इमे .... साधवः प्रतीयन्ते । (तिलक)

(ख) सः प्रतिदिनं .... पठति । (सर्व, पाठ)

(ग) इमानि फलानि .... सन्ति । (मधुर)

(घ) मया प्रतिदिनं .... प्रणम्यन्ते । (गुरु)

(ङ) स .... परीक्षामुत्तरति । (प्रथमा श्रेणी)

१०. 'आत्मनिर्भरता' इत्यस्मिन् विषये संस्कृते ललितं निबन्धं लिखत । १०

अथवा

संस्कृतस्य महत्त्वं वर्णयत ।

११. निम्नलिखितं पद्यं पठित्वा तत्सम्बद्धान् प्रश्नानुत्तरयत – ४

यज्जीव्यते क्षणमपि प्रथितं मनुष्यैः
विज्ञानशौर्यविभवार्यगुणैः समेतम् ।
तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः
काकोऽपि जीवति चिराय बलिञ्च भुङ्क्ते ।।

(क) कीदृशं जीवितं प्रथितम् ?

(ख) मनुष्यैरित्यस्य क्रियापदं किम् ?

(ग) बलिं को भुङ्क्ते ?

(घ) काकजीवनं कीदृशजीवनस्योदाहरणम् ?

१२. उक्तस्य पद्यस्यान्वयं कुरुत – ४

१३. विग्रहं लिखत – ४

विज्ञानशौर्यविभवार्यगुणैः । तज्ज्ञाः । प्रथितम् । जीवितम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१४. प्रकृति–प्रत्ययौ अलग्नौ कुरुत ४

प्रवदन्ति । जीव्यते । चिराय । तज्ज्ञाः ।

१५. विभक्तीर्निर्दिशत – ४

मनुष्यैः । जीवितम् । काकः । भुङ्क्ते ।

१६. जातिवृत्तयोर्भेदं प्रदर्श्य उपजातेर्लक्षणोदाहरणे लिखत । १०

अथवा

मात्रापरिचयं दत्त्वा मन्दाक्रान्ताया लक्षणोदाहरणे व्याख्यात ।

१७. अलङ्कारलक्षणं तद्भेदञ्च निरूप्य यमकस्य लक्षणोदाहरणं विवृणुत । ५

१८. उपमाया लक्षणोदाहरणे स्फुटीकुरुत । ५

१९. यमकश्लेषयोः पार्थक्यं प्रदर्शयत । ५

अथवा

संसृष्टिसङ्करयोः पार्थक्यमुल्लिखत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नमूना प्रश्न-पत्र

वार्षिक परीक्षा, २०५९

परीक्षा - उत्तरमध्यमा
विषयः - अनिवार्यसंस्कृतरचना
खण्डः - प्रथम्
पत्रम् - प्रथमम्

पूर्णाङ्काः - १००
समयः - घण्टात्रयम्

(क) परीक्षार्थिभिः प्रश्नोत्तरं यथासम्भवं स्वकीयैः शब्दैर्लेखनीयम्।

(ख) दक्षिणपार्श्वे सन्निविष्टा अङ्काः पूर्णाङ्कान् द्योतयन्ति ।

१. "ऊङावन्तश्च', 'घातजन्तश्च', 'त्वष्यञौ तद्धितौ" इत्येषामर्थान् उदाहरानि च लिखत । ५

अथवा

ननान्दृ-स्रज्-त्रिभुवन-पाप-धर्मशब्दानां लिङ्गानि निर्धार्य, प्रथमायां विभक्तौ निष्पन्नरूपाणि लिखत ।

२. निष्पन्नानि रूपाणि प्रदर्शयत - ५

कृष्ण + सुप्, सर्व + शस्, दधि + टा, स्त्री + टा, भानु + शस्, वणिज् + ङि, गच्छत् + आम्, कर्मन् + भ्याम्, विद्वस् - भिस्, मनस् + ङे ।

३. 'किम्'शब्दस्य सर्वाणि रूपाणि पुल्लिङ्गे नपुंसके च लिखत । ५

४. कृधातोर्लीटि रूपाणि लिखत । ५

५. वाक्यपरिचयं दत्त्वा तद्भेदाँश्च लिखत । ५

अथवा

कर्मकरणसम्प्रदानाधिकरणकारकेषु का का विभक्तिर्लगति ? सोदाहरणं लिखत।

६. कोष्ठस्थसङ्केतानुसारेण वाक्यानि परिवर्त्तयत- ५

(क) याचकः धनं याचने । (बहुवचने)

(ख) बालकाः शेरते । (एकवचने)

(ग) मया पाठः पठ्यते । (कर्त्तृवाच्ये)

(घ) यः सरलोस्ति स पठति । (सरलवाक्ये)

(ङ) ते मया दृष्टाः । (कर्त्तृवाच्ये)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७. क्त्वाप्रत्ययान्तपदैर्वाक्यानि संश्लेषयत –

(क) पिता विद्यालयं गच्छति । स ततः समागमिष्यति ।

(ख) छात्रः परिश्राम्यति । स उत्तीर्णो भवति ।

(ग) स वनं गच्छति । ततः फलानि आनेष्यति ।

(घ) अहं परीक्षामुत्तरयामि । ततश्च प्राध्यापको भविष्यामि ।

(ङ) माता गां दोग्धि । सा मह्यं दुग्धं दास्यति ।

८. कोष्ठकस्थसङ्केतमनुसृत्य उत्तराणि लिखत – ५

(क) सैनिकाः किं कुर्वन्ति ? (रिपु, नाशि)

(ख) नेतारः किं कुर्वन्ति ? (जन, वञ्चि)

(ग) गायिका किं करोति ? (सुन्दर, गीत, गै)

(घ) प्राध्यापकाः किं कुर्वन्ति ? (छात्र, व्याकरण, पाठि)

(ङ) कृषकाः किं कुर्वन्ति ? (क्षेत्र, कृष्)

९. वाक्येषु प्रयोगं कुरुत – ५

स्वधा । परितः । शये । याचन्ते । उपवसति ।

१०. 'भ्रष्टाचारः' इत्यस्मिन् विषये मधुरं युक्तियुक्तञ्च निबन्धं लिखत – १०

अथवा

'नैतिकतायां संस्कृतस्य महत्त्वम्' इति विषये निबन्धं लिखत ।

११. निम्नलिखिते पद्ये पठित्वा तत्सम्बद्धान् प्रश्नानुत्तरयत – ४

विद्यावतां महेच्छानां शिल्पविक्रयशालिनाम् ।
सेवावृत्तिविदां चैव नाश्रयः पार्थिवं विना ।।
ये जात्यादिमहोत्साहान्नरेन्द्रान्नोपयान्ति च ।
तेषामामरणं भिक्षा प्रायश्चित्तं विनिर्मितम् ।।

(क) विद्यावताम् आश्रयः कः ?

(ख) पार्थिवः केषां केषामाश्रयः ?

(ग) केन हेतुना नरेन्द्रं नोपयान्ति जनाः ?

(घ) आमरणं भिक्षा केषाम् ?

१२. उक्तस्य पद्यद्वयस्य अन्वयं कुरुत – ४

१३. विग्रहं लिखत – ४

विद्यावताम् । महेच्छानाम् । सेवावृत्तिविदाम् । शिल्पविक्रयशालिनाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

१४. प्रकृति-प्रत्ययौ अलग्नौ कुरुत ४

विद्यावताम् । पार्थिवम् । नोपयान्ति । आमरणम् ।

१५. विभक्तीर्निर्दिशत - ४

महेच्छानाम् । सेवावृत्तिविदाम् । विनिर्मितम् । जात्यादिमहोत्साहात् ।

१६. गुरुलघुयतिलक्षणं सोदाहरणं विलिख्य, गणप्रतीकं लिखत । १०

अथवा

आर्यायाः शिखरिण्याश्च लक्षणोदाहरणे सयुक्ति विशदयत ।

१७. अलङ्कारमहत्त्वं प्रतिपाद्य, अनुप्रासस्थ लक्षणोदाहरणे लिखत। ५

१८. अतिशयोक्तेर्लक्षणे उदाहरणं सङ्घयत । ५

१९. शब्दालङ्कारार्थालङ्कारयोः पार्थक्ये बीजं विचारयत । ५

अथवा

उपमारूपकयोर्भेदकं विचारयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शिक्षणनिर्देशिका

१. विद्यार्थीमा भाषिक शिल्पप्रदान र व्युत्पत्तिवृद्धिका लागि यो पाठ्यांश निर्धारित गरिएको हुँदा यसको शिक्षणमा यसको उद्देश्य, पाठ्यवस्तु र नमूना प्रश्नपत्रलाई सधैं केन्द्रबिन्दु बनाउनुपर्छ ।

२. अधिकांश विद्यार्थीहरू सही दिशानिर्देश विना अलमलिई पाठ्यांशको तयारी गर्नसक्ने स्थितिमा हुँदैनन् । शिक्षकले अध्ययन गराउँदा समयमै दिशानिर्देश गरिदिनुपर्छ ।

३. शब्दरूपावली लिङ्गानुशासनकै सन्दर्भमा र धातुरूपावली वाक्यरचनाको क्रममा दिइएको छ । त्यसको बढी अभ्यास गर्न लगाउनुपर्छ ।

४. परीक्षामा क्त्वाप्रत्ययान्तपदको प्रयोग गरी वाक्य संश्लेषण गर्न भनिएको हुन्छ, विद्यार्थीले समासान्त (उपसर्ग लागेको) धातुदेखि क्त्वाका स्थानमा ल्यप् हुन्छ भनी राम्रो बुझेका हुँदैनन् । यस पुस्तकमा दिएका उदाहरणको आधारमा क्त्वाबाट ल्यप् गर्दा बन्न जाने रूपलाई राम्रोसित बुझाई वाक्यसंश्लेषणमा अभ्यास गराउनुपर्छ ।

५. बोधको सन्दर्भमा पञ्चतन्त्रबाट दिएका पाठहरूलाई नमूना प्रश्न हेरी ती र त्यस्ता खालका प्रश्नको राम्रोसित अभ्यास गराउनुपर्छ ।

६. उक्त पाठभित्र पर्ने पद्यहरूको अन्वय गर्ने विधि सिकाई अन्वयमा अभ्यास गराउनुपर्छ । साथै व्युत्पत्तिवर्द्धनका निमित्त त्यसभित्रका शब्दहरूको विग्रह गर्न लगाउने; समास, कृदन्त वा तद्धित के हो बताइदिने; प्रकृति-प्रत्यय छुट्याउन लगाउने र पदहरूको विभक्तिनिर्देश गर्ने काम गर्न लगाउनुपर्छ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

७. वाक्यरचनाका सन्दर्भमा कुन-कुन शब्दको प्रयोगमा कुन उपपद विभक्तिको प्रयोग हुन्छ, यस पुस्तकको पादटिप्पणीका रूपमा दिइएका सूत्रको आधारमा नियमको जानकारी दिई प्रयोग गर्ने अभ्यास गराउनुपर्छ।

८. नमूनाका लागि निबन्धको परिचयका साथै निबन्ध लेखन विधि तथा नमूना निबन्ध यस पुस्तकमा दिइएको छ। तदनुसार परीक्षामा आउने खालका विषयमा विद्यार्थीलाई निबन्ध लेख्न र निबन्धका उपयुक्त पुस्तक पढ्न लगाउनुपर्छ।

९. छन्द र अलङ्कारका सन्दर्भमा विद्यार्थीलाई सामान्य लक्षण र एक-एक उदाहरण दिई लक्ष्य-लक्षण समन्वय गर्न लगाउनुपर्छ। मिल्दाजुल्दा अलङ्कारहरूका बीच पाइने अन्तर पनि छुट्याइदिनुपर्छ।

१०. यी सामान्य सुझावमात्र हुन्, यसमा अझ प्रभावकारिता ल्याउन विभिन्न विधिको उपयोग गर्न सकिन्छ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

[illegible] मिति

२०३१।६।८

२४८६५ दर्ता नं.

६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मुलुकको विकास, स्थिरता र शान्तिका लागि खेर गइरहेको भूमि
जनशक्ति, समय र किताबहरूको सही सदुपयोग गर्नुपर्छ । – एस

पुराना पुस्तक दिनुस्, नयाँ लैजानुस्

प्रिय पाठकवर्ग !

तपाईंको घरका कोठा–चोटामा काम नलाग्ने भनेर थन्क्याइएका पुराना पाठ्यपुस्तकहरू हुनसक्छन् । तपाईंहरूका मनमा लागेको होला – यी पुराना पाठ्यपुस्तकहरू त्यसै फाल्न पनि माया लागेको छ, जतन गरेर राख्न पनि ठाउँको अभाव छ । यदि त्यसो हो भने धन्दा नमान्नुहोस्, पुराना पाठ्यपुस्तकहरू खुरुक्क हामीकहाँ ल्याउनुहोस् । त्यसपछि तपाईंलाई हामी नयाँ किताब अथवा आवश्यक पर्ने कुनै नयाँ स्टेसनरीका सामानहरू दिएर पठाउनेछौं। हामीलाई सेवा गर्ने अवसर प्रदान गर्नुहोस् ।

हाम्रा महत्त्वपूर्ण सेवाहरू :

- नयाँ पाठ्यक्रमपमा समावेश गरिएका पुराना पाठ्यपुस्तकहरू अङ्कित ४०% मा लिनेछौं ।
- पुराना सहयोगी पुस्तक, पुस्तिका (गाइड) तथा एक वर्ष अगाडिका गेस पेपरसमेत खरिद गरिनेछ ।
- तपाईंले पाउने रकम बराबरका नयाँ पाठ्यपुस्तक अथवा स्टेसनरीका सामानहरू तुरुन्तै दिइनेछ ।
- सहुलियत दरमा फोटोकपीका साथै प्रमाणपत्र, लब्धाङ्कपत्र आदि महत्त्वपूर्ण कागजपत्रहरूको लेमिनेसन पनि गरिनेछ ।
- बहुउपयोगी पुस्तकका साथै अन्य उपयोगी पुस्तकहरू पनि साटफेर गर्न सकिनेछ।
- नियमित रूपमा आउने ग्राहकहरूलाई विशेष सुविधाको व्यवस्था छ। साथै,

प्रस्तुत **'संस्कृतरचनाप्रदीपः'** पुस्तक पनि हाम्रै पसलमा पाइन्छ ।

पुस्तक पाइने ठेगाना :

Int'l Second Hand Book Shop

Paradarshani Marg, ph. 232254

वाल्मीकि क्याम्पस, प्रदर्शनी मार्ग, स्टल नं. २४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu